LIBRARY OF PRINCETON

AUG 6 2007

THEOLOGICAL SEMINARY

7.31.'02

From the Library of

Professor William Henry Green

Bequeathed by him to

the Library of

Princeton Theological Seminary

PK3741
.P2
1848

Digitized by the Internet Archive
in 2016

https://archive.org/details/pantschatantrums00kose

W. Henry Green
Princeton N.J.

Sept. 17. 1886

Pañchatantra.

# PANTSCHATANTRUM

SIVE

## QUINQUEPARTITUM

## DE MORIBUS EXPONENS

EX CODICIBUS MANUSCRIPTIS EDIDIT

COMMENTARIIS CRITICIS AUXIT

**IO. GODOFR. LUDOV. KOSEGARTEN**

S. S. THEOL. ET LINGUAR. ORIENT. IN ACADEMIA POMERANA P. P. O.

**PARS PRIMA**

TEXTUM SANSCRITUM SIMPLICIOREM TENENS.

BONNAE AD RHENUM.

IMPENSIS H. B. KOENIG.

MDCCCXLVIII.

PROSTAT

LONDINII APUD WILLIAMS & NORGATE.

LIBRARY OF PRINCETON
AUG 6 2007
THEOLOGICAL SEMINARY

N. y. u.

# PRAEFATIO.

Ad Quinquepartitum hoc edendum ut animum adpellerem, primo codices duo Hamburgenses effecerunt, in quos, quum multis abhinc annis libros manuscriptos, qui Hamburgi in bibliotheca Senatoria adservantur, perlustrarem orientales, praeter exspectationem incidi, quorumque alterum paulo post transcripsi. Quos codices quum locis multis tum scriptura perversa, tum lacunis laborare intelligerem, ab Adolpho Friderico Stenzlero, populari meo, mihi amicissimo, qui tunc Londinii studio litterarum Indicarum operam navabat, ut hunc librum in publicum edituro mihi ex codicibus Londiniensibus aliquid subsidii pararet, petii. Neque defuit vir ille humanissimus, quo minus mihi hoc roganti obtemperaret; ex codice enim curiae Indicae Londiniensi, qui numero 1440. signatus erat, cum libris Colebrookianis eo adlato, Pantschatantri libros duos primos meum in usum litteris Latinis transcripsit. Deinde ex congerie codicum Indicorum Chambersiana, quae Berolinum deportata est, unum Pantschatantri exemplar accepi. Denique Otto Fridericus Tullbergius, Suecus, litterarum orientalium in academia Upsaliensi professor clarissimus, quocum aliquando, quum per aliquod tempus apud nos Gripesvoldiae commoraretur, familiaritatem contraxeram, apographa Pantschatantri, quae Londinii et Oxonii summa cura litteris Latinis conscripserat ipse, singulari benignitate erga me usus, mihi pervolutanda et in rem meam convertenda permisit. Duos codices Londinienses transcripserat integros, atque ex aliis scripturae varietatem partim in margine illorum apographorum, partim inter lineas adnotaverat. Quibus subsidiis liberaliter mihi concessis, Tullbergius tam insigni beneficio me devinxit, ut gratiam ei habere debeam tantam, quantam maximam animus

meus capere potest. Quibus praemissis, iam codicum illorum, quotquot mihi obtigerunt, quibus aut ipsis, aut quorum apographis, ab Stenzlero et Tullbergio confectis, uti potui, enumerationem brevem secundum litterarum, quibus eos signavi, ordinem instituam. Codices ipsi litteris Devanagaricis exarati sunt omnes.

A. Codex curiae Indicae Londiniensis nro. 2643. foliis centum quinquaginta tribus constans, quem Tullbergius transcripsit integrum. Quanquam librarii mendis plane non purus est, tamen scriptura adcuratiore codicibus ceteris praestat. Ad finem posita sunt haec: त्रिवसुद्रेण लिखितं संवत् १५७४.

B. Codex Wilsonianus, qui apud Wilsonem, patronum litterarum Indicarum celeberrimum, adservatur, negligentius scriptus, tantumque tres Pantschatantri libros priores continens. Scripturae varietatem ex eo sumtam Tullbergius apographo codicis A. adiecit. Quod ad textum adtinet, codex B. ad codicem A. prope accedit.

C. Codex Wilsonianus, luculentius et curatius exaratus, ex quo lectionis varietatem Tullbergius apographo codicis A. adscripsit. Ad finem posita sunt: समाप्तं चेदं पञ्चतन्त्रं संवत् १८५६. Textu hic codex a codice A. satis multum differt. In libro Pantschatantri tertio, ubi de consilio ulularum exponitur, codex C. duas huius libri editiones diversas in unam confundit, sententiis singularum ulularum ex editione utraque receptis, iisque, quanquam discrepant, parum commode inter se connexis.

D. Codex curiae Indicae Londiniensis nro. 2790. foliis constans centum septuaginta sex. Editionem Pantschatantri aliam, quam quae codice A. continetur, exhibet. Fabulas libri tertii, quartique ordine alio quam ceteri codices, eoque, ut mihi videtur, praepostero collocat. Scriptus est anno संवत् १७२६. Integrum eum transcripsit Tullbergius.

E. Codex curiae Indicae Londiniensis nro. 1812. paginas tenens ducentas quinquaginta septem, ex quo scripturae varietatem apographo codicis A. adscripsit Tullbergius. Textus ad codicem A. prope accedens passim verba sensum supplentia adiicere videtur.

F. Codex curiae Indicae Londiniensis nro. 2319. foliis ducentis et quindecim constans, ex quo lectionis varietatem apographo codicis D. adscripsit Tullbergius. Huic enim, quod ad textum adtinet, cognatus est. In libro tertio vero, pariter ut codex C., editiones diversas in unam confundit.

G. Codex curiae Indicae Londiniensis nro. 2146. folia quadraginta octo tantum tenens, ex quo scripturae varietatem apographo codicis D. adscripsit Tullbergius. Textum recentiorem, locis multis in angustum deductum, exhibere videtur.

H. Codex Hamburgensis primus, in dorso signatus numero CCLI. foliis centum et viginti septem constans, nitide scriptus. Textu ad codicem D. propius accedit, sed fabulae nonnullae, quanquam in codice D. ceterisque exstant, in eo omissae sunt.

Pantschatantro in hoc volumine libellus medicus subiunctus est, folia sedecim tenens, cui introitus hic est: श्रीधन्वन्तरये नमः। उदयगिरिशिरस्थो निद्रया मूढमेतज्जगदगदमशेषं निर्मिमीते निशं यः।. Quem librum medicum excipit alius, litteris quidem Devanagaricis, sed lingua non Sanscrita conscriptus. Exordio quidam lector Latinis litteris superscripsit: «Soera Bötter of Tuti nama» si recte legi. Versiculi primi sunt hi: ॥ गाथा ॥ सयलसुरासुरमाया। मंगलकल्लाणसुहसंजयनिलया। वरविद्याणंदाया। सासारयापटमपणमामि ॥ श्लोकः॥ मुदा नमस्कृत्य सरस्वतीपदौ। तथा गुरुं श्रीगुणमेरुपङ्कजं। शुकोक्तसद्वाक्यचतुष्पदीमिमां। करोम्यहं सर्वजनस्य सुप्रियां॥ Pro चतुष्पदीमिमां vero in codice चतुष्पदीमां scriptum est. Ad finem libri posita sunt haec: इति श्रीरसमंजरीशुकबहुत्तिरीकथा सम्पूर्ण। Igitur liber psittaci esse videtur, fortasse in linguam Hindustanicam translatus; nam sanscrite शुकसप्ततिः vocatur, et طوطی نامه Persice.

I. Codex Hamburgensis alter, in dorso signatus numero CCL. foliis centum et quinquaginta uno constans, quem primum transcripsi. Codici H. admodum similis est scriptura et habitu, textuque cum eo plerumque consentit. Sed mendis scatet, lacunisque pluribus mutilus est. Dorso quidam inscripsit: «Liber Iapon. de medic.»

Nam etiam in hoc volumine Pantschatantro libellus medicus subiunctus est fol. 152—176., cuius exordio Hollandica haec superscripta sunt: «Van de medecyne; syn naam is wegt weleb.» Verba prima: वैद्यकनोग्रन्थवैद्यवल्लभः। उदयगिरिशिरस्थो निद्रया°. Idem igitur liber medicus esse videtur, qui in codice H. exstat, nomenque Veidjavallabhae habet. Ad finem: संवत् १७०१.

K. Codex Berolinensis Chambersianus, foliis minoribus ducentis quinquaginta duobus constans. Folia prima et extrema ab manu alia, quam quae cetera exaravit, scripta esse videntur. Textus plerumque cum codice A. consentit; sed lacuna una maiori est mutilus. Absunt enim ab eo folia ea, quibus libri tertii pars tertia fere extrema continebatur. Quod et ipsum ex numeris Indicis antiquioribus, qui foliis inscripti sunt, cerni potest. Nam folium २०२ ab folio २१५ excipitur;

exciderunt igitur folia duodecim. Iam vero foliis omnibus iis, quae folium २०२ sequuntur, etiam alii numeri Indici inscripti sunt, non interrupto ordine procedentes, ne lacunam adesse primo adspectu quisquam videat.

L. Codex curiae Indicae Londiniensis, folia ducenta et quindecim tenens, ex bibliotheca Colebrookiana in curiam Indicam delatus. Libros Pantschatantri duos priores, ut supra dixi, Stenzlerus ex eo transscripsit. Quod quum fieret, codex numero 1440. signatus erat; posteane numerum mutaverint, nescio. Apographum Stenzleri textu cum iis, quae Tullbergius ex codice F. exscripsit, tantopere consentit, ut codices L. et F. unum eundemque esse paene crediderim. Sed interdum tamen Stenzleriana a Tullbergianis dissentiunt. In versiculo 57. libri secundi a Stenzlero: सम्पातं च विपातं च° posita sunt; a Tullbergio vero ex F. sumta: सम्पातं विप्रपातं च°. In fabula tertia libri secundi pag. 120. lin. 13. a Stenzlero: एतस्मिन्नन्तरे posita sunt, a Tullbergio vero ex F. sumta: एतस्मिन् व्यतिकारे.

Codices hi textus Pantschatantri proponunt varios, qui non modo in sententiis singulis et versiculis interpositis, verum etiam fabulis integris vel adiectis, vel omissis, vel loco alio collocatis, tantopere inter se differunt, ut paene quot codices, tot textus esse dicere possis. Quam varietatem in huius generis libris Indicis, quorum scriptura non auctoritate quadam sacra constitueretur, certis finibus constricta, sed levioris momenti, proptereaque liberiori virorum doctorum arbitrio permissa esse existimaretur, haud raro deprehendi, ab Augusto Guilelmo Schlegelio in praefatione ad Hitopadesam recte notatum est. Primo enim, quod confectum fuerat, talis libri corpori exinde viri docti et librarii ea, quae argumentis in libro expositis quodammodo consentanea esse viderentur, sensim inseruerunt locis aptis, aliaque eorum, quae in libro consignata erant, suo arbitratu immutaverunt. Quapropter ne in uno quidem codicum eorum, quibus uti potui, primam Pantschatantri formam servatam esse opinor. Duae praesertim vero in codicibus illis editiones huius operis diversae prae ceteris distingui posse mihi visae sunt, quarum alteram simpliciorem, ornatiorem alteram nuncupabo, ut, ubi necesse erit, nomine breviori unamquamque singillatim significare possim.

O r n a t i o r e m idcirco alteram voco, quia in ea interdum personae vel res, quas editio simplicior verbo uno vel paucis significat, verbis pluribus plenius et ornatius describuntur. Ita, ut huius indolis,

quam textus ornatior prae se fert, exemplum aliquod adponam, pro iis, quae in libro nostro pag. 6. lin. 4. exstant, ex editione simpliciori sumtis: अस्ति दाक्षिणात्ये जनपदे मिहिलारोप्यं नाम नगरं। in editione ornatiori ponuntur haec, quibus civitatis Mihilárôpjae vel Mahilârôpjae splendor vividius depingitur: दाक्षिणात्येषु जनपदेषु पुरन्दरपुरस्पर्द्धि सर्वगुणसम्पन्नं पृथिव्याश्चूडामणिरत्नभूतं कैलासशिखराकृति विविधयन्त्रप्रहरणाचरणपरिपूर्णगोपुराट्टालकं विसङ्कटोत्कटदृढपरिघकपाटतोरणार्गलोपगतेन्द्रकीलकीलककलितविपुलद्वारं सुविहितशृङ्गाटकचतुष्पथप्रतिष्ठितानेकदेवायतनं परिखापरिकरोच्छ्रितहिमगिरिसदृशाकारप्राकारवलयपरिवेष्टितं महिलारोप्यं नाम नगरं Similique modo in fabula quinta libri primi pag. 43. lin. 5. puellam regiam, quam textor et carpentarius conspiciunt, editio simplicior vocabulo uno सर्वलक्षणसनाथां depingit, ornatior vero epithetis septem splendidissimis, venustates puellae singulas praedicantibus; quae quidem haec sunt: प्रथमयौवनोद्भिन्नकर्कशस्तनयुगलतिलकितहृदयदेशां उपचीयमाननितम्बबिम्बां क्षामोभयमध्यां सजलजलदनीलमृदुस्निग्धतरङ्गितशिरसिजां स्मरविलासदोलासंवादिश्रवणनिवेशितरत्नकनकपत्रां नवविकसितकोमलकमलकान्तमुखीं निद्रामिव सकललोकलोचनग्राहिणीं. Sed appellationi tamen huic, qua ornatiorem hanc editionem nuncupo, ne nimium quantum tribuant, lectoribus videndum est; nam nonnullis tantum locis descriptiones illae floridiores in ea positae inveniuntur.

Porro editio ornatior, quod ad librum primum adtinet, fabulis locupletior est, quam editio simplicior; fabulae enim novem in illa insunt, quas simplicior non recepit, neque liber Kalîlae. Praeterea in enarrandis fabulis iis, quas editio utraque habet, ornatior saepe non solum verbis utitur aliis, quam quae in simpliciori posita sunt, sed res gestas quoque ipsas, earumque causas et momenta aliter atque simplicior fingit vel connectit. Quod quidem in fabulis iis, quae de textore volitante pag. 43 48. et de grue fraudulenta a cancro peremta pag. 50. 51. exponunt, aliisque permultis, satis potest perspici. Consilium ulularum, quod libro tertio tractatur, ornatior multo secus ac simplicior reddit. Versiculi fabulis inserti, qui in ornatiore leguntur, saepe ab iis diversi sunt, quos proponit simplicior. Quae de quaestus faciendi generibus variis in exordio libri primi editio simplicior pag. 7. lin. 8—25. et pag. 8. lin. 1—9. exponit, ea ornatior fabulae tertiae libri quinti inserit.

Quae narrationis diversitas ubicunque inter editionem ornatiorem et simpliciorem intercedit, ornatiori liber Kalîlae, antiqua Pantschatantri translatio Arabica, plerumque adstipulatur. Cuius consensus aliquot exempla adponam. In fabula septima libri primi gruem fraudulentam editio ornatior fert cancro praedixisse, mox venturos

esse piscatores, ex lacu animantia omnia extracturos; se enim ex piscatoribus audivisse, quum dicerent: बहुमत्स्यमिदं महासरः । तत्र श्वः परश्वो वा जालं प्रक्षिप्यते i. e. «abundat piscibus hic magnus lacus; in eum cras vel perendie rete iacietur.» Idem hoc grus illa in libro Kalîlae, edit. Sacyan. pag. 100. 101. cancro narrat, piscatoremque perhibet dixisse: إِنَّ هَاهُنَا سَمَكًا كَثِيرًا أَفَلَا نَصِيدُهُ أَوَّلًا أَوَّلًا i. e. «certe hoc loco pisces multi adsunt, itaque eos capiamus quam primum!» Idemque in hac fabüla etiam Hitopadesa tradit, editor. Schlegelio, Lassenioque pag. 114. Sed editio simplicior pag. 50. gruem praedixisse fert, mox siccitate diuturna terram adeo laboraturam esse, ut in lacu aqua mansura sit nulla. Atque sic saepius Hitopadesa cum editione ornatiori congruit, ab simpliciori dissentiens.

In fabula septima decima libri primi simias frigore horrentes editio ornatior खद्योतं cicindelam, quae musca vespere lucens est, conspexisse fert, quam ignem esse putarent. Ita etiam liber Kalîlae pag. 128. simias يَرَاعَةً تَطِيرُ كَأَنَّهَا شَرَارَةُ نَارٍ cicindelam volitantem, quae ignis scintillae speciem prae se ferret, vidisse dicit. Editio simplicior vero pag. 93. simias illas वह्निकणासदृशानि गुञ्जफलानि baccas fruticis, qui Gundscha vocatur, rubicundas, ignis scintillis similes, invenisse, easque flammas esse putasse, narrat. Hitopadesa hanc fabulam non habet.

In fabula undevicesima libri primi editio ornatior Dharmabuddhem, mercatorem, Pâpabuddhis amicum, iter facientem fortuito ollam mille dînâris sive nummis aureis impletam कलशगतं दीनारसहस्रं invenisse tradit. Atque similiter fere Kalîlae pag. 129. hominem illum crumenam mille dînâris impletam in via reperisse dicit: فَوَجَدَ كِيسًا فِيهِ أَلْفُ دِينَارٍ. Simplicior contra editio pag. 95. illum Dharmabuddhem, Pâpabuddhemque, pecuniam non in via iacentem invenisse, sed studio et labore sensim meruisse perhibet. Neque haec fabula in Hitopadesa inest.

Editionem ornatiorem, de qua modo dixi, codices A. B. K. continent, quibus saepe etiam C. E. adstipulantur, praesertim quod ad fabulas libri primi illas adtinet, quas ornatiorem sibi proprias habere supra dixi. Codices D. F. G. H. I. L. editionem simpliciorem proponunt, quanquam haud raro inter se dissentientes. Codices Hamburgenses H. I. in libris Pantschatantri extremis fabulas nonnullas omit-

tunt, quae in codicibus ceteris exstant. Passim codex unus idemque utriusque editionis lectionem recepit. Ita codex L. fabulae quintae libri primi introitum primo talem fere ponit, qualem editio simplicior pag. 43. habet: कस्मिंश्चिदधिष्ठाने कौलिकरथकारौ मित्रे प्रतिवसतः स्म — नानादेशागतजनाहिते. His vero, sententia non absoluta, neque ullis aliis interpositis, statim introitum eiusdem fabulae alium, ex editione ornatiori sumtum, subiungit: तत्र कौलिकरथकारौ द्वौ सुहृदौ स्वशिल्पस्य पारं गतौ°. Nam ornatior introitum proponit hunc: अस्ति गौडेषु पुण्ड्रवर्धननाम नगरं। तत्र कौलिको रथकारश्च द्वौ सुहृदौ स्वस्वशिल्पे परं पारमागतौ°. Codices C. F. in consilio ululaium exponendo utriusque editionis lectionem adponere, notatum est supra.

Utrum editio ornatior, an simplicior, sit habenda vetustior, vel primae Pantschatantri formae propinquior, de ea re sententiam ferre certam non audeo; magis perspectum hoc habebunt posteri. Fortasse codices alii, a me non lecti, in lucem protrahentur, ex quibus huic disquisitioni etiam plus lucis adfulgebit. Si quid video, editio ornatior, quanquam in eam ipsam recentiora multa recepta esse crediderim, in universum ad antiquam libri formam propius accedit, proptereaque cum libro Kalîlae magis quam altera convenit. In editionis meae volumine hoc primo scriptura potissimum ad editionem simpliciorem accommodata est, quoniam codices H. I. L. qui mihi obtigerunt primi, illam editionem exhibent, eoque factum est, ut ad eam primam ex illis codicibus eruendam me adplicarem. Qui codices ubi nimis vitiosi vel mutili esse mihi videbantur, ex ceteris meliora vel pleniora supplevi; qua de re in commentario critico adcuratius disputabitur, ut unde singula quaeque a me sumta sint, pro eo ac debet demonstretur. Versiculos recepi nimis multos, ut lectores critici eorum, quos aut retinendos, aut eiiciendos esse censeant, ipsi instituere possint delectum. Ab auctore libri primo locis plerisque nonnisi versiculum unum, vel paucos, positos esse coniicio equidem; nam quo additi sunt plures, eo longius ii, qui extremi sunt, ab ea sententia recedunt, quae adponendi primi fuit causa. Iam vero, nulla mora interposita, etiam editionis ornatioris textum in publicum edam, ex solo fere codice A. sumtum; cui, ubi laborat, codices B. K. aliquid medelae adferre possunt.

Cum Pantschatantro librum Kalîlae studiose contuli, magnamque ex hac comparatione cepi voluptatem. Saepe enim miratus sum, liber Kalîlae, quanquam non ex ipso Pantschatantro Sanscrite scripto, sed ex translatione Pehlevica originem traxit, quantopere in narratio-

nibus sententiisque multis cum scriptura Sanscrita concinat. Cuius concordiae aliquot exempla proponam.

Libri tertii versiculo 112. vulnera ab securibus vel gladiis inflicta sanari, quae vero lingua procax laceraverit, restitui non posse exponitur. Haec in libro Kalîlae pag. 189. 190. sic reddita sunt:

فاعلم أن الفاس يقطع به الشجر فيعود ينبت والسيف يقطع اللحم
ويعود فيندمل واللسان لا يندمل جرحه ولا تؤسا
مقاطعه

„Scito arborem securi caesam repullulare, carnemque gladio laceratam consanari, sed vulnera ab lingua inflicta non consanari, neque plagas ab ea impositas percurari.“

Libri tertii versiculo 113. verba odiosa et nefaria non verba, sed venena esse demonstratur. Quae Arabs pag. 190. ita reddidit:

الكلام الذي يلقى منه سامعه وقائله المكروه وما يورث الحقد والضغينة
فلا ينبغي لأشباه هذا الكلام أن تسمى كلاما ولكن سهاما

„Quicunque sermo quum audienti, tum dicenti, sinistra parat, et odium, inimicitiamque suscitat, eum non sermonem, sed telum, nuncupare convenit.“

Quodsi pro سهاما tela substituimus سماما venena, quod facile in codicibus exstare potuit, Arabica etiam pressius ad Sanscrita accedunt.

Libri tertii versiculo 114. etiam fortem hominem ad inimicitiam sibi suscitandam non pronum esse docetur, quemadmodum neque venenum pro medicamento habeat homo prudens. Quae Arabs pag. 191. his verbis expressit:

والعاقل وإن كان واثقا بقوته وفضله فلا يحمله ذلك على أن يجلب
العداوة على نفسه اتكالا على ما عنده من الرأي والقوة كما
أنه وإن كان عنده الترياق لا ينبغي له أن يشرب السم اتكالا
على ما عنده

„Homo cordatus, quanquam fortitudini suae, virtutique confidit, tamen ea re non eo adducitur, ut inimicitiam sibi suscitet, prudentia sua, fortitudineque fretus, quemadmodum eum, etiamsi theriacam secum habet, tamen non decet, venenum bibere, medicamento illo confisum.“

Codices libri Kalîlae textus proponunt varios; sed uti non potui nisi eo, quem Sacyus typis exscribendum curavit. Qui deinde Bûlâki anno Moslemorum 1251. editus est, eum habui et ipsum; sed a Sacyano non diversus, ex eo exscriptus esse videtur. Prooemium tantum aliud editor Bûlâkensis praemisit. Ex translatione Pantschatantri Pehlevica librum Kalîlae natum esse, pro certo haberi posse videtur; edit. Sacyan. mémoire historique pag. 8. Cuius originis indicium quoddam in fabula prima libri tertii fortasse superest. In ea enim de lepore quodam dicitur, cui nomen विजयदत्तः sive Nicanori esset; atque in eadem fabula liber Kalîlae leporem quendam prodiise tradit, qui Fîrûs فيروز sive victoriosus adpellaretur. Quod nomen Persicum ex translatione Pehlevica in Arabicam transiisse coniici potest. Sed liber Kalîlae permulta addit, quae in Pantschatantro non exstant, itidemque multa supprimit, quae in illo insunt. Atque iam ab translatore Pehlevo ad Sanscrita esse adiecta multa, fama est; ed. Sacyan. loc. cit. pag. 3. Quibus Kalîlae capitibus singuli Pantschatantri libri in universum respondeant, hoc loco breviter notabo, ut facilius lectores hoc cognoscant:

| Pantschatantrum. | Kalîla. | Hitopadesa. |
|---|---|---|
| lib. 1. | cap. 5. | lib. 2. |
| lib. 2. | cap. 7. | lib. 1. |
| lib. 3. | cap. 8. | lib. 3. 4. |
| lib. 4. | cap. 9. | |
| lib. 5. | cap. 10. | |

Quae Kalîlae capita antecedunt quintum, prooemia tantum continent. Ceterum quantum, quod ad fabulas, singulis libris immissas, adtinet, opera illa tria inter se differant, in descriptione Pantschatantri societatis Asiaticae Britannicae commentationum volumini primo inserta, luculenter demonstravit Wilso. Dubois, clericus Gallus, librum edidit, qui inscriptus est: Le Pantcha-Tantra ou les cinq ruses, fables du Brahme Vichnou-Sarma; traduit pour la première fois sur les originaux indiens; Paris. 1826. Quo libro epitome Pantschatantri quaedam continetur, ex editionibus huius libri recentioribus, Tamulice, Telugice, Kanarice scriptis, excerpta, modo cum scriptura Sanscrita concinens, modo ab ea prorsus dissidens. Versibusne Sanscritis Pantschatantrum primo descriptum sit, quaeri potest; passim in eo versiculi insunt, narrationem non illustrantes, sed eam persequentes ipsam, ut libr. 2. vers. 54. 61. 89. libr. 3. vers. 6. 248. 249. Fabulam libri

tertii septimam codices alii totam oratione metrica compositam exhibent, alii partim versiculis, partim pedestri dicendi genere descriptam.

Superest, ut Christiano Lassenio, veterum litterarum Indicarum Persicarumque instauratori praestantissimo, meritissimo, pro suo in me studio gratias debitas persolvam. Pantschatantri edendi officium ut susciperem, comiter me hortatus est, adiumento in hac re se mihi futurum esse pollicitus, dimidiaeque fere huius libri parti priori, quum Bonnae formis exprimeretur, perlustrandae et corrigendae operam navavit. Quam curam parti posteriori quo minus impenderet, quum valetudo incommodior eum impediverit, ut iam in dies magis convalescat, pristinumque vigorem omnino recuperet, ex animo precor. Denique lectores, ut, quae dederim bona, animo benevolo accipiant, quae posuerim mala, indulgenter emendent, oro rogoque. Quae a typothetis peccata sunt, in commentario critico corrigentur, quum plagulas typis expressas nondum viderim omnes. Dabam Gripesvoldiae cal. octobr. anni mdcccxlvii.

**Io. Godofr. Lud. Kosegarten.**

अथ

पञ्चतन्त्रकं नाम नीतिशास्त्रं ॥

श्रीगणेशाय नमः ॥

ब्रह्मा रुद्रः कुमारो हरिवरुणयमा वह्निरिन्द्रः कुबेर
श्चन्द्रादित्यौ सरस्वत्युदधिघननगा वायुरुर्वी भुजङ्गाः ।
सिद्धा नद्यो ऽश्विनौ श्रीर्दितिरदितिसुता मातरश्चण्डिकाद्या
वेदास्तीर्थानि यज्ञा गणवसुमुनयः पान्तु नित्यं ग्रहाश्च ॥ १ ॥
मनवे वाचस्पतये शुक्राय पराशराय ससुताय ।
चाणक्याय च विदुषे नमो ऽस्तु नयशास्त्रकर्तृभ्यः ॥ २ ॥
सकलार्थशास्त्रसारं जगति समालोक्य विष्णुशर्मेदं ।
तन्त्रैः पञ्चभिरेतच्चकार सुमनोहरं शास्त्रं ॥ ३ ॥

तद्यथानुश्रूयते। अस्ति दाक्षिणात्ये जनपदे मिहिलारोप्यं नाम नगरं। तत्र च सकलशास्त्रकल्पद्रुमः प्रवरनृपमुकुटमणिमरीचिचयचर्चितचरणः सकलकलापारं गतो ऽमरशक्तिर्नाम राजा बभूव। तस्य च त्रयः पुत्राः परमदुर्मेधसो वसुशक्तिरुग्रशक्तिरनन्तशक्तिश्चेति बभूवुः। अथ तान् शास्त्रविमुखान् समालोक्य स राजा सचिवानाहूय प्रोवाच। भो ज्ञातमेतद्भवद्भिर्यन्ममैते पुत्राः शास्त्रविमुखा विवेकरहिताः। तदेतान् पश्यतो मम हतकण्टकमपि राज्यं न सौख्यमावहति। अथवा साध्विदमुच्यते।

अजातमृतमूर्खेभ्यो मृताजातौ सुतौ वरं ।
यतस्तौ स्वल्पदुःखाय यावज्जीवं जडो दहेत् ॥ ४ ॥

किं तया क्रियते धेन्वा या न सूते न दुग्धदा ।
को ऽर्थः पुत्रेण जातेन यो न विद्वान् न भक्तिमान् ॥ ५ ॥
वरमिह वा सुतमरणं मा मूर्खत्वं कुलप्रसूतस्य ।
येन विबुधजनमध्ये जारज इव लज्जते मनुजः ॥ ६ ॥
गुणिगणगणनारम्भे न पतति कठिनी ससम्भ्रमा यस्य ।
तेनाम्बा यदि सुतिनी वद वन्ध्या कीदृशी भवति ॥ ७ ॥
वरं गर्भस्रावो वरमृतुषु नैवाभिगमनं
वरं वन्ध्या भार्या वरमपि च कन्यैव जनिता ।
वरं जातः प्रेतो वरमपि च गर्भे स्थितिरहो
न चाविद्वान् रूपद्रविणगुणयुक्तो ऽपि तनयः ॥ ८ ॥
एकेनापि गुणवता जातिविशुद्धेन चारुकृत्येन ।
स्वकुलमलङ्कृतमखिलं मुकुटं मुक्ताफलेनेव ॥ ९ ॥

तदेतेषां बुद्धिप्रबोधनं यथा भवति। तथा केनाप्युपायेनानुष्ठीयतामिति। तत्रैकैकशः प्रोचुः। देव द्वादशभिर्वर्षैस्तावद्व्याकरणं श्रूयते। तद्यदि कथमपि ज्ञायते धर्मार्थकाममोक्षाणां दुःखेन प्रबोधनं भवति। अथ तन्मध्यगतः सुमतिर्नाम सचिवः प्राह। देव अशाश्वतो ऽयं जीवितव्यविषयः। प्रभूतकालज्ञेयानि शब्दशास्त्राणि। तत्सङ्क्षेपमात्रं किञ्चिदेतेषां प्रबोधनार्थं चिन्त्यतामिति।

उक्तं च। अनन्तपारं किल शब्दशास्त्रं स्वल्पं तथायुर्बहवश्च विघ्नाः।
सारं ततो ग्राह्यमपास्य फल्गु हंसो यथा क्षीरमिवाम्बुमध्यात् ॥१०॥

तदत्रास्ति देव विष्णुशर्मा नाम ब्राह्मणो ऽनेकशास्त्रसंसिद्धिलब्धकीर्त्तिस्तस्मै समर्पयैतान्। स नूनं द्रागेतान् प्रबुद्धान् करिष्यति। सो ऽपि तदाकर्ण्य विष्णुशर्माणमाहूय प्रोवाच। भो महाबुद्धे मदनुग्रहार्थमेतान् मदीयकुमारानर्थशास्त्रं प्रति यथा द्रागनन्यसदृशान् विदधासि तथा कार्यं। अहं त्वां शासनशतेन नियोजयिष्यामि। अथ विष्णु

शर्मा तं राजानमूचे। देव श्रूयतां मे तथ्यवचनं। नाहं विद्याविक्रयं करोमि शासनशतेनापि। एतान् पुनर्मासषट्केन यदि नीतिशास्त्रज्ञान् न करोमि। तदा स्वनामपरित्यागं करोमि। किं बहुना। श्रूयतां ममैष सिंहनादो। नाहमर्थलिप्सुर्ब्रवीमि। ममाशीतिवर्षस्य व्यावृत्तसर्वेन्द्रियार्थस्य न किञ्चिदर्थेन प्रयोजनं। किंतु त्वत्प्रार्थनासिद्ध्यर्थं सरस्वतीविनोदं करिष्यामि। तल्लिख्यतामद्यतनो दिवसो यद्यहं षण्मासाभ्यन्तरे तव पुत्रान् नयशास्त्रं प्रत्यनन्यसदृशान् न करिष्यामि ततो नार्हति मे देवो देवमार्गं सन्दर्शयितुं। अथासौ तदाकर्ण्य प्रहृष्टमनास्तांस्तस्मै सादरं समर्प्य परां निर्वृतिं जगाम। विष्णुशर्मणापि तानादाय स्वगृहं गत्वा तदर्थं मित्रभेदमित्रसम्प्राप्तिकाकोलूकीयलब्धप्रणाशापरीक्षितकरणीयानि पञ्च तन्त्राण्येतानि रचयित्वा पाठितास्ते राजपुत्राः। ते ऽपि तान्यधीत्य नरपत्यनुग्रहेण मासषट्केन यथोक्ताः संवृत्ताः। ततः प्रभृति एतत्पञ्चतन्त्रकं नाम नीतिशास्त्रं बालावबोधनार्थं भूतले प्रवृत्तं। किं बहुना।

यो ऽत्रैतत्पठति नित्यं नीतिशास्त्रं शृणोति वा।
न पराभवमाप्नोति स शक्रादपि कर्हिचित्॥ ११॥

कथामुखमेतत्

अथेदमारभ्यते मित्रभेदो नाम प्रथमं तन्त्रं। तस्यायमाद्यः श्लोकः।

वर्धमानो महान् स्नेहः सिंहगोवृषयोर्वने।
पिशुनेनातिलुब्धेन जम्बुकेन विनाशितः ॥ १ ॥

तद्यथानुश्रूयते। अस्ति दाक्षिणात्ये जनपदे मिहिलारोप्यं नाम नगरं। तत्र धर्म्मोपार्जितवृत्तिर्वर्धमानको नाम वणिक्पुत्रो बभूव। तस्य कदाचिद्रात्रौ शय्यारूढस्य चिन्ता समुत्पन्ना यत्प्रभूते ऽपि वित्ते अर्थोपायाश्चिन्तनीयाः कर्तव्याश्च।

उक्तं च यतः। न हि तद्विद्यते किंचिद्यदर्थेन न सिध्यति।
यत्नेन मतिमांस्तस्मादर्थमेकं प्रसाधयेत् ॥ २ ॥
यस्यार्थास्तस्य मित्राणि यस्यार्थास्तस्य बान्धवाः।
यस्यार्थाः स पुमाँल्लोके यस्यार्थाः स च जीवति ॥ ३ ॥
न सा विद्या न तच्छिल्पं न तद्दानं न सा कला।
अर्थार्थिभिर्न तद्धैर्यं धनिनां यन्न कीर्त्यते ॥ ४ ॥
इह लोके तु धनिनां परो ऽपि स्वजनायते।
स्वजनो ऽपि दरिद्राणां तत्क्षणात् दुर्जनायते ॥ ५ ॥
अर्थेभ्यो हि विवृद्धेभ्यः संवृत्तेभ्यो यतस्ततः।
प्रवर्तन्ते क्रियाः सर्वाः पर्वतेभ्य इवापगाः ॥ ६ ॥
पूज्यते यदपूज्यो ऽपि यदगम्यो ऽपि गम्यते।
वन्द्यते यदवन्द्यो ऽपि तत् प्रभावो धनस्य च ॥ ७ ॥
अशनादिन्द्रियाणीव स्युः कार्याण्यखिलान्यपि।

एतस्मात् कारणाद्वित्तं सर्वसाधनमुच्यते ॥ ८॥
अर्थार्थी जीवलोको ऽयं श्मशानमपि सेवते ।
जनितारमपि त्यक्त्वा निःस्वं गच्छन्ति दूरतः ॥ ९॥
उपायानां च सर्वेषामुपायः पण्यसम्भवः ।
धनार्थं शस्यते यो ऽन्य उपायः संशयात्मकः ॥१०॥
गतवयसामपि पुंसां येषामर्था भवन्ति ते तरुणाः ।
अर्थेन तु ये हीना वृद्धास्ते यौवने ऽपि स्युः ॥११॥

स चार्थः पुरुषाणां षड्भिरुपायैर्भवति। अथ भिक्षया नृपसेवया कृषिकर्मणा वा विद्योपार्जनेन वा व्यवहारेण वा बणिक्कर्मणा वा। सर्वेषामप्येतेषां बाणिज्येनातिरस्कृतो ऽर्थलाभः स्यात् ।

उक्तं च यतः। कृता भिक्षा रङ्कैर्वितरति नृपो नोचितमहो
कृषिः क्लिष्टा विद्या गुरुविनयवृत्त्यातिविषमा ।
कुसीदाद्दारिद्र्यं परकरगतग्रन्थकरणां
न मन्ये बाणिज्यात् किमपि परं वर्तनमिह ॥१२॥

तच्च बाणिज्यं सप्तविधं वित्तागमाय स्यात्। तद्यथा कूटतुलामानं मिथ्याक्रयकथनं निक्षेपप्रवेशः परिचितग्राहकागमो गोष्ठिककर्म च गान्धिकव्यवहारो देशान्तरभाण्डानयनं चेति।

उक्तं च यतः। पूर्णापूर्णे माने परिचितजनवञ्चनं तथा नित्यं ।
मिथ्याक्रयस्य कथनं प्रकृतिरियं स्यात् किरातानां॥१३॥
गोष्ठिककर्मनियुक्तः श्रेष्ठी चिन्तयति चेतसा हृष्टः ।
वसुधा वसुसम्पूर्णा मयाद्य लब्धा किमन्येन ॥१४॥
बणिगालोक्य निजे हृदि सोत्साहं परिचितग्रहीतारं।
हृष्यति तद्धनलुब्धो यद्वत् पुत्रेण जातेन ॥१५॥

तथा च। निक्षेपे पतिते हर्म्ये श्रेष्ठी स्तौति स्वदेवतां ।
तदीशो म्रियतामाशु तुभ्यं दास्यामि याचितं ॥१६॥

पण्यानां गान्धिकं पण्यं किमन्यैः काञ्चनादिकैः ।
एकेकेन च यत् क्रीतं तच्छतेन प्रदीयते ॥ १७ ॥

तच्च दरिद्राणां चार्थे न वित्तवतां ।

उक्तं च यतः । येषां स्याद्विपुलं वित्तं प्रोद्भूतैरपि दूरतः ।
ते ऽर्थैरर्थान्निबध्नन्ति गजैरिव महागजान् ॥ १८ ॥
द्विगुणं त्रिगुणं वित्तं भाण्डक्रयविचक्षणाः ।
प्राप्नुवन्त्युद्यमाल्लोका दूरदेशान्तरं गताः ॥ १९ ॥

अन्यच्च । सुभीताः परदेशस्य बह्वालस्याः प्रमादिनः ।
स्वदेशे निधनं यान्ति काकाः कापुरुषा मृगाः ॥ २० ॥

उक्तं च नीतौ । यो न निर्गत्य निःशेषामालोकयति मेदिनीं ।
अनेकाश्चर्यसम्पूर्णां स नरः कूपदर्दुरः ॥ २१ ॥
को ऽतिभारः समर्थानां किं दूरं व्यवसायिनां ।
को विदेशः सविद्यानां कः परः प्रियवादिनां ॥ २२ ॥

इत्येवं हृदये सम्प्रधार्य मथुरागामीनि सारभाण्डान्यादाय शुभे तिथौ गुरुजनानुज्ञातः शकटारूढः प्रस्थितः । तस्य मङ्गलवृषभौ गृहोत्पन्नौ नन्दकसञ्जीवकनामानावग्रधुरायां वोढारौ यौ स्थितौ । तयोरेकः सञ्जीवकाभिधानो यमुनाकच्छमासाद्य पङ्कपरिगलितचरणभङ्गं कृत्वा निषसाद । अथ तं तदवस्थं समालोक्य वर्धमानकः परं विषादमगमत् । तदर्थं च त्रिरात्रं स्नेहार्द्रहृदयः प्रयाणभङ्गमकरोत् । अथ तं विषण्णमालोक्य सार्थिकैरभिहितं । भो श्रेष्ठिन् किमेवमेकवृषभकृते सिंहव्याघ्रसमाकुले बह्वपाये वने ऽस्मिन् समस्तसार्थस्त्वया सन्देहे नियोजितः ।

उक्तं च । न स्वल्पस्य कृते भूरि नाशयेन्मतिमान्नरः ।
एतदेवात्र पाण्डित्यं यत् स्वल्पाद्भूरिरक्षणं ॥ २३ ॥

अथासौ तदवधार्य सञ्जीवकस्य रक्षापुरुषान्निरूप्य शेषसार्थरक्षार्थं प्रस्थितः । अथ ते रक्षका बह्वपायं वनं विदित्वा सञ्जीवकं परित्यज्य

पृष्ठतो गत्वा अन्वेयुस्तं सार्थवाहं मिथ्योचुः। स्वामिन् मृतो ऽसौ सञ्जीवको ऽस्माभिस्तु वह्निना संस्कृत इति। तच्छ्रुत्वा सार्थवाहः कृतज्ञतया स्नेहार्द्रहृदयस्तस्यौर्ध्वदेहिकाः क्रिया वृषोत्सर्गादिकाः सर्वाश्चकार। सञ्जीवको ऽप्यायुःशेषतया यमुनासलिलवनमिश्रैः शिशिरतरैर्वायुभिराप्यायितशरीरः कथञ्चिदुत्थाय यमुनातटमुपपेदे। तत्र च मरकतसदृशानि शस्याग्राणि भक्षमाणः कतिपयैरहोभिर्हरवृषभ इव पीनककुद्मान् बलवांश्च संवृत्तः प्रत्यहं वल्मीकशिखराणि शृङ्गाभ्यां विदारयन् गर्जमान आस्ते। साधु चेदमुच्यते।

अरक्षितं तिष्ठति दैवरक्षितं सुरक्षितं दैवहतं विनश्यति।
जीवत्यनाथो ऽपि वने विसर्जितः कृतप्रयत्नो ऽपि गृहे न जीवति॥२४॥

अथ कदाचित् पिङ्गलको नाम सिंहः सर्वमृगपरिवृतः पिपासाकुल उदकपानार्थं यमुनातटमवतीर्णः सञ्जीवकस्य गम्भीरतररावं दूरादेवाशृणोत्। तच्छ्रुत्वातीवव्याकुलहृदयो वेगेन साध्वसाकारं प्रच्छाद्य वटतले चतुर्मण्डलावस्थानेनावस्थितः। आह च। चतुर्मण्डलावस्थानं नाम सिंहस्य। सिंहानुयायिनः काकरुकाः किंवृत्ताश्चेति। तथा च।

नाभिषेको न संस्कारः सिंहस्य क्रियते मृगैः।
विक्रमार्जितवित्तस्य स्वयमेव मृगेन्द्रता॥२५॥

अथ तस्य करटकदमनकनामानौ द्वौ शृगालौ मन्त्रिपुत्रौ भ्रष्टाधिकारौ सदानुयायिनावास्तां। तौ च परस्परं मन्त्रयतः। तत्र दमनको ऽब्रवीत्। भद्र करटक अयं तावदस्मत्स्वामी पिङ्गलक उदकग्रहणार्थं यमुनाकच्छमवतीर्य स्थितः। स किन्निमित्तं पिपासाकुलो ऽपि निवृत्य व्यूहरचनां विधाय दौर्मनस्येनाभिभूतो ऽत्र वटतले व्यवस्थितः। करटक आह। भद्र किमावयोरनेन मिथ्याव्यापारेण प्रयोजनं।

उक्तं च यतः। अव्यापारेषु व्यापारं यो नरः कर्तुमिच्छति।

स एव निधनं याति कीलोत्पाटीव वानरः ॥२६॥

दमनक आह। कथमेतत्। सो ऽब्रवीत्।

कथा ॥१॥ अस्ति कस्मिंश्चिदधिष्ठाने नगराभ्यासे केनापि वणिक्पुत्रेण तरुषण्डमध्ये देवायतनं कर्तुमारब्धं। तत्र च ये कर्मकराः स्थपत्यादयस्ते मध्याह्नवेलायामाहारार्थं नगरमध्यं गच्छन्ति। अथ कदाचित् तत्रानुषङ्गिकं वानरयूथमितश्चेतश्च परिभ्रममाणमागच्छत्। तत्रैकस्य शिल्पिनो ऽर्द्धपाटितो ऽञ्जनवृक्षदारुमयस्तम्भः खदिरकीलकेन मध्यनिहितेन तिष्ठति। एतस्मिन्नन्तरे ते वानरास्तरुशिखरप्रासादशृङ्गदारुपर्यन्तेषु यथेष्टं क्रीडितुमारब्धाः। एकश्च तेषां प्रत्यासन्नमृत्युश्चापल्यात् तस्मिन्नर्द्धपाटितस्तम्भ उपविश्य दारुबन्धनरज्जुं प्रक्षिप्येदमाह। अहो केनाप्यस्थाने कीलको निहित इति। पाणिभ्यां सङ्गृह्योत्पाटयितुमारम्भमकरोत्। अथ तस्य स्तम्भविवरगतवृषणस्य स्थानाच्चलितेन कीलकेन यद्वृत्तं तत् तव प्रागेव निवेदितं। तेनाहमेतद्ब्रवीमि। अव्यापारेषु व्यापारमिति। अपरमावयोर्भक्षितशेषमहोरात्रमस्त्येव तत् किमनेन व्यापारेण। दमनक आह। तत् किं भवानाहारार्थी केवलमेतन्न युक्तं।

उक्तं च यतः। सुहृदामुपकारकारणात् द्विषतामप्यपकारकारणात्।
नृपसंश्रय इष्यते बुधैर्जठरं को न बिभर्ति केवलं॥२७॥

अपिच। यस्मिन् जीवति जीवन्ति बहवः सो ऽत्र जीवतु।
वयांसि किं न कुर्वन्ति चञ्च्वा स्वोदरपूरणं॥२८॥

तथा च। यज्जीव्यते क्षणमपि प्रथितं मनुष्यै
र्विज्ञानशौर्यविभवार्यगुणैः समेतं।
तत्तेषु जीवितफलं प्रवदन्ति तज्ज्ञाः
काको ऽपि जीवति चिरं च बलिं च भुङ्क्ते॥२९॥

यो नात्मना न च परेण च बन्धुवर्गे
दीने दयां न कुरुते न च मर्त्यवर्गे।

किं तस्य जीवितफलं हि मनुष्यलोके
काको ऽपि जीवति चिरं च बलिं च भुङ्क्ते ॥३०॥
सुपूरा वै कुनदिका सुपूरो मूषिकाञ्जलिः ।
सुसन्तुष्टः कापुरुषः स्वल्पकेनापि तुष्यति ॥३१॥

अन्यच्च । किं तेन जातु जातेन मातुर्यौवनहारिणा ।
आरोहति न यः स्वस्य वंशस्याग्रे ध्वजो यथा ॥३२॥
परिवर्तिनि संसारे मृतो वा को न जायते ।
जातस्तु गण्यते सो ऽत्र यः स्फुरेच्च श्रियाधिकः ॥३३॥
जातस्य नदीकूले तस्य तृणस्यापि जन्म कल्याणं ।
यत् सलिलमज्जनाकुलजनहस्तालम्बनं भवति ॥३४॥

तथा च । स्तिमितोन्नतिसम्भारा जनसन्तापहारिणः ।
जायन्ते विरला लोके जलदा इव सज्जनाः ॥३५॥

अपिच । निरतिशयं गरिमाणं तेन जनन्याः स्मरन्ति विद्वांसः ।
यत् कमपि वहति गर्भं महतामपि यो गुरुर्भवति ॥३६॥

अन्यच्च । अप्रकटीकृतशक्तिः शक्तो ऽपि जनात् तिरस्क्रियां लभते ।
निवसन्नन्तर्दारुणि लङ्घ्यो वह्निर्न तु ज्वलितः ॥३७॥

करटक आह । आवां तावदप्रधानौ । तत् किमावयोरनेन व्यापारेण । उक्तं च ।

अपृष्टो ऽत्र प्रधानो यो ब्रूते राज्ञः पुरः कुधीः ।
न केवलमसन्मानं लभते च विडम्बनं ॥३८॥

तथा च । वचस्तत्र प्रयोक्तव्यं यत्रोक्तं लभते फलं ।
स्थायि भवति चात्यन्तं रागः शुक्लपटे यथा ॥३९॥

दमनक आह । भ्रातर्मैवं वद । उक्तं च ।

अप्रधानः प्रधानः स्यात् सेवते यदि पार्थिवं ।
प्रधानो ऽप्यप्रधानः स्याद्यदि सेवाविवर्जितः ॥४०॥

तथा च। आसन्नमेव नृपतिर्भजते मनुष्यं
विद्याविहीनमकुलीनमसंस्तुतं वा।
प्रायेण भूमिपतयः प्रमदा लताश्च
यत्पार्श्वतो भवति तत्परिवेष्टयन्ति ॥४१॥

तथा च। कोपप्रसादवस्तूनि ये विचिन्वन्ति सेवकाः।
आरोहन्ति शनैः पश्चात् धुन्वन्तमपि पार्थिवं ॥४२॥
विद्यावतां महेच्छानां शिल्पविक्रमशालिनां।
सेवावृत्तिविदां चैव नाश्रयः पार्थिवं विना ॥४३॥
ये जात्यादिमहोत्साहान्नरेन्द्रान्नोपयान्ति च।
तेषामामरणं भिक्षा प्रायश्चित्तं विनिर्मितं ॥४४॥
ये च प्राहुर्दुरात्मानो दुराराध्या महीभुजः।
प्रमादालस्यजाड्यानि ख्यापितानि निजानि तैः ॥४५॥
सर्पान् व्याघ्रान् गजान् सिंहान् दृष्ट्वोपायैर्वशीकृतान्।
राजेति कियती मात्रा धीमतामप्रमादिनां ॥४६॥
राजानमेव संश्रित्य विद्वान् याति परां गतिं।
विना मलयमन्यत्र चन्दनं न विवर्धते ॥४७॥
धवलान्यातपत्राणि वाजिनश्च मनोरमाः।
सदामदाश्च मातङ्गाः प्रसन्ने सति भूपतौ ॥४८॥

करटक आह। अथ भवान् किं कर्तुमनाः। सो ऽब्रवीत्। अयमस्मत्स्वामी पिङ्गलको नाम भीतपरिवारः। तदेनं गत्वा भयकारणं विज्ञाय सन्धिविग्रहयानासनसंश्रयद्वैधीभावानामेकतमेन संविधास्ये। करटक आह। कथं वेत्ति भवान् यद्भयाविष्टो ऽयं स्वामी। सो ऽब्रवीत्। किमत्र ज्ञेयं। उक्तं च यतः।

उदीरितो ऽर्थः पशुनापि गृह्यते हयाश्च नागाश्च वहन्ति चोदिताः।
अनुक्तमप्यूहति पण्डितो जनः परेङ्गितज्ञानफला हि बुद्धयः ॥४९॥

तथा च। आकारैरिङ्गितैर्गत्या चेष्टया भाषणेन च।
नेत्रवक्त्रविकारैश्च गृह्यते ऽन्तर्गतं मनः ॥५०॥

तत् तावदेनं भयाकुलं प्राप्य निर्भयं कृत्वा स्वबुद्धिप्रभावेन वशीकृत्य निजां साचिव्यपदवीं समासादयिष्यामि। करटक आह। अनभिज्ञो भवान् सेवाधर्मस्य। तत् कथमेनं वशीकरिष्यसि। सो ऽब्रवीत्। कथमहं सेवानभिज्ञः। मयाहि तातोत्सङ्गे क्रीडताभ्यागतसाधूनां नीतिशास्त्रं पठतां यच्छ्रुतं सेवाधर्मस्य सारभूतं हृदि स्थापितं। श्रूयतां तच्चेदं।

सुवर्णपुष्पितां पृथ्वीं विचिन्वन्ति नरास्त्रयः।
शूरश्च कृतविद्यश्च यश्च जानाति सेवितुं ॥५१॥
सा सेवा या प्रभुहिता ग्राह्यवाक्या विशेषतः।
आश्रयेत् पार्थिवं विद्वान् तद्द्वारेणैव नान्यथा ॥५२॥
यो न वेत्ति गुणान् यस्य न तं सेवेत पण्डितः।
न हि तस्मात् फलं किञ्चित् सुकृष्टादूषरादिव ॥५३॥
द्रव्यप्रकृतिहीनो ऽपि सेव्यः सेव्यगुणान्वितः।
भवत्याजीवनं तस्मात् फलं कालान्तरादपि ॥५४॥
अपि स्थाणुवदासीनः शुष्यन् परिगतः क्षुधा।
अर्थैरेवात्मसम्पन्नां वृत्तिमीहेत पण्डितः ॥५५॥
सेवकः स्वामिनं द्वेष्टि कृपणं परुषाक्षरं।
आत्मानं किं न स द्वेष्टि सेव्यासेव्यं न वेत्ति यः ॥५६॥
यमाश्रित्य न विश्रामं क्षुधार्त्ता यान्ति सेवकाः।
सो ऽर्कवन्नृपतिस्त्याज्यः सदापुष्पफलो ऽपि सन् ॥५७॥
राजमातरि देव्यां च कुमारे मुख्यमन्त्रिणि।
पुरोहिते प्रतीहारे सदा वर्तेत राजवत् ॥५८॥
जीवेति प्रब्रुवन् प्रोक्तः कृत्याकृत्यविचक्षणः।

करोति निर्विकल्पं यः स भवेद्राजवल्लभः ॥५९॥
प्रभुप्रसादजं वित्तं सुपात्रे यो नियोजयेत् ।
वस्त्राद्यं च दधात्यङ्गे स भवेद्राजवल्लभः ॥६०॥
अन्तःपुरचरैः सार्द्धं यो न मन्त्रं समाचरेत् ।
न कलत्रैर्नरेन्द्रस्य स भवेद्राजवल्लभः ॥६१॥
द्यूतं यो यमदूताभं हालां हालहलोपमां ।
पश्येद्दारान् वृथाकारान् स भवेद्राजवल्लभः ॥६२॥
युद्धकाले ऽग्रगो यः स्यात् सदा पृष्ठानुगः पुरे ।
प्रभुद्वाराश्रितो हर्म्ये स भवेद्राजवल्लभः ॥६३॥
प्रोक्तः प्रत्युत्तरं नाह विरुद्धं प्रभुणा च यः ।
न समीपे हसत्युच्चैः स भवेद्राजवल्लभः ॥६४॥
सम्मतो ऽहं विभोर्नित्यमिति मत्वा व्यतिक्रमेत् ।
कृच्छ्रेष्वपि न मर्यादां स भवेद्राजवल्लभः ॥६५॥
द्वेषिद्वेषपरो नित्यमिष्टानामिष्टकर्मकृत् ।
यो नरो नरनाथस्य स भवेद्राजवल्लभः ॥६६॥
यो रणं शरणं तद्वन्मन्यते भयवर्जितः ।
प्रवासं स्वपुरावासं स भवेद्राजवल्लभः ॥६७॥
न कुर्यान्नरनाथस्य योषिद्भिः सह सङ्गतिं ।
न निन्दां न विवादं च स भवेद्राजवल्लभः ॥६८॥

करटक आह । अथ भवांस्तत्र गत्वा किं तावत् प्रथमं वक्ष्यति तत् तावदुच्यतां । सो ऽब्रवीत् । उक्तं च ।

उत्तरादुत्तरं वाक्यं वदतां सम्प्रजायते ।
सुवृष्टिगुणसम्पन्नाद्बीजाद्बीजमिवापरं ॥६९॥

अपिच । अपायसन्दर्शनजां विपत्तिमुपायसन्दर्शनजां च सिद्धिं ।
मेधाविनो नीतिगुणप्रयुक्तां पुरःस्फुरन्तीमिव वर्णयन्ति ॥७०॥

एकेषां वाचि शुकवदन्येषां हृदि मूकवत् ।
हृदि वाचि तथान्येषां वल्गु वल्गन्ति सूरयः ॥ ७१ ॥

करटक आह ।

दुराराध्या हि राजानः पर्वता इव सर्वदा ।
व्यालाकीर्णाः सुविषमाः कठिना दुष्टसेविताः ॥ ७२ ॥

तथा च । भोगिनः कञ्चुकाविष्टाः कुटिलाः क्रूरचेष्टिताः ।
सुहृद्घ्ना मन्त्रसाध्याश्च राजानः पन्नगा इव ॥ ७३ ॥

तथा च । द्विजिह्वाः क्रूरकर्माणो निष्ठाच्छिद्रानुसारिणः ।
दूरतो ऽपि हि पश्यन्ति राजानो भुजगा इव ॥ ७४ ॥

स्वल्पमप्यपकुर्वन्ति ये ऽभीष्टा हि महीपतेः ।
ते वह्नाविव दह्यन्ते पतङ्गाः पापचेतसः ॥ ७५ ॥

दुरारोहं पदं राज्ञां सर्वलोकनमस्कृतं ।
स्वल्पेनाप्यपकारेण ब्राह्मण्यमिव दुष्यति ॥ ७६ ॥

दुराराध्याः श्रियो राज्ञां दुरापा दुष्परिग्रहाः ।
तिष्ठन्त्याप इवाधारे चिरमात्मनि संस्थिते ॥ ७७ ॥

दमनक आह । सत्यमेतत् । परं किन्तु ।

यस्य यस्य हि यो भावस्तेन तेन समाचरेत् ।
अनुप्रविश्य मेधावी क्षिप्रमात्मवशं नयेत् ॥ ७८ ॥

भर्तुश्चित्तानुवर्तित्वं सुवृत्तं चानुजीविनां ।
राक्षसाश्चापि गृह्यन्ते नित्यं छन्दानुवर्तिभिः ॥ ७९ ॥

अरुषि नृपे स्तुतिवचनं तदभिमते प्रेम तद्द्विषि द्वेषः ।
तद्दानस्य च शंसा अमन्त्रतन्त्रं वशीकरणं ॥ ८० ॥

करटक आह । यद्येवमभिमतं तर्हि शिवास्ते पन्थानो भवन्तु । यथाभिलषितमनुष्ठीयतां । सो ऽपि तं प्रणम्य पिङ्गलकाभिमुखं प्रतस्थे । अथागच्छन्तं दमनकमवलोक्य पिङ्गलको द्वारस्थमब्रवीत् । अपसार्यतां

वेत्रलता। अयमस्माकं चिरन्तनो मन्त्रिपुत्रो दमनको ऽव्याहतप्रवेशः। तत् प्रवेश्यतां द्वितीयमण्डलभागीति। स आह। यथावादीत् भवानिति। अथोपसृत्य दमनको निर्दिष्ट आसने पिङ्गलकं प्रणम्योपविष्टः। स तु तस्य नखकुलिशालङ्कृतं दक्षिणं पाणिमुपरि कृत्वा मानपुरःसरमुवाच। अपि शिवं भवतः। कस्माच्चिराद् दृश्यसे। दमनक आह। न किञ्चिद्देवपादानामस्माभिः प्रयोजनमस्ति। परं भवतामपि प्राप्तकालं वक्तव्यं। यत उत्तममध्यमकनीयोभिरपि राज्ञां सदैव प्रयोजनं विद्यते। उक्तं च यतः।

दन्तस्य निष्कोषणकेन नित्यं कर्णस्य कण्डूयनकेन वापि।
तृणेन कार्यं भवतीश्वराणां किमङ्गवाग्घस्तवता नरेण ॥ ८१॥

तथा वयं देवपादानामन्वयागता भृत्याः। आपत्स्वपि पृष्ठानुगामिनो यद्यपि स्वमधिकारं न लभामहे। तथापि देवपादानामेतद्युक्तं न भवति। उक्तं च।

स्थानेष्वेव नियोज्यानि भृत्याश्चाभरणानि च।
न हि चूडामणिः पादे प्रभावानिति बध्यते ॥ ८२॥
अनभिज्ञो गुणानां यो न भृत्यैरनुगम्यते।
धनाढ्यो ऽपि कुलीनो ऽपि क्रमायातो ऽपि भूपतिः ॥ ८३॥

तथा च। असमैः समीयमानः समैश्च परिहीयमानसत्कारः।
धुरि यो न युज्यमानस्त्रिभिरर्थपतिं त्यजति भृत्यः ॥ ८४॥

यश्चाविवेकतया राजा भृत्यानुत्तमपदयोज्यान् हीनाधमस्थाने नियोजयति। ते च तत्रैव तिष्ठन्ति। स भूपतेर्दोषो न तेषां। उक्तं च।

कनकभूषणसङ्ग्रहणोचितो यदि मणिस्त्रपुणि प्रतिबध्यते।
न स विरौति न चाप्युपशोभते भवति योजयितुर्वचनीयता ॥ ८५॥

यच्च स्वाम्येवं वदति चिराद् दृश्यसे। तदपि श्रूयतां। तथा चोक्तं।

सव्यदक्षिणयोर्यत्र विशेषो नास्ति हस्तयोः।

कस्तत्र क्षणमप्यार्यो विद्यमानमतिर्वसेत् ॥ ८६ ॥
काचो मणिर्मणिः काचो येषां बुद्धिर्विकल्पते ।
न तेषां सन्निधौ भृत्यो नाममात्रो ऽपि तिष्ठति ॥ ८७ ॥
परीक्षका यत्र न सन्ति देशे नार्घन्ति रत्नानि समुद्रजानि ।
आभीरदेशे किल चन्द्रकान्तं त्रिभिर्वराटैः विपणन्ति गोपाः ॥ ८८ ॥
लोहिताख्यस्य च मणेः पद्मरागस्य चान्तरं ।
यत्र नास्ति कथं तत्र क्रियते रत्नविक्रयः ॥ ८९ ॥
निर्विशेषं यदा स्वामी समं भृत्येषु वर्तते ।
तदोद्यमसमर्थानामुत्साहः परिहीयते ॥ ९० ॥
न विना पार्थिवो भृत्यैर्न भृत्याः पार्थिवं विना ।
तेषां च व्यवहारो ऽयं परस्परनिबन्धनः ॥ ९१ ॥
भृत्यैर्विना स्वयं राजा लोकानुग्रहकारिभिः ।
मयूखैरिव दीप्तांशुस्तेजस्व्यपि न शोभते ॥ ९२ ॥
अरैः सन्धार्यते नाभिर्नाभौ चाराः प्रतिष्ठिताः ।
स्वामिसेवकयोरेवं वृत्तिचक्रं प्रवर्तते ॥ ९३ ॥
शिरसा विधृता नित्यं स्नेहेन परिपालिताः ।
केशा अपि विरज्यन्ते निःस्नेहाः किं न सेवकाः ॥ ९४ ॥
राजा तुष्टो हि भृत्यानामर्थमात्रं प्रयच्छति ।
ते तु सन्मानमात्रेण प्राणैरप्युपकुर्वते ॥ ९५ ॥
एवं ज्ञात्वा नरेन्द्रेण भृत्याः कार्या विचक्षणाः ।
कुलीनाः शौर्यसम्पन्नाः शक्ता भक्ताः क्रमागताः ॥ ९६ ॥
यः कृत्वा सुकृतं राज्ञो दुष्करं हितमुत्तमं ।
लज्जया वक्ति नो किञ्चित्तेन राजा सहायवान् ॥ ९७ ॥
यो ऽनाहूतः समभ्येति द्वारि तिष्ठति सर्वदा ।
पृष्टः सत्यं मितं ब्रूते स भृत्यो ऽर्हो महीभुजां ॥ ९८ ॥

अनादिष्टो ऽपि भूपस्य दृष्ट्वा हानिकरं च यः ।
यतते तस्य नाशाय स भृत्यो ऽर्हो महीभुजां ॥ ९९ ॥
ताडितो ऽपि दुरुक्तो ऽपि दण्डितो ऽपि महीभुजा ।
यो न चिन्तयते पापं स भृत्यो ऽर्हो महीभुजां ॥ १०० ॥
न गर्वं कुरुते माने नापमानेन तप्यते ।
स्वाकारं रक्षयेद्यस्तु स भृत्यो ऽर्हो महीभुजां ॥ १०१ ॥
न क्षुधा पीड्यते यस्तु निद्रया न हि कर्हिचित् ।
न च शीतातपाद्यैश्च स भृत्यो ऽर्हो महीभुजां ॥ १०२ ॥
श्रुत्वा साङ्ग्रामिकीं वार्तां भविष्यां स्वामिनं प्रति ।
प्रसन्नास्यो भवेद्यस्तु स भृत्यो ऽर्हो महीभुजां ॥ १०३ ॥
सीमा वृद्धिं समायाति शुक्लपक्षे यथेन्दुराट् ।
नियोगसंस्थिते यस्मिन् स भृत्यो ऽर्हो महीभुजां ॥ १०४ ॥
सीमा सङ्कोचमायाति वह्नौ चर्म यथा धृतं ।
स्थिते यस्मिन् स तु त्याज्यो भृत्यो राज्यं समीहता ॥ १०५ ॥
यस्मिन् कृत्यं समावेश्य निर्विशङ्केन चेतसा ।
आस्यते सेवकः स स्यात् कलत्रमिव चापरं ॥ १०६ ॥

तथा शृगालो ऽयमिति मन्यमानेन ममोपरि यत स्वामिनावज्ञा क्रियते तदप्ययुक्तं । उक्तं च यतः ।

कौशेयं कृमिजं सुवर्णमुपलाद्दूर्वापि गोलोमतः
पङ्कात्तामरसं शशाङ्क उदधेरिन्दीवरं गोमयात् ।
काष्ठादग्निरहेः फणादपि मणिर्गोपित्ततो रोचना
प्राकाश्यं स्वगुणोदयेन गुणिनो गच्छन्ति किं जन्मना ॥ १०७ ॥
एरण्डभिण्डार्कनलैः प्रभूतैरपि सञ्चितैः ।
दारुकृत्यं यथा नास्ति तथैवाज्ञैः प्रयोजनं ॥ १०८ ॥
मूषिका गृहजातापि हन्तव्या सापकारिणी ।

उपप्रदानैर्मार्जारो हितकृत् प्रार्थ्यते ऽन्यतः ॥ १०९ ॥
किं भक्तेनासमर्थेन किं शक्तेनापकारिणा ।
भक्तं शक्तं च मां राजन्नावज्ञातुं त्वमर्हसि ॥ ११० ॥

पिङ्गलक आह । भवत्वेवं । तावदसमर्थः समर्थो वा चिरन्तनस्त्वमस्माकं मन्त्रिपुत्रः । तद्विश्रब्धं ब्रूहि यत् किंचिद्वक्तुकामः । दमनक आह । देव विज्ञाप्यं किंचिदस्ति । पिङ्गलक आह । तन्निवेदयाभिप्रेतं । सो ऽब्रवीत् ।

अपि स्वल्पतरं कार्यं यद्भवेत् पृथिवीपतेः ।
तन्न वाच्यं सभामध्ये प्रोवाचेदं बृहस्पतिः ॥ १११ ॥

तदेकान्ते मद्विज्ञाप्यमाकर्णयन्तु देवपादाः । यतः ।

षट्कर्णो भिद्यते मन्त्रश्चतुष्कर्णः स्थिरो भवेत् ।
तस्मात् सर्वप्रयत्नेन षट्कर्णं वर्जयेत् सुधीः ॥ ११२ ॥

अथानन्तरं पिङ्गलकाभिप्रायज्ञैर्व्याघ्रद्वीपिवृकपुरःसरैः सर्वैरपि तद्वचः समाकर्ण्य संसदि तत्क्षणादेव दूरीभूतं । ततश्च दमनक आह । उदकग्रहणार्थं प्रवृत्तस्य स्वामिनः किमिह निवृत्यावस्थानं । पिङ्गलक आह सविलक्षस्मितं । न किंचित् । सो ऽब्रवीत् । देव यद्यनाख्येयं तत्तिष्ठतु । उक्तं च ।

दारेषु किंचित् पुरुषेषु किंचिद्गोप्यं वयस्येषु सुतेषु किंचित् ।
युक्तं न वा युक्तमिदं विचिन्त्य वदेद्विपश्चिन्महतो ऽनुरोधात् ॥ ११३ ॥

तच्छ्रुत्वा पिङ्गलकश्चिन्तयामास । योग्यो ऽयं दृश्यते । तत् कथयाम्येतस्यात्मनो ऽभिप्रायं । उक्तं च ।

सुहृदि निरन्तरचित्ते गुणवति भृत्ये ऽनुवर्तिनि कलत्रे ।
स्वामिनि सौहृदयुक्ते निवेद्य दुःखं सुखी भवति ॥ ११४ ॥

भो दमनक शृणोषि शब्दं दूरान्महान्तं । सो ऽब्रवीत् । स्वामिन् शृणोमि । तत् किं । पिङ्गलक आह । भद्राहमस्माद्वनाद्गन्तुमिच्छामि ।

दमनक ग्राह। कस्मात् कारणात्। पिङ्गलक ग्राह। यतो ऽस्मद्वने किञ्चिदपूर्वं सत्त्वं प्रविष्टं। यन्महान् शब्दः श्रूयते तस्य च शब्दानुरूपेण पराक्रमेण भाव्यमिति। दमनक ग्राह। यच्छब्दमात्रादपि भयमुपगतः स्वामी तदयुक्तं। उक्तं च यतः।

अम्भसा भिद्यते शैलस्तथा मन्त्रो ऽप्यरक्षितः।
पैशुन्याद्भिद्यते स्नेहो वाग्भिर्भिद्यते कातरः॥११५॥

तन्न युक्तं स्वामिनः पूर्वोपार्जितं वनं त्यक्तुं। यतो भेरीवेणुवीणामृदङ्गतालपटहशङ्खकाहलादिभेदेन शब्दा अनेकविधाः। ततो न शब्दमात्रादेव केवलं भेतव्यं।

उक्तं च। अत्युत्कटे च रौद्रे च शत्रौ यस्य न हीयते।
धैर्यं प्रति महीनाथो न स याति पराभवं॥११६॥
दर्शितभये ऽपि धातरि धैर्यध्वंसो भवेन्न धीराणां।
शोषितसरसि निदाघे नितरामेवोद्धतः सिन्धुः॥११७॥

तथा च। विपदि न यस्य विषादः सम्पदि हर्षो रणे न भीरुत्वं।
तं भुवनतिलकभूतं जनयति जननी सुतं विरलं॥११८॥
शक्तिवैकल्यनम्रस्य निःसारत्वाल्लघीयसः।
जन्मिनो मानहीनस्य तृणस्य च समा गतिः॥११९॥

अपि च। अन्यप्रतापमासाद्य यो दृढत्वं न गच्छति।
जातुषाभरणस्येव रूपेणापि हि तस्य किं॥१२०॥

तदेव ज्ञात्वा स्वामिना धैर्यावष्टम्भः कार्यः। न शब्दमात्राद्भेतव्यं। उक्तं च यतः।

पूर्वमेव मया ज्ञातं पूर्णमेतद्धि मेदसा।
यावत् प्रविश्य पश्यामि तावच्चर्म च दारु च॥१२१॥

पिङ्गलक ग्राह। कथमेतत्। सो ऽब्रवीत्।

कथा ॥२॥ एकस्मिन् प्रदेशे कश्चिद्गोमायुर्नाम शृगालः क्षुत्क्षामकण्ठ इतश्चे

तश्च परिभ्रमन् वने सैन्यद्वयसङ्ग्रामभूमिमपश्यत्। तस्यां च दुन्दुभेः पतितस्य वायुवशादुद्धतशाखाग्रैर्हन्यमानस्य शब्दमशृणोत्। अथ क्षुभितहृदयश्चिन्तयामास। अहो विनष्टो ऽस्मि। तद्यावन्नास्य प्रोच्चारितस्य दृष्टिगोचरे गच्छामि। तावदन्यतो व्रजामीति। अथवा नैतद्युज्यते सहसैव पितृपर्यायागतं वनं त्यक्तुं। उक्तं च।

भये वा यदि वा हर्षे सम्प्राप्ते यो विमर्शयेत्।
कृत्यं न कुरुते वेगान्न स संतापमाप्नुयात् ॥१२२॥

तत्तावज्जानामि कस्यायं शब्द इति। धैर्यमालम्ब्य व्यमर्शयत्। यावन्मन्दं मन्दं प्रतिगच्छति तावद्दुन्दुभिमपश्यत्। यावच्छाखाग्रैर्वायुवशाद्धन्यते तावच्छब्दं करोति। अन्यथा तूष्णीमास्ते। ततश्च सम्यक् परिज्ञाय समीपं गत्वा स्वयमेव कौतुकादताडयत्। भूयश्च हर्षादचिन्तयत्। अहो चिरादेतदस्माकं महद्भोजनमापतितं। तन्नूनमेतन्मांसमेदोऽसृग्भिः पूरितं भविष्यति। ततः परुषचर्मावगुण्ठितं कथमपि विदार्य एकदेशे छिद्रं कृत्वा संहृष्टमनाः प्रविष्टः। परं चर्म विदारयतो दंष्ट्राभङ्गः सञ्जातः। अथ तद्दारुचर्मविशेषमालोक्य निराशीभूतः श्लोकमेनमपठत्।

पूर्वमेव मया ज्ञातं पूर्णमेतद्धि मेदसा।
यावत् प्रविश्य पश्यामि तावच्चर्म च दारु च ॥१२३॥

ततो न शब्दमात्राद्भेतव्यं। पिङ्गलक आह। भो पश्यायं मम सर्वोऽपि परिग्रहो भयाद्व्याकुलमनाः पलायितुमिच्छति। तत् कथमहं धैर्यावष्टम्भं करोमि। सो ऽब्रवीत्। स्वामिन् नैषामेष दोषः। स्वामिसदृशा भवन्ति भृत्याः। उक्तं च।

अश्वः शस्त्रं शास्त्रं वाणी वीणा नरश्च नारी च।
पुरुषविशेषं प्राप्ता भवन्ति योग्या अयोग्याश्च ॥१२४॥

तत् पौरुषावष्टम्भं कृत्वा त्वं तावदत्रैव प्रतिपालय। यावदहमेतच्छब्दरूपं ज्ञात्वागच्छामि। ततः पश्चाद्यथोचितं कार्यमिति। पिङ्गलक आह।

किं तत्र भवान् गन्तुमुत्सहते। स आह। किं स्वाम्यादेशेन सुभृत्यस्य कृत्याकृत्यमस्ति। उक्तं च।

स्वाम्यादेशात् सुभृत्यस्य न भीः सञ्जायते क्वचित्।
प्रविशेद्दुर्विगाहे ऽपि दुस्तरे ऽपि महार्णवे ॥१२५॥

तथा च। स्वाम्यादिष्टस्तु यो भृत्यः समं विषममेव च।
मन्यते न स सन्धार्यो भूभुजा भूतिमिच्छता ॥१२६॥

पिङ्गलक आह। भद्र यद्येवं तद्गच्छ। शिवास्ते पन्थानो भवन्त्विति। दमनको ऽपि तं प्रणम्य सञ्जीवकशब्दानुसारी प्रतस्थे। अथ दमनके गते भयाकुलः पिङ्गलकश्चिन्तयामास। अहो न शोभनं कृतं मया। यत्तस्य विश्वासं गत्वात्माभिप्रायो निवेदितः। कदाचिद्दमनको ऽयमुभयवेतनो भूत्वा ममोपरि दुष्टबुद्धिः स्यात् भ्रष्टाधिकारत्वात्। उक्तं च।

ये भवन्ति महीपस्य सन्मानितविमानिताः।
यतन्ते तस्य नाशाय कुलीना अपि सर्वदा ॥१२७॥

तद्यावदस्य चिकीर्षितं वेद्मि तावदन्यत् स्थानान्तरं गत्वा प्रतिपालयामि। कदाचिद्दमनकस्तमादाय मां व्यापादयितुमागच्छति। उक्तं च यतः।

न बध्यन्ते ह्यविश्वस्ता बलिभिर्दुर्बला अपि।
विश्वस्तास्त्वेव बध्यन्ते बलवन्तो ऽपि दुर्बलैः ॥१२८॥
बृहस्पतेरपि प्राज्ञो न विश्वासे व्रजेन्नरः।
य इच्छेदात्मनो वृद्धिमायुष्यं च सुखानि च ॥१२९॥
शपथैः सन्धितस्यापि न विश्वासं व्रजेद्रिपोः।
राज्यलाभोद्यतो वृत्रः शक्रेण शपथैर्हतः ॥१३०॥
न विश्वासं विना शत्रुर्देवानामपि सिध्यति।
विश्वासात् त्रिदशेन्द्रेण दितेर्गर्भो विदारितः ॥१३१॥

एवं सम्प्रधार्य स्थानान्तरं गत्वा दमनकमार्गमवलोकयन्नेकाकी तस्थौ।

दमनको ऽपि सञ्जीवकसकाशं गत्वा वृषभो ऽयमिति परिज्ञाय हृष्टमना अचिन्तयत्। अहो शोभनमापतितं। अनेनैतस्य सन्धिविग्रहद्वारेण मम पिङ्गलको वश्यो भविष्यति। उक्तं च यतः।

न कौशलान्न सौहार्दान्नृपो वाक्ये प्रवर्तते।
मन्त्रिणां यावदभ्येति व्यसनं शोकमेव च ॥१३२॥
सदैवापद्गतो राजा भोग्यो भवति मन्त्रिणां।
अत एव हि वाञ्छन्ति मन्त्रिणः सापदं नृपं ॥१३३॥
यथा नेच्छति नीरोगः कदाचित् सुचिकित्सकं।
तथापद्रहितो राजा सचिवं नाभिवाञ्छति ॥१३४॥

एवं विचिन्तयन् पिङ्गलकाभिमुखः प्रतस्थे। पिङ्गलको ऽपि तमायान्तं प्रेक्ष्य स्वाकारं रक्षन् यथापूर्वमवस्थितः। दमनको ऽपि पिङ्गलकसकाशमागत्य प्रणम्योपविष्टः। पिङ्गलक आह। भद्र किं दृष्टं भवता तत् सत्वं। दमनक आह। दृष्टं स्वामिनः प्रसादात्। पिङ्गलक आह। अपि सत्यं। दमनक आह। किं स्वामिपादानामग्रे ऽसत्यं विज्ञाप्यते।

उक्तं च। अपि स्वल्पमसत्यं यः पुरो वदति भूभुजां।
देवानां च विनश्येत स शीघ्रं सुमहानपि ॥१३५॥
तथा च। सर्वदेवमयो राजा मनुना सम्प्रकीर्तितः।
तस्मात्तं देववत् पश्येन्न व्यलीकेन कर्हिचित् ॥१३६॥
सर्वदेवमयस्यापि विशेषो नृपतेरयं।
शुभाशुभफलं सद्यो नृपाद्देवाद्भवान्तरे ॥१३७॥

पिङ्गलक आह। अथवा सत्यं दृष्टं भविष्यति भवता। न दीनाय महान् कुप्यतीति मत्वा न त्वं तेन निपातितः। उक्तं च।

तृणानि नोन्मूलयति प्रभञ्जनो मृदूनि नीचैः प्रणतानि सर्वतः।
समुच्छ्रितानेव तरून् प्रबाधते महान् महत्स्वेव करोति विग्रहं ॥१३८॥

अपि च। गण्डस्थलस्थमदवारिषु बद्धराग

मत्तभ्रमद्भ्रमरपादतलाहतो ऽपि ।
कोपं न गच्छति नितान्तबलो ऽपि नाग
स्तुल्ये बले तु बलवान् परिकोपमेति ॥ १३९ ॥

दमनक आह । अस्त्येवं स महात्मा वयं कृपणाः । तथापि यत् स्वामी कथयति तद्भूतये तं नियोजयामि । पिङ्गलक आह । सोत्साहं किं भवान् शक्नोत्येवं कर्तुं । दमनक आह । किमसाध्यं बुद्धेरस्ति । उक्तं च । न तच्छस्त्रैर्न नागेन्द्रैर्नाश्वैश्च न पदातिभिः ।
कार्यं संसिद्धिमभ्येति यथा बुद्धिप्रसाधितं ॥ १४० ॥

पिङ्गलक आह । यद्येवं तदमात्यपदे ऽध्यारोपितस्त्वं । अद्यप्रभृति प्रसादनिग्रहादिकं त्वया विना न करिष्यामीति निश्चयः । तस्मात् सत्वरं गत्वा तथा कुरु यथा स मम भृत्यतामेति । तथासौ बाढमित्यभिधाय तं प्रणम्य भूयो ऽपि सञ्जीवकसकाशं गत्वा साक्षेपमिदमाह । एह्येहि दुष्टवृषभ पिङ्गलकस्त्वामाकारयति । किं निःशङ्को भूत्वा मुहुर्मुहुर्वृथा नदसीति । तच्छ्रुत्वा सञ्जीवको ऽब्रवीत् । भद्र को ऽयं पिङ्गलकः । तच्छ्रुत्वा सविस्मयं दमनको ऽब्रवीत् । कथं स्वामिनं पिङ्गलकमपि न जानासि । तत् क्षणं प्रतिपालय फलेनैव ज्ञास्यसीति । नन्वयं सर्वमृगपरिवृतो मण्डलवटाभ्यासे मानोन्नतचित्तः सत्वधनस्वामी पिङ्गलकाभिधानो महासिंहस्तिष्ठति । तच्छ्रुत्वा गतायुषमिवात्मानं मन्यमानः सञ्जीवकः परं विषादमगमत् । आह च । भद्र भवान् साधुसमाचारो वचनपटुश्च दृश्यते । तद्यदि मामवश्यं तत्र नयसि तदभयप्रदानेन स्वामिनः सकाशात् प्रसादः कारयितव्यः । दमनक आह । भो सत्यमभिहितं भवता । नीतिरेषा । उक्तं च ।

पर्यन्तो लभ्यते भूमिः समुद्रस्य गिरेरपि ।
न कथञ्चिन्महीपस्य चित्तान्तः केनचित् क्वचित् ॥ १४१ ॥

तत्वमत्रैव तिष्ठ यावदहं तं समये धृत्वा तत्र पश्चात्त्वामानयामीति ।

तथानुष्ठिते दमनकः पिङ्गलकसकाशं गत्वेदमाह। स्वामिन् न तत् प्राकृतं सत्त्वं। स हि भगवतो महेश्वरस्य वाहनभूतो वृषभ इति मया पृष्ट इदं प्राह। महेश्वरेणाहं परितुष्टेन कालिन्दीपरिसरे शष्पाग्राणि भक्षयितुं समादिष्टः। किं बहुना मम प्रदत्तं भगवता क्रीडार्थं वनमिदं। पिङ्गलक आह। सत्यं ज्ञातं मयाधुना। न देवताप्रसादं विना शष्पभोजिनो व्यालाकीर्ण एवंविधे वने निःशङ्का नदन्तो भ्रमन्ति। ततस्त्वया किमभिहितं। दमनक आह। स्वामिन्नेतदभिहितं मया। यदेतद्वनं चण्डिकावाहनभूतस्य मत्स्वामिनः पिङ्गलकनाम्नः सिंहस्य विषयीभूतं। तद्भवानभ्यागतः प्रियो ऽतिथिः। तत्तस्य सकाशं गत्वा भ्रातृस्नेहेनैकत्र भक्षणपानविहरणक्रियाभिरेकस्थानाश्रयेण कालो नेय इति। ततस्तेनापि सर्वमेतत् प्रतिपन्नं। उक्तं च। स्वामिनः सकाशादभयदक्षिणा दापनीया। तदत्र स्वामी प्रमाणं। तच्छ्रुत्वा पिङ्गलकः सहर्षमिदमाह। साधु सुमते साधु मन्त्रिश्रोत्रिय साधु मम हृदयेन समं सम्मन्त्र्येदमभिहितं। तद्दत्ता मया तस्याभयदक्षिणा। परं सो ऽपि मदर्थे याचयित्वा द्रुततरमानीयतामिति। अथ साधु चेदमुच्यते।

अन्तःसारैरकुटिलैर्निश्छिद्रैः सुपरीक्षितैः।
मन्त्रिभिर्धार्यते राज्यं सुस्तम्भैरिव मन्दिरं ॥१४२॥

मन्त्रिणां भिन्नसन्धाने भिषजां सान्निपातिके।
कर्मणि व्यज्यते प्रज्ञा स्वस्थे को वा न पण्डितः ॥१४३॥

दमनको ऽपि तं प्रणम्य सञ्जीवकमुद्दिश्य प्रस्थितः सहर्षमचिन्तयत्। अहो प्रसादसन्मुखो नः स्वामी। वचनवशगश्च संवृत्तः। तन्नास्ति धन्यतरो मम। उक्तं च।

अमृतं शिशिरे वह्निरमृतं प्रियदर्शनं।
अमृतं राजसन्मानममृतं सङ्गतिः सतां ॥१४४॥

अथ सञ्जीवकसकाशमासाद्य सप्रश्रयमुवाच। भो मित्र प्रसादितो ऽसौ

मया भवदर्थे स्वामी। अभयवचनं च दापितं। तद्विश्रब्धं गम्यतामिति। परं राजप्रसादमासाद्य मया सह समयधर्मेण वर्तितव्यं। न गर्वमासाद्य स्वप्रभुतया विचरणीयं। अहमपि तव सङ्केतेन सर्वराज्यधुराममात्यपदवीमाश्रित्योद्धरिष्यामि। एवं कृते सति द्वयोरपि राज्यलक्ष्मीर्भोग्या भविष्यति। यतः

आखेटकस्य धर्मेण विभवाः स्युर्वशे नृणां।
नृप्रजाः प्रेरयत्येको हन्त्यन्यो ऽत्र मृगानिव ॥१४५॥

तथा च। यो न पूजयते गर्वादुत्तमाधममध्यमान्।
भूपसन्मानमान्यो ऽपि भ्रश्यते दन्तिलो यथा ॥१४६॥

कथा ॥३॥ सञ्जीवक आह। कथमेतत्। सो ऽब्रवीत्। अस्त्यत्र धरातले वर्धमानं नाम महानगरं। तत्र दन्तिलो नाम नानाभाण्डपतिः सकलपुरनायकः प्रतिवसति स्म। तेन पुरकार्यं नृपकार्यं च कुर्वता तुष्टिं नीताः सर्वे तत्पुरवासिनो जना नृपतिश्च। किं बहुना। न को ऽपि तादृक्केनापि चतुरो दृष्टः श्रुतो वापि। अथवा साधु चेदमुच्यते।

नरपतिहितकर्ता द्वेष्यतां याति लोके
जनपदहितकर्ता त्यज्यते पार्थिवेन्द्रैः।
इति महति विरोधे वर्तमाने समाने
नृपतिजनपदानां दुर्लभः कार्यकर्ता ॥१४७॥

अथैवं तस्य वर्तमानस्य कदाचिद्विवाहः सञ्जातस्तद्गृहे। तत्र तेन सर्वे पुरनिवासिनो राजसन्निधिलोकाश्च सन्मानपूर्वमामन्त्र्य भोजिता वस्त्रादिभिः सत्कृताश्च। ततो विवाहानन्तरं राजा सान्तःपुरः स्वगृहमानीयाभ्यर्चितः। अथ तस्य नृपतेर्गृहसम्मार्जनकर्ता गोरम्भो नाम। स तेन गृहायातो ऽपि राजगुरुपुरतो ऽनुचितस्थान उपविष्टो ऽवज्ञयार्धचन्द्रं दत्वा निःसारितः। सो ऽपि तत्प्रभृति निःश्वसन्नपमानान्न रात्रावप्यधिशेते। कथं मया तस्य भाण्डपते राजप्रसादहानिः कर्तव्येत्यचि

न्यच्च। अथवा किं ममैतेन वृथाशरीरशोषणेन। यतो न किञ्चिन्मया तस्यापकर्तुं शक्यते। अथवा साध्विदमुच्यते।

यो ह्यपकर्तुमशक्तः कुप्यति किमसौ नरो ऽत्र निर्लज्जः।
उच्छलितो ऽपि हि चणको भ्राष्ट्रं भङ्क्तुं न शक्नोति ॥१४८॥

अथ कदाचित्प्रत्यूषे तस्य भूपतेर्योगनिद्रां गतस्य स शय्यान्ते सम्मार्जनं कुर्वन्निदमाह। अहो दन्तिलस्य महद्दृष्टत्वं यद्राजमहिषीं समालिङ्गति। तच्छ्रुत्वा राजा ससम्भ्रममुत्थाय तमुवाच। भो भो गोरम्भ सत्यमेतत् यत् त्वया जल्पितं। किं देवी दन्तिलेन समालिङ्गिता। गोरम्भ आह। देव रात्रिजागरणेन द्यूतासक्तस्य सम्मार्जनकर्मरतस्यापि मे बलान्निद्रा समायाता। तन्न वेद्मि मया किमभिहितं। राजा सेर्ष्यं स्वगतं। एष तावन्मम गृहे ऽप्रतिहतगतिस्तथा दन्तिलो ऽपि। तत् कदाचिदनेन देवी तेन समालिङ्ग्यमाना दृष्टा भविष्यति। तत एवानेनेदमभिहितं। उक्तं च यतः।

यद्वाञ्छति दिवा मर्त्यो वीक्षते वा करोति वा।
तत् स्वप्ने ऽपि तदभ्यासात् तथा ब्रूते करोति च ॥१४९॥

तथा च। शुभं वा यदि वा पापं यन्नृणां हृदि संस्थितं।
सुगूढमपि तज्ज्ञेयं सुप्तवाक्यात् तथा मदात् ॥१५०॥

अथवा। स्त्रीणां विषये को ऽत्र सन्देहः। उक्तं च।

जल्पन्ति सार्द्धमन्येन पश्यन्त्यन्यं सविभ्रमाः।
हृद्गतं चिन्तयन्त्यन्यं प्रियः को नाम योषितां ॥१५१॥

अन्यच्च। एकेन स्मितपाटलाधररुचो जल्पन्त्यनल्पाक्षरं।
वीक्षन्ते ऽन्यमितः स्फुटत्कुमुदिनीफुल्लोल्लसल्लोचनाः॥
दूरोदारचरित्रचित्रविभवं ध्यायन्ति चान्यं धिया।
केनेत्थं परमार्थतो ऽर्थवदिव प्रेमास्ति वामभ्रुवां ॥१५२॥

नाग्निस्तृप्यति काष्ठानां नापगानां महोदधिः।

नान्तकः सर्वभूतानां न पुंसां वामलोचनाः ॥ १५३ ॥
रहो नास्ति क्षणो नास्ति नास्ति प्रार्थयिता नरः ।
तेन नारद नारीणां सतीत्वमुपजायते ॥ १५४ ॥

तथा च । यो मोहान्मन्यते मूढो रक्तेयं मम कामिनी ।
स तस्या वशगो नित्यं भवेत् क्रीडाशकुन्तवत् ॥ १५५ ॥
तासां वाक्यानि कृत्यानि स्वल्पानि सुबहून्यपि ।
करोति यः कृतैर्लोके लघुत्वं याति सर्वतः ॥ १५६ ॥
स्त्रियं च यः प्रार्थयते सन्निकर्षं च गच्छति ।
ईषच्च कुरुते सेवां तमेवेच्छन्ति योषितः ॥ १५७ ॥
अनर्थित्वान्मनुष्याणां भयात् परिजनस्य च ।
मर्यादायाममर्यादाः स्त्रियस्तिष्ठन्ति सर्वदा ॥ १५८ ॥
नासां कश्चिदगम्यो ऽस्ति नासां च वयसि स्थितिः ।
विरूपं रूपवन्तं वा पुमानित्येव भुञ्जते ॥ १५९ ॥
रक्तो हि जायते भोग्यो नारीणां शाटको यथा ।
घृष्यते यो दशालम्बी नितम्बे विनिवेशितः ॥ १६० ॥
अलक्तको यथा रक्तो निष्पीड्यः पुरुषस्तथा ।
अबलाभिर्बलाद्रक्तः पादमूले निपात्यते ॥ १६१ ॥

एवं स राजा बहुविधं विलप्य तत्प्रभृति दन्तिलस्य प्रसादपराङ्मुखः सञ्जातः । किं बहुना । राजद्वारप्रवेशो ऽपि तस्य निवारितः । दन्तिलो ऽप्यथाकस्मादेव प्रसादपराङ्मुखमवनिपतिमवलोक्य चिन्तयामास । अहो साधु चेदमुच्यते ।

को ऽर्थान् प्राप्य न गर्वितो विषयिणः कस्यापदो ऽस्तं गताः
स्त्रीभिः कस्य न खण्डितं भुवि मनः को नाम राज्ञां प्रियः ।
कः कालस्य न गोचरान्तरगतः को ऽर्थी गतो गौरवं
को वा दुर्जनवागुरासु पतितः क्षेमेण यातः पुमान् ॥ १६२ ॥

तथा च।

काके शौचं द्यूतकारेषु सत्यं सर्पे क्षान्तिः स्त्रीषु कामोपशान्तिः।
क्लीबे धैर्यं मद्यपे तत्त्वचिन्ता राजा मित्रं केन दृष्टं श्रुतं वा ॥१६३॥

अपरं मयास्य भूपतेरन्यस्य वा कस्यचित् स्वप्ने ऽपि नानिष्टं कृतं। तत् किमेतत्। पराङ्मुखो मां प्रति भूपतिरिति। एवं दन्तिलं कदाचिद्राजद्वारविष्कम्भितमवलोक्य सम्मार्जनकर्ता राजद्वारपालान् विहस्योवाच। भो भो द्वारपाला राजप्रसादाधिष्ठितो ऽयं दन्तिलः स्वयं निग्रहानुग्रहकर्ता च। तदनेन निवारितेन यथाहं तथा यूयमप्यर्द्धचन्द्रभागिनो भविष्यथ। तच्छ्रुत्वा दन्तिलश्चिन्तितवान्। नूनं चेष्टितमस्यैतत्। अथवा साध्विदमुच्यते।

अकुलीनो ऽपि मूर्खो ऽपि भूपालं यो ऽत्र सेवते।
अपि सन्मानहीनो ऽपि स सर्वत्र प्रपूज्यते ॥१६४॥
अपि कापुरुषो भीरुः स्याच्चेन्नृपतिसेवकः।
तथापि न पराभूतिं जनादाप्नोति मानवः ॥१६५॥

एवं विलप्य स विलक्षमनाः सोद्वेगो गतप्रभावः स्वगृहं गत्वा गोरम्भमाहूय निशामुखे वस्त्रयुगलेन सम्मान्येदमुवाच। भद्र मया न तदा त्वं रागवशान्निःसारितः। यतस्त्वं ब्राह्मणानामग्रतो ऽनुचितस्थाने समुपविष्टो दृष्टो ऽसीत्यपमानितः। तत क्षम्यतां त्वया। सो ऽपि स्वर्गराज्यमिव तद्वस्त्रयुगलमासाद्य परं तोषं गत्वा तमुवाच। भो श्रेष्ठिन् क्षान्तं मया तत्। तदस्य सन्मानस्य कृते पश्य मे बुद्धिप्रभावं राजप्रसादं च। एवमुक्त्वा स परितोषं विनिर्गतः। साध्विदमुच्यते।

स्तोकेनोन्नतिमायाति स्तोकेनायात्यधोगतिं।
अहो सुसदृशी चेष्टा तुलायष्टेः खलस्य च ॥१६६॥

ततश्चान्येद्युः स गोरम्भो राजकुले गत्वा योगनिद्रां गतस्य भूपतेः सम्मार्जनक्रियां कुर्व्वन्निदमाह। अहो ऽविवेको ऽस्मद्भूपतेर्यः पुरीषोत्सर्गमाच

रंश्चिर्भटीभक्षणं करोति। तच्छ्रुत्वा राजा सविस्मयमुत्थाय तमुवाच। रे रे गोरम्भ किमप्रस्तुतं ब्रवीषि। गृहकर्मकरं मत्वा न त्वां व्यापादयामि। किं त्वया कदाचिदहमेवंविधं कर्म समाचरन् दृष्टः। सो ऽब्रवीत्। देव द्यूतासक्तस्य रात्रिजागरणेन सम्मार्जनं कुर्वाणस्य मम बलान्निद्रा समायाता। तयाधिष्ठितेन मया किं जल्पितं न वेद्मि। तत् प्रसादं करोतु स्वामी मम निद्रापरवशस्य। एवं श्रुत्वा राजा चिन्तितवान्। मया तावज्जन्मान्तरे ऽप्येवंविधं कर्म कुर्वता चिर्भटिका न भक्षिता। तद्यथायं व्यतिकरो ऽसम्भाव्यो ममानेन मूढेन व्याहृतः। तथा दन्तिलस्यापीति निश्चयः। तन्मया न युक्तं कृतं यत् स वराकः सन्मानेन वियोजितः। न तादृक्पुरुषाणामेवंविधं चेष्टितं सम्भाव्यते। तदभावेन राजकृत्यानि पौरकृत्यानि च सर्वाणि शिथिलतां व्रजन्ति। एवमनेकधा विचार्य दन्तिलं समाहूय निजाङ्गाभरणवस्त्रादिभिः संयोज्य स्वाधिकारे नियोजयामास। ततो ऽहं ब्रवीमि।

यो न पूजयते गर्वादुत्तमाधममध्यमान्।
भूपसन्मानमान्यो ऽपि भ्रश्यते दन्तिलो यथा ॥१६७॥

सञ्जीवक आह। भद्र सत्यमेतद्भवताभिहितं। तदेव तत् कर्तव्यमिति। एवमभिहिते दमनकस्तमादाय पिङ्गलकसकाशमगमत्। आह च। देव एष स मयानीतः सञ्जीवकः। अधुना देवः प्रमाणं। सञ्जीवको ऽपि तं सादरं प्रणम्याग्रतः सविनयं स्थितः। पिङ्गलको ऽपि तस्य पीनायतककुद्मतो नखकुलिशालङ्कृतं दक्षिणं पाणिमुपरि कृत्वा मानपुरःसरमुवाच। अपि भवतः शिवं। कुतस्त्वमस्मिन् वने निर्जने समायात इति। तेनात्मनः सर्वं वृत्तान्तं कथितं। यथा वर्धमानेन सह वियोगः सञ्जातस्तथा निवेदितः। एतच्च श्रुत्वा पिङ्गलकेनाभिहितं। वयस्य न भेतव्यं। मद्भुजपरिरक्षिते ऽस्मिन् वने यथेप्सितमुष्यतां। अन्यच्च। भवता मत्समीपविहारिणाजस्रं भवितव्यं। यत्कारणं बह्वपायं वन

मिदमनेकरौद्रसत्त्वनिषेवितं गुरूणामपि सत्त्वानामसेव्यं शष्पभोजिनां। एवमुक्त्वा स मृगाधिपो यमुनाकच्छमवतीर्य प्रकाममुदकपानावगाहनं कृत्वा स्वैरप्रचारं पुनर्वनं प्रविष्टः। ततश्च करटकदमनकनिक्षिप्तभारः सञ्जीवकेन सह सुभाषितगोष्ठीसुखमनुभवन्नास्ते। सञ्जीवकेनाप्यनेकशास्त्राधिगतबुद्धिप्रागल्भ्येन स्तोकैरेवाहोभिर्मूढमतिरपि पिङ्गलको धीमान् कृतः। तथारण्यधर्माद्वियोज्य ग्राम्यधर्मेषु नियोजितः। किं बहुना। प्रत्यहं पिङ्गलकसञ्जीवकावेव केवलं रहसि मिथो मन्त्रयतः। शेषः सर्वो ऽपि परिजनो दूरीभूतस्तिष्ठति। तौ च शृगालावपि प्रवेशं न लभेते। अन्यच्च। सिंहपराक्रमाभावात् सर्वो ऽपि मृगजनो तौ च शृगालौ क्षुधाव्याधिबाधिता एकां दिशमाश्रित्य स्थिताः। उक्तं च यतः।

फलहीनं नृपं भृत्याः कुलीनमथवोन्नतं।
सन्त्यज्यान्यत्र गच्छन्ति शुष्कं वृक्षमिवाण्डजाः ॥१६८॥

तथा च। स्वामिसन्मानसंयुक्ताः कुलीना भक्तितत्पराः।
वृत्तिभङ्गान्महीपालं त्यजन्त्येव हि सेवकाः ॥१६९॥

अन्यच्च। कालातिक्रमणं वृत्तेर्यो न कुर्वीत भूपतिः।
कदाचित् तं न मुञ्चन्ति भर्त्सिता अपि सेवकाः ॥१७०॥

तथा न केवलं सेवका इत्थं भूता यावत् समस्तमप्येतज्जगत् परस्परं भक्षणार्थं सामादिभिरुपायैस्तिष्ठति।

तद्यथा। देशानामुपरि क्ष्माभृदातुराणां चिकित्सकाः।
वणिजो ग्राहकाणां च मूढानामपि पण्डिताः ॥१७१॥
प्रमादिनां तथा चौरा भिक्षुका गृहमेधिनां।
गणिकाः कामिनां चैव सर्वलोकस्य शिल्पिनः ॥१७२॥
सामादिसज्जितैः पाशैः प्रतीक्षन्ते दिवानिशं।
उपजीवन्ति शक्त्या हि जलजा जलजानिव ॥१७३॥

अथवा साधु चेदमुच्यते।

सर्पाणां च खलानां च परद्रव्यापहारिणां।
अभिप्राया न सिध्यन्ति तेनेदं वर्तते जगत् ॥ १७४॥
अत्तुं वाञ्छति शाम्भवो गणपतेराखुं क्षुधार्त्तः फणी।
तं च क्रौञ्चरिपोः शिखी गिरिसुतासिंहो ऽपि नागाननं।
इत्थं यत्र परिग्रहस्य घटना शम्भोरपि स्याद्गृहे।
तत्रान्यस्य कथं न भावि जगतस्तस्मात् स्वरूपं हि तत् ॥ १७५॥

ततः करटकदमनकौ स्वामिप्रसादरहितौ क्षुत्क्षामकण्ठौ परस्परं मन्त्रयतः। तत्र दमनको ब्रूते। आर्य करटक आवां तावदप्रधानतां गतौ। एष पिङ्गलकः सञ्जीवकवचनानुरक्तः स्वव्यापारपराङ्मुखः सञ्जातः। सर्वो ऽपि परिजनो गतः। तत्किं क्रियते। करटक आह। यद्यपि त्वदीयं वचनं न करोति स्वामी। तदपि स्वदोषनाशाय वाच्य एषः। उक्तं च यतः।

अशृण्वन्नपि बोद्धव्यो मन्त्रिभिः पृथिवीपतिः।
यथा स्वदोषनाशाय विदुरेणाम्बिकासुतः ॥ १७६॥
मदोन्मत्तस्य भूपस्य कुञ्जरस्य च गच्छतः।
उन्मार्गे वाच्यतां यान्ति महामात्राः समीपगाः ॥ १७७॥

त्वयैवैष शष्पभोजी स्वामिनः सकाशमानीतः। तत् स्वहस्तेनाङ्गारा आकर्षिताः। दमनक आह। सत्यमेतत्। ममायं दोषो न स्वामिनः। उक्तं च यतः।

जम्बुको हुडुयुद्धेन वयं चाषाढभूतिना।
दूतिका परकार्येन त्रयो दोषाः स्वयं कृताः ॥ १७८॥

कथा ॥४॥ करटक आह। कथमेतत्। सो ऽब्रवीत्। अस्ति कस्मिंश्चिद्देशे मठायतनं। तत्र देवशर्मा नाम परिव्राजकः प्रतिवशति स्म। तस्यानेकयजमानप्रदत्तसूक्ष्मवस्त्रविक्रयवशात् कालेन महती वित्तमात्रा सञ्जाता। ततः स न कस्यचिद्विश्वसिति। नक्तं दिनं कक्षान्तरात्तां न मुञ्चति।

अथवा साधु चेदमुच्यते।

अर्थानामर्जने दुःखमर्जितानां च रक्षणे।
आये दुःखं व्यये दुःखं धिगर्थाः कष्टसंश्रयाः ॥१७९॥

अथाषाढभूतिर्नाम परवित्तापहारी धूर्तो ऽर्थमात्रां तस्य कक्षान्तर्गतां लक्षयित्वा व्यचिन्तयत्। कथं मयास्येयमर्थमात्रा हर्तव्येति। तदत्र मठे तावद्दृढशिलासञ्चयवशाद्भित्तिभेदो न भवति। उच्चैस्तरत्वाच्च द्वारि प्रवेशो न स्यात्। तदेनं मायावचनैर्विश्वास्याहं छात्रतां व्रजामि। येन विश्वस्तो भवति।

उक्तं च यतः। निःस्पृहो नाधिकारी स्यान्नाकामी मण्डनप्रियः।
नाविदग्धः प्रियं ब्रूयात् स्फुटवक्ता न वञ्चकः ॥१८०॥

एवं निश्चित्य तस्यान्तिकमुपगम्य ओम् नमः शिवायेति ब्रुवाणः साष्टाङ्गं प्रणम्य च सप्रश्रयमुवाच। भगवन्नसारो ऽयं संसारः। गिरिनदीवेगोपमं यौवनं। तृणाग्निसमं जीवितं। अभ्रच्छायासदृशा भोगाः। स्वप्नसदृशः पुत्रकलत्रमित्रभृत्यवर्गसम्बन्धः। एतन्मया सम्यक् परिज्ञातं। तत् किं कुर्वतो मे संसारसमुद्रोत्तरणं भविष्यति। तच्छ्रुत्वा देवशर्मा सादरमाह। वत्स धन्यो ऽसि त्वं यत् प्रथमे वयस्येवं विरक्तभावः।

उक्तं च यतः। पूर्वे वयसि यः शान्तः स शान्त इति मे मतिः।
धातुषु क्षीयमाणेषु शमः कस्य न जायते ॥१८१॥
आदौ चित्ते ततः काये सतां सञ्जायते जरा।
असतां च पुनः काये नैव चित्ते कदाचन ॥१८२॥

यच्च त्वं संसारसागरोत्तरणोपायं पृच्छसि तच्छ्रूयतां।

शूद्रो वा यदि वान्यो ऽपि चाण्डालो वा जटाधरः।
दीक्षितः शिवमन्त्रेण स भस्माङ्गी द्विजो भवेत् ॥१८३॥
षडक्षरेण मन्त्रेण पुष्पमेकमपि स्वयं।
लिङ्गस्य मूर्ध्नि यो दद्यान्न स भूयो ऽपि जायते ॥१८४॥

तच्छ्रुत्वाषाढभूतिस्तत्पादौ गृहीत्वा सप्रश्रयमिदमुवाच । भगवंस्तर्हि व्रतप्रदानेन मम प्रसादः क्रियतां । देवशर्मा प्राह । वत्सानुग्रहं ते करिष्यामि । परं रात्रौ त्वया मठमध्ये न प्रवेष्टव्यं । यत्कारणं निःसङ्गता यतीनां प्रशस्यते तव च ममापि च । उक्तं च यतः ।

दुर्मन्त्रान्नृपतिर्विनश्यति यतिः सङ्गात् सुतो लालना
विप्रो ऽनध्ययनात् कुलं कुतनयाच्छीलं खलोपासनात् ।
मैत्री चाप्रणयात् समृद्धिरनयात् स्नेहः प्रवासाश्रया
ह्रीर्मद्यादनवेक्षणादपि कृषिस्त्यागात् प्रमादाद्धनं ॥१८५॥

तत् त्वया व्रतग्रहणादूर्ध्वं मठद्वारे तृणकुटीरके शयितव्यमिति । स चाह । भगवन् भवदादेशः प्रमाणं । परत्र हि तेन मे प्रयोजनं । अथ तं कृतशयनसमयं देवशर्मानुग्रहं दत्वा शास्त्रोक्तविधानेन शिष्यतामनयत् । सो ऽपि हस्तपादावमर्दनपत्रिकानयनादिकया परिचर्यया तं परं परितोषमनयत् । पुनस्तथापि मुनिः कक्षान्तरान्मात्रां न मुञ्चति । अथैवं गच्छति काले आषाढभूतिश्चिन्तयामास । अहो न कथञ्चिदप्येष मे विश्वासमागच्छति । तत्किं दिवापि शस्त्रेण मारयामि । किं वा विषं प्रयच्छामि । किं वा पशुधर्मेण व्यापादयामि । इत्येवं चिन्तयतस्तस्य देवशर्मणो ऽपि शिष्यपुत्रः कश्चिद्ग्रामादामन्त्रणार्थं समायातः । प्राह च । भगवन् पवित्रारोहणविषये मम गृहमागम्यतामिति । तच्छ्रुत्वा देवशर्माषाढभूतिना सह प्रहृष्टमनाः प्रस्थितः । अथैवं तस्य गच्छतो ऽग्रे काचिन्नदी समागता । तां दृष्ट्वा मात्रां कक्षान्तरादवतार्य कन्थामध्ये सुगुप्तां निधाय स्नात्वा देवार्चनं विधाय तदनन्तरमाषाढभूतिमिदमाह । भो आषाढभूते यावदहं पुरीषोत्सर्गं कृत्वा समागच्छामि तावदेषा कन्था योगेश्वरस्य सावधानतया रक्षणीया । इत्युक्त्वा गतः । आषाढभूतिरपि तस्मिन्नदर्शनीभूते मात्रामादाय सत्वरं प्रस्थितः । देवशर्मापि छात्रगुणानुरञ्जितमनाः सुविश्वस्त उपविष्टो यावत्तिष्ठति

तावत् सुवर्णरोमयूथमध्ये हुडुयुद्धमपश्यत्। अथ रोषवशाद्धुडुयुगलस्य दूरमपसरणं कृत्वा भूयो ऽपि समुपेत्य ललाटपट्टाभ्यां प्रहरतो भूरि रुधिरं पतति। तच्च जम्बुको जिह्वालौल्येन रङ्गभूमिं प्रविश्यास्वादयति। देवशर्मापि तदालोक्य व्यचिन्तयत्। अहो मन्दमतिरयं जम्बुकः। यदि कथमप्यनयोः सङ्घट्टे पतिष्यति। तन्नूनं मृत्युमाप्स्यतीति वितर्कयामि। क्षणान्तरे च तथैव रक्तास्वादनलौल्यान्मध्ये प्रविशंस्तयोः शिरःसम्पाते पतितः शृगालो मृतश्च। देवशर्मापि तं शोचमानो मात्रामुद्दिश्य चलितः। शनैः शनैर्यावदागच्छति तावदाषाढभूतिं न पश्यति। ततश्चौत्सुक्येन शौचं विधाय यावत्कन्थामालोकयति तावन्मात्रा नास्ति। ततश्च हाहा मुष्टो ऽस्मीति जल्पन् भूतले मूर्छया निपपात। तत्क्षणाच्चेतनां लब्ध्वा भूयो ऽपि समुत्थाय फूत्कर्तुमारब्धः। भो भो आषाढभूते मां वञ्चयित्वा क्व गतो ऽसि। तद्देहि मे प्रतिवचनं। एवं बहुविधं विलप्य तस्य पादपद्धतिमन्वेषयन् शनैः शनैः प्रस्थितः। अथैवं गच्छन् सायन्तनसमये कञ्चिद्ग्राममाससाद। अथ तस्माद्ग्रामात् कश्चित् कौलिकः सभार्यो मद्यपानकृते समीपवर्तिनि नगरे प्रस्थितः। देवशर्मापि तमालोक्योवाच। भो भद्र वयं सूर्योढा अतिथयस्तवान्तिकं प्राप्ताः। न कमप्यत्र ग्रामे जानीमः। तद्गृह्यतामतिथिधर्मः। उक्तं च यतः।

अप्रणोद्यो ऽतिथिः सायं सूर्योढो गृहमेधिना।
पूजया तस्य देवत्वं प्रयान्ति गृहमेधिनः॥१८६॥

तथा च।

तृणानि भूमिरुदकं वाक् चतुर्थी च सूनृता।
सतामेतानि हर्म्येषु नोच्छिद्यन्ते कदाचन॥१८७॥

स्वागतेनाग्नयस्तृप्ता आसनेन शतक्रतुः।
पितरः पादशौचेन अन्नाद्येन प्रजापतिः॥१८८॥

कौलिको ऽपि तच्छ्रुत्वा भार्यामाह। प्रिये गच्छ त्वमेनमतिथिमादाय गृहं प्रति पादशौचभोजनशयनादिभिः सत्कृत्य तत्रैव तिष्ठ। अहं

तत्र कृते प्रभूतं मद्यमानेष्यामि। एवमुक्त्वा प्रस्थितः। सापि तस्य भार्या पुंश्चली तमादाय प्रहसितवदना देवदत्तं मनसि ध्यायन्ती गृहं प्रति प्रतस्थे। अथवा साधिदमुच्यते।

दुर्दिवसे घनतिमिरे दुःसञ्चारासु नगरवीथीषु।
पत्युर्विदेशगमने परमसुखं जघनचपलायाः ॥१८९॥

तथा च। पर्यङ्के चास्तरणं पतिमनुकूलं मनोहरं शयनं।
तृणमिव लघु मन्यन्ते कामिन्यश्चौर्यरतलुब्धाः ॥१९०॥

तथा च। केलिः प्रदहति लज्जां शृङ्गारो ऽस्थीनि चाटवः कटवः।
बन्धकया परितोषो न किञ्चिदिष्टं भवेत् पत्योः ॥१९१॥

तथा च। कुलपतनं जनगर्हां बन्धनमपि जीवितव्यसन्देहं।
अङ्गीकरोति कुलटा सततं परपुरुषसंसक्ता ॥१९२॥

अथ कौलिकभार्या गृहं गत्वा देवशर्मणे गतास्तरणां भग्नां च खट्वां समर्प्येदमाह। भो भगवन् यावदहं स्वसखीं ग्रामादभ्यागतां सम्भाष्य द्रुततरमागच्छामि। तावत् त्वयास्मद्गृहे ऽप्रमत्तेन भाव्यं। एवमभिधाय शृङ्गारविधिं विधाय यावद्देवदत्तमुद्दिश्य व्रजति। तावत् तद्भर्ता सम्मुखो मदविह्वलाङ्गो मुक्तकेशः पदे पदे प्रस्खलन् गृहीतमद्यभाण्डः समभ्येति। तं च दृष्ट्वा सा द्रुततरं व्याघुट्य स्वगृहं प्रविश्य मुक्तशृङ्गारा यथापूर्वमभवत्। कौलिको ऽपि तां पलायमानां कृताद्भुतशृङ्गारां विलोक्य प्रागेव कर्णोपकर्णिकया श्रुतापवादक्षुभितहृदयः स्वाकारं निगूहन् सदैवास्ते। ततश्च तत्तथाविधं चेष्टितमवलोक्य दृष्टप्रत्ययः क्रोधवशगो गृहं प्रविश्य तामुवाच। आः पापे पुंश्चलि क्व प्रस्थितासि। सा प्रोवाच। अहं त्वत्सकाशादागता न कुत्रचिदपि निर्गता। तत् कथं मद्यपानवशादप्रस्तुतं वदसि। अथवा साधिदमुच्यते।

वैकल्यं धरणीपातमयथोचितजल्पनं।
सन्निपातस्य चिह्नानि मद्यं सर्वाणि दर्शयेत् ॥१९३॥

करसादो ऽम्बरत्यागस्तेजोहानिः सरागता
वारुणीसङ्गजावस्था भानुनाप्यनुभूयते ॥१९४॥

सो ऽपि तच्छ्रुत्वा प्रतिकूलवचनं वेषविपर्ययं चावलोक्य तामाह । पुंश्चलि चिरकालं श्रुतो मया तवापवादः । तदद्य स्वयं जातप्रत्ययस्तव यथोचितं निग्रहं करोमि । एवमभिधाय लगुडप्रहारैस्तां जर्जरितदेहां विधाय स्थूणया सह दृढबन्धनेन बद्ध्वा मदविह्वलो निद्रावशमगमत् । एतस्मिन्नन्तरे तस्याः सखी नापिती कौलिकं निद्रावशगतं विज्ञायागत्येदमाह । सखि स देवदत्तस्तस्मिन् स्थाने प्रतीक्षते । तच्छीघ्रमागम्यतां । सा चाह । पश्य ममावस्थां तत्कथं गच्छामि । तद्गत्वा ब्रूहि तं कामिनं यदत्रास्मिन्नवसरे न त्वया सह समागमः । नापिती प्राह । सखि मा मैवं वद । नायं कुलटाधर्मः ।

उक्तं च यथा । विषमस्थस्वादुफलग्रहणव्यवसायनिश्चयो येषां ।
उष्ट्राणामिव तेषां मन्ये ऽहं शंसितं जन्म ॥१९५॥

तथा च । सन्दिग्धे परलोके जनापवादे च जगति बहुचित्रे ।
स्वाधीने पररमणे धन्यास्तारुण्यफलभाजः ॥१९६॥

अन्यच्च । यदि भवति दैवयोगात् पुमान् विरूपो ऽपि बन्धकीरहसि ।
न तु कृच्छ्रादपि भद्रं निजकान्तं सा भजत्येव ॥१९७॥

साब्रवीत् । यद्येवं तर्हि कथय कथं दृढबन्धनबद्धा सती गच्छामि । सन्निहितश्चायं पापात्मा मत्पतिः । नापित्याह । सखि मदविह्वलो ऽयं सूर्यकरस्पृष्टः प्रबोधं यास्यति । तदहं त्वामुन्मोचयामि । मामात्मस्थाने बद्ध्वा द्रुततरं देवदत्तं सम्भाष्यागच्छ । साब्रवीत् । एवमस्तु । तथानुष्ठिते कौलिकः कस्मिंश्चित् क्षणे समुत्थाय किञ्चिद्गतकोपो विमदस्तामाह । हे परपुरुषवादिनि यद्यद्यप्रभृति गृहान्निष्क्रमणं न करोषि न च परपुरुषं वदसि । ततस्त्वामुन्मोचयामि । ततो नापिती स्वरभेदभयान्न किञ्चिदूचे । सो ऽपि भूयो भूयस्तां तदेवाह । अथ

सा यावत् प्रत्युत्तरं किमपि न दत्ते। तावत् स प्रकुपितस्तीक्ष्णक्षुरप्रमादाय तस्या नासिकामच्छिनत्। आह च। पुंश्चलि तिष्ठेदानीं न त्वां भूयस्तोषयिष्यामि। इति जल्पन् पुनरपि निद्रावशमगमत्। देवशर्मापि वित्तनाशात् क्षुत्क्षामकण्ठो नष्टनिद्रस्तत्सर्वं स्त्रीचरित्रमपश्यत्। सापि कौलिकभार्या यथेच्छया देवदत्तेन सह सुरतसौख्यमनुभूय कस्मिंश्चित् क्षणे स्वगृहमागत्य तां नापितीमिदमाह। अयि शिवं भवत्याः। नायं पापात्मा मम गताया उत्थितः। नापिती प्राह। शिवं नासिकया विना शेषशरीरस्य। तद्द्रुतं मां मुञ्च बन्धनाद्यावन्नायं मां पश्यति येन स्वगृहं गच्छामि। तथानुष्ठिते भूयो ऽपि कौलिक उत्थाय तामाह। पुंश्चलि किमद्यापि न वदसि। किं भूयो ऽप्यन्यं दुष्टतरं निग्रहं कर्णच्छेदेन करोमि। अथ सा सकोपं साक्षेपमिदमाह। धिग्धिक्। महामूढ को मां महासतीं पतिव्रतां धर्षयितुं व्यङ्गयितुं वा समर्थः। तच्छृण्वन्तु सर्वे ऽपि लोकपालाः। उक्तं च।

आदित्यचन्द्रावनिलो ऽनलश्च द्यौर्भूमिरापो हृदयं यमश्च।
अहश्च रात्रिश्च उभे च सन्ध्ये धर्मो ऽपि जानाति नरस्य वृत्तं ॥११८॥

तद्यदि मम सतीत्वमस्ति तदेते देवा भूयो ऽपि मे नासिकां तादृग्रूपामक्षतां कुर्वन्तु। अथवा यदि मया मनसापि परपुरुषो ऽभिलषितः। ततो मां भस्मसान्नयन्त्विति। एवमुक्त्वा भूयो ऽपि तमाह। भो दुरात्मन् पश्य मे सतीत्वप्रभावेन तादृगेव नासिका संवृत्ता। अथासावुल्मुकमादाय यावत् पश्यति तावत्तद्रूपा नासिका रक्तप्रवाहश्च भूतले महान्। ततः स विस्मयमनास्तामुन्मुच्य बन्धनात्समुत्क्षिप्य शय्यायामारोप्य चाटुशतैः पर्यतोषयत्। देवशर्मापि तं सर्वं वृत्तान्तमवलोक्य विस्मितमना इदमाह।

उशना वेद यच्छास्त्रं यच्च वेद बृहस्पतिः।
स्त्रीबुद्धेर्न विशिष्येत तस्माद्रक्ष्या कथं हि सा ॥११९॥

अनृतं सत्यमित्याहुः सत्यं चापि तथानृतं ।
इति यास्ताः कथं धीरैः संरक्ष्याः पुरुषैरिह ॥२००॥

अन्यत्राप्युक्तं ।

नातिप्रसङ्गः प्रमदासु कार्यो नो चेद्बलं स्त्रीषु विवर्धमानं ।
अतिप्रसक्तैः पुरुषैर्यतस्ताः क्रीडन्ति काकैरिव लूनपक्षैः ॥२०१॥
सुमुखेन वदन्ति वल्गुना प्रहरन्ते निशितेन चेतसा ।
मधु तिष्ठति वाचि योषितां हृदि हालाहलमेव केवलं ॥२०२॥
अत एव मुखं निपीयते हृदयं मुष्टिभिरेव ताड्यते ।
पुरुषैः सुखलेशवञ्चितैर्मधुगृध्रैः कमलं यथालिभिः ॥२०३॥

अपि च । आवर्तः संशयानामविनयभवनं पत्तनं साहसानां
दोषाणां सन्निधानं कपटशतगृहं क्षेत्रमप्रत्ययानां ।
दुर्ग्राह्यं यन्महद्भिर्नरवरवृषभैः सर्वमायाकरण्डं
स्त्रीयन्त्रं केन लोके विषममृतयुतं धर्मनाशाय सृष्टं ॥२०४॥
कार्कश्यं स्तनयोर्दृशोस्तरलतालीकं च सुश्लाघ्यते
कौटिल्यं कचसञ्चये प्रवचने मान्द्यं त्रिके स्थूलता ।
भीरुत्वं हृदये सदैव कथितं मायाप्रयोगः प्रिये
यासां दोषगणो गुणो मृगदृशां ताः स्युः पशूनां प्रियाः ॥२०५॥
एता हसन्ति च रुदन्ति च कार्यहेतो
र्विश्वासयन्ति च नरं न च विश्वसन्ति ।
तस्मान्नरेण कुलशीलसमन्वितेन
नार्यः श्मशानघटिका इव वर्जनीयाः ॥ २०६ ॥
व्याकीर्णकेशरकरालमुखा मृगेन्द्रा
नागाश्च भूरिमदराजिविराजमानाः ।
मेधाविनश्च पुरुषाः समरेषु शूराः
स्त्रीसन्निधौ परमकापुरुषा भवन्ति ॥ २०७ ॥

कुर्वन्ति तावत् प्रथमं प्रियाणि यावन्न जानन्ति नरं प्रसक्तं ।
ज्ञात्वा च तं मन्मथपाशबद्धं ग्रस्तामिषं मीनमिवोद्धरन्ति ॥२०८॥

किं च ।

समुद्रवीचीचपलस्वभावाः सन्ध्याभ्ररेखेव मुहूर्तरागाः ।
स्त्रियः कृतार्थाः पुरुषं निरर्थं निपीडितालक्तकवत् त्यजन्ति ॥२०९॥

सम्मोहयन्ति मदयन्ति विडम्बयन्ति निर्भर्त्सयन्ति रमयन्ति विषादयन्ति ।
एताः प्रविश्य सदयं हृदयं नराणां किं नाम वामनयना न समाचरन्ति ॥

अन्तर्विषमया ह्येता बहिश्चैव मनोरमाः ।
गुञ्जफलसमाकारा योषितः परिकीर्तिताः ॥२११॥

एवं तस्य परिव्राजकस्य चिन्तयतो सा निशा महता कृच्छ्रेणातिचक्राम । सापि दूतिका छिन्ननासिका स्वगृहं गत्वा चिन्तयामास । किमिदानीं कर्तव्यं । कथमेतन्महच्छिद्रं घटयितव्यं । अथ तस्या एवं चिन्तयन्त्या भर्ता राजकुले कार्यवशात् पर्युषितः । प्रत्युषे च स्वगृहमभ्युपेत्य द्वारदेशस्थितो ऽपि विविधपौरकृत्योत्सुकतया तामाह । भद्रे शीघ्रमानीयतां क्षुरभाण्डं येन पौरकर्मकरणाय गच्छामि । सापि छिन्ननासिका गृहमध्यस्थितैव कार्यकरणापेक्षया क्षुरभाण्डात् क्षुरमेकं समाकृष्य तस्याभिमुखं प्रेषयामास । नापितो ऽप्युत्सुकतया तमेकं क्षुरमवलोक्य कोपाविष्टः सन् प्रतीपं प्राहैषीत् । एतस्मिन् व्यतिकरे सा दुष्टा ऊर्ध्वबाहू विधाय फूत्कर्तुमना गृहान्निश्चक्राम । अहो पापेनानेन मम सदाचारवर्तिन्याः पश्यत नासिकाछेदो विहितः । तत्परित्रायतां तत्परित्रायतां । अत्रान्तरे राजपुरुषाः समभ्येत्य तं नापितं लगुडप्रहारैर्जर्जरीकृत्य दृढबन्धनैर्बद्ध्वा तया छिन्ननासिकया सह धर्माधिकरणस्थानं नीत्वा सभ्यानूचुः । शृण्वन्तु भवन्तः सभासदः । अनेन नापितेनापराधं विना स्त्रीरत्नमेतद्व्यङ्गितं । तदस्य यद्युज्यते तत् क्रियतां । इत्यभिहिते सभ्या ऊचुः । रे नापित किमर्थं त्वया भार्या व्यङ्गिता । किमनया

परपुरुषो ऽभिलषितः । उतस्वित् प्राणद्रोहः कश्चित् कृतः । किं वा चौर्यकर्माचरितं । तत् कथ्यतामस्या अपराधः । नापितो ऽपि प्रहारपीडिततनुर्वक्तुं न शशाक । अथ ते सभ्या ऊचुः । अहो सत्यमेतद्राजपुरुषाणां वचः । न शृणोत्ययं । पापात्मायं । निर्दोषानेनेयं वराकी दूषिता । उक्तं च ।

भिन्नस्वरमुखवर्णः शङ्कितदृष्टिः समुत्पतिततेजाः ।
भवति हि पापं कृत्वा स्वकर्मसंत्रासितः पुरुषः ॥२१२॥

तथा च । आयाति स्खलितैः पादैर्मुखवैवर्ण्यसंयुतः ।
ललाटस्वेदभा भूरि गद्गदं भाषते वचः ॥२१३॥
कम्पमानस्त्वधोऽवेक्षी पापं प्राप्तः सदा नरः ।
तस्माद्यत्नात् परिज्ञेयश्चिह्नैरेतैर्विचक्षणैः ॥२१४॥

अन्यच्च । प्रसन्नवदनो हृष्टः स्पष्टवाक्यः सरोषदृक् ।
सभायां वक्ति सामर्षं सावष्टम्भो नरः शुचिः ॥२१५॥

तदेष दुष्टचरित्रलक्षणो दृश्यते । स्त्रीधर्षणाद्वध्य इति । तच्छूलायामारोप्यतामिति । अथ वध्यस्थानं नीयमानं तमालोक्य देवशर्मा तान् धर्माधिकृतान् गत्वा प्रोवाच । भो अन्यायेनैष वराको वध्यते । नापितः साधुसमाचार एष । तच्छ्रूयतां मे वाक्यं ।

जम्बुको हुडुयुद्धेन वयं चाषाढभूतिना ।
दूतिका परकार्येण त्रयो दोषाः स्वयंकृताः ॥२१६॥

अतस्ते सभ्यास्तमूचुः । भो भगवन् कथमेतत् । ततो देवशर्मापि तेषां त्रयाणामपि वृत्तान्तं विस्तरेणाकथयत् । ते सभ्यास्तदाकर्ण्य सुविस्मितमनसो नापितं विमुच्य मिथः प्रोचुः । अहो

अवध्यो ब्राह्मणो बालः स्त्री तपस्वी च रोगभाक् ।
विहिता व्यङ्गता तेषामपराधे गरीयसि ॥२१७॥

तदस्या नासिकाछेदः स्वकर्मणापि संवृत्तः । ततो राजनिग्रहस्तु

कर्णच्छेदः कार्यः। तथानुष्ठिते देवशर्मापि वित्तनाशसमुद्भूतशोकहृदितस्तदेव स्वकीयं मठायतनं जगाम। यतो ऽहं ब्रवीमि।

जम्बुको हुडुयुद्धेन वयं चाषाढभूतिना।
दूतिका परकार्येण त्रयो दोषाः स्वयङ्कृता ॥२१८॥

करटक आह। अथैवंविधे व्यतिकरे किं कर्तव्यमावयोः। दमनको ऽब्रवीत्। एवंविधे ऽपि समये मम बुद्धिस्फुरणं भविष्यति। येन सञ्जीवकं प्रभोर्विश्लेषयिष्यामि। उक्तं च यतः।

एकं हन्यान्न वा हन्यादिषुर्मुक्तो धनुष्मता।
बुद्धिर्बुद्धिमतो सृष्टा हन्ति राष्ट्रं सनायकं ॥२१९॥

तदहं मायाप्रपञ्चेन दम्भं गुप्तमाश्रित्य तं स्फोटयिष्यामि। करटक आह। भद्र यदि कथमपि तव मायाप्रपञ्चं पिङ्गलको ज्ञास्यति सञ्जीवको वा। तदा नूनं विघात एव। सो ऽब्रवीत्। तात नैवं वद। गूढबुद्धिभिरापत्काले विधुरे ऽपि दैवे बुद्धिः प्रयोक्तव्या। नोद्यमस्त्याज्यः कदाचित्। गुणान्तरन्यायेन बुद्धेः साम्राज्यं भवति। उक्तं च यतः।

त्याज्यं न धैर्यं विधुरे ऽपि दैवे धैर्यात् कदाचित् स्थितिमाप्नुयात् सः।
याते समुद्रे ऽपि हि पोतभङ्गे सांयात्रिको वाञ्छति कर्म एव ॥२२०॥

तथा च। उद्योगिनं सततमत्र समेति लक्ष्मी।
दैवं हि दैवमिति कापुरुषा वदन्ति ॥
दैवं निहत्य कुरु पौरुषमात्मशक्त्या।
यत्ने कृते यदि न सिध्यति को ऽत्र दोषः ॥२२१॥

तदेवं ज्ञात्वा सुगूढबुद्धिप्रभावेन यथा तौ द्वावपि न ज्ञास्यतः। तथा मिथो वियोजयिष्यामि। उक्तं च।

सुगुप्तस्यापि दम्भस्य ब्रह्माप्यन्तं न गच्छति।
कौलिको विष्णुरूपेण राजकन्यां निषेवते ॥२२२॥

करटक आह। कथमेतत्। सो ऽब्रवीत्। कस्मिंश्चिदधिष्ठाने कौलिक

रथकारौ मित्रे प्रतिवसतः स्म। तत्र च बाल्यात् प्रभृति सहचारिणौ कथ
परस्परमतीव सदैकस्थानविहारिणौ कालं नयतः। अथ कदाचिदत्रा ॥५॥
धिष्ठाने कस्मिंश्चिद्देवायतने यात्रामहोत्सवः संवृत्तः। तत्र च नटनर्त
कचारणसङ्कुले नानादेशागतजनाकीर्णे तौ सहचरौ भ्रमन्तौ काञ्चिद्राज
कन्यां करेणुकारूढां सर्वलक्षणसनाथां कञ्चुकिवर्षधरपरिवारितां देव
तादर्शनार्थं समायातां दृष्टवन्तौ। अथासौ कौलिकस्तां दृष्ट्वा विषार्दित
इव दुष्टग्रहगृहीत इव कामशरैर्हन्यमानः सहसा भूतले निपपात।
अथ तं तदवस्थमवलोक्य रथकारस्तद्दुःखदुःखित आप्तपुरुषैस्तं समु
त्क्षिप्य स्वगृहमानयत्। तत्र च विविधैः शीतोपचारैश्चिकित्सकोपदि
ष्टैर्मन्त्रवादिभिश्चोपचर्यमाणश्चिरात् कथञ्चित् सचेतनो बभूव। ततो
रथकारेण पृष्टः। भो मित्र किमेवं त्वमकस्माद्विचेतनः सञ्जातः। तत्
कथ्यतामात्मस्वरूपं। स आह। वयस्य यद्येवं तच्छृणु मे रहस्यं येना
शेषं ते वदामि। तथानुष्ठिते स तं प्रोवाच। भो मित्र यदि त्वं मां
सुहृदं मन्यसे। तत् काष्ठप्रदानेन प्रसादः क्रियतां। क्षम्यतां यद्बाल्ये
किमपि प्रणये नातिरेकादयुक्तं तदनुष्ठितं तव। सो ऽपि तदाकर्ण्य
बाष्पपिहितनयनः सगद्गदमुवाच। यत् किञ्चिद्दुःखकारणं तद्वद। येन
प्रतीकारः क्रियते यदि कर्तुं शक्यते। उक्तं च यतः।

औषधानां च मन्त्राणां बुद्धेश्चैव महात्मनां।
असाध्यं नास्ति लोके ऽत्र किञ्चिद्ब्रह्माण्डमध्यगं ॥२२३॥

तदेतेषां चतुर्णां यदि साध्यं भविष्यति तदाहं साधयिष्यामि। कौलिक
आह। वयस्य एतेषामन्येषामपि सहस्रमुपायानामसाध्यं तन्मे दुःखं।
तस्मान्मम मरणे कालक्षेपं मा कुरु। रथकार आह। भो मित्र तथापि
मे निवेदय। येनाहमपि तदसाध्यं मत्वा त्वया सह वह्नौ प्रविशामि।
न क्षणमपि त्वद्वियोगं सहिष्ये। एष मे निश्चयः। कौलिक आह।
वयस्य श्रूयतां तर्हि। या राजकन्या करेणुकारूढा तत्रोत्सवे दृष्टा

तस्या दर्शनानन्तरमेव भगवता मकरध्वजेन ममेयमवस्था विहिता। तन्न शक्नोमि तद्वेदनां सोढुं। तथा चोक्तं।

मत्तेभकुम्भपरिणाहिनि कुङ्कुमार्द्रे तस्याः पयोधरयुगे रतखेदखिन्नः।
वक्षो निधाय भुजपञ्जरमध्यवर्ती स्वप्स्ये कदा क्षणमवाप्य तदीयसङ्गं॥२२४॥

तथा च। रागी बिम्बाधरो ऽसौ स्तनकलशयुगं यौवनारूढगर्वं
नीचा नाभिः प्रकृत्याः कुटिलकमलकं स्वल्पकं चापि मध्यं।
कुर्वन्त्वेतानि नाम प्रसभमिह मनश्चिन्तितान्याशु खेदं
यन्मां तस्याः कपोलौ दहत इति मुहुः स्वच्छकौ तन्न युक्तं॥

रथकारो ऽप्येवं सकामं तद्वचनमाकर्ण्य सस्मितमिदमाह। वयस्य यद्येवं तर्हि दिष्ट्या सिद्धं नः प्रयोजनं। तदद्यैव तया सह समागमः क्रियतामिति। कौलिक आह। वयस्य यत्र कन्यान्तःपुरे वायुं मुक्त्वा नान्यस्य प्रवेशो ऽस्ति तत्र रक्षापुरुषरक्षिते कथं तया सह समागमः। तत् किं मामसत्यवचनेन विडम्बयसि। रथकार आह। भो वयस्य पश्य मे बुद्धिबलं। एवमभिधाय तत्क्षणात् कीलसञ्चारिणं वैनतेयं बाहुयुगलवायुजवृक्षदारुणा शङ्खचक्रगदापद्मान्वितं सकिरीटकौस्तुभमघटयत्। ततस्तस्मिन् कौलिकं समारोप्य विष्णुचिह्नचिह्नितं कृत्वा कीलसञ्चरणविज्ञानं च दर्शयित्वा प्रोवाच। वयस्यानेन विष्णुरूपेण गत्वा कन्यकान्तःपुरे निशीथे तां राजकन्यकामेकाकिनीं सप्तभूमिकाप्रासादप्रान्तगतां मुग्धस्वभावां त्वां वासुदेवं मन्यमानां स्वकीयमिथ्यावक्रोक्तिभी रञ्जयित्वा भज। कौलिको ऽपि तदाकर्ण्य तथारूपस्तत्र गत्वा तामाह। राजपुत्रि सुप्ता किं वा जागर्षि। अहं तव कृते क्षीरसमुद्रात् सानुरागो लक्ष्मीं विहाय स्वयमेवाभ्यागतः। तत् क्रियतां मया सह समागम इति। सापि गरुडारूढं चतुर्भुजं सायुधं कौस्तुभोपेतमवलोक्य सविस्मया शयनादुत्थाय कृताञ्जलिपुटा प्रोवाच। भगवन्नहं मानुषकीटिकाशुचिः। भगवांस्त्रैलोक्यपूज्यः कर्ता च। तत्

कथमेतद्गम्यतामिति। कौलिक ग्राह। सुभगे सत्यमभिहितं भवत्या। परं किंतु राधा नाम मे भार्या नन्दकुलप्रसूता पूर्वमासीत्। सा त्वम वतीर्णा। तेनाहमत्रायात इत्याह। सा प्राह। भगवन् यद्येवं ततो मे तातं प्रार्थय। येन सो ऽप्यविकल्पं मां तुभ्यं प्रयच्छति। कौलिक ग्राह। सुभगे नाहं दर्शनपथं मानुषाणां गच्छामि। किं पुनरालाप करणं। तद्गान्धर्वविवाहेनात्मानं प्रयच्छ। नो चेच्छापं दत्वा सान्वयं ते पितरं भस्मसात् करिष्यामि। एवमभिधाय गरुडादवतीर्य सव्ये पाणौ गृहीत्वा तां सभयां सलज्जां वेपमानां शय्यामानयत्। ततश्च रात्रिशेषं यावत् तां वात्स्यायनोक्तविधिना निषेव्य प्रत्यूषे स्वगृहम लक्षितो जगाम। एवं तस्य तां नित्यं सेवमानस्य कालो याति। ग्रथ कदाचित् कञ्चुकिनस्तस्या ग्रधरोष्ठप्रबालखण्डनं दृष्ट्वा मिथः प्रोचुः। ग्रहो पश्यत। ग्रस्या राजकन्यकायाः पुरुषोपभुक्ताया इव शरीरावयवा विभाव्यन्ते। तत् कथं सुरक्षिते ऽप्यस्मिन् गृह एवंविधो व्यवहारः। तद्राज्ञे निवेदयामः। एवं निश्चित्य सर्वे राजानं समेत्य प्रोचुः। देव वयं न विद्मः। परं सुरक्षिते ऽप्यस्मिन् कन्यान्तःपुरे कश्चित् प्रविशति। तद्देवः प्रमाणं। तच्छ्रुत्वा राजा समाकुलेन मनसा व्यचिन्तयत्।

पुत्रीति जाता महतीह चिन्ता कस्मै प्रदेयेति महान् वितर्कः।
दत्त्वा सुखं प्राप्स्यति वा न वेति कन्यापितृत्वं खलु नाम कष्टं ॥२२६॥
नद्यश्च नार्यश्च सदृक्प्रभावास्तुल्यानि कूलानि कुलानि तासां।
तोयैश्च दोषैश्च निपातयन्ति नद्यो हि कूलानि कुलानि नार्यः ॥२२७॥

तथा च।

जननी मनो हरति जातवती परिवर्धते सह शुचा सुहृदां।
परसत्कृतापि कुरुते मलिनं दुरतिक्रमा दुहितरो विपदः ॥२२८॥

एवं बहुविधं विचिन्त्य देवीं रहस्यां प्रोवाच। देवि विज्ञायतां यदेते कञ्चुकिनो वदन्ति। तस्य कृतान्तः कुपितो येनैष द्रोहः कृतः। देव्य

पि तदाकर्ण्य व्याकुली भूत्वा सत्वरं कन्यान्तःपुरे गत्वा खण्डिताधरां नखविलिखितशरीरावयवां दुहितरमपश्यत्। आह च। आः पापे कुलकलङ्ककारिणि किमेवं शीलखण्डनं कृतं। को ऽयं कृतान्तावलोकितस्त्वत्सकाशमभ्येति। तत् कथ्यतां ममाग्रे सत्यं। इति कोपाटोपविसङ्कटं वदन्त्यां मातरि राजपुत्री भयलज्जाननताननं प्रोवाच। अम्ब साक्षान्नारायणः प्रत्यक्षं गरुडारूढो निशि समायाति। चेदसत्यं मम वाक्यं तत् परोक्षं विलोकयतु निगूढतरा काचित् निशीथे भगवन्तं रमाकान्तं। तच्छ्रुत्वा सापि प्रहसितवदना पुलकाङ्कितसर्वाङ्गी सत्वरं गत्वा राजानमुवाच। देव दिष्ट्या वर्धसे। नित्यमेव निशीथे भगवान् नारायणः कन्यकापार्श्वे ऽभ्येति। तेन गान्धर्वविवाहेन सा विवाहिता। तदद्य रात्रौ त्वया मया च वातायनगताभ्यां निशीथे स द्रष्टव्यः। यतो न स मानुषैः सहालापं करोति। तच्छ्रुत्वा हर्षितस्य राज्ञस्तद्दिनं वर्षशतमिव जगाम। ततस्तु रात्रौ निभृतो भूत्वा राजा सकलत्रो वातायनस्थो गगणासक्तदृष्टिर्यावत् तिष्ठति। तावत् तस्मिन् समये गरुडागतं शङ्खचक्रगदाहस्तं यथोचितचिह्नं व्योम्नो ऽवतरन्तं नारायणमपश्यत्। ततः सुधापूरप्लावितमिवात्मानं मन्यमानस्तां स्वप्रियामुवाच। प्रिये नास्त्यन्यो धन्यतरो लोके मया त्वया च। यदस्मत्प्रसूतिं भगवान्नारायणः समभ्येत्य भजते। तत् सिद्धाः सर्वे ऽस्माकं हृदयस्था मनोरथाः। अधुना जामातृप्रभावेन सकलामपि वसुमतीं वश्यां करिष्यामि। एवं निश्चित्य सर्वैः सीमाधिपैः सह मर्यादाव्यतिक्रममकरोत्। ते च तं मर्यादाव्यतिक्रमे वर्तमानमवलोक्य सर्वे समेत्य तेन सह विग्रहं चक्रुः। अत्रान्तरे स राजा देवीमुखेन तां दुहितरं प्रोवाच। पुत्रि त्वयि दुहितरि वर्तमानायां नारायणे भगवति जामातरि स्थिते तत्किमेवं युज्यते यत् सर्वे ऽपि पार्थिवा मया सह विग्रहं कुर्वन्ति। तत् सम्बोध्यो ऽद्य त्वया निजभर्ता यथा मम शत्रून्

व्यापादयति। ततस्तया स कौलिको रात्रौ समायातः सन् सविनयमभिहितः। भगवंस्त्वयि जामातरि स्थिते मम तातो यच्छत्रुभिः परिभूयते तन्न युक्तं। ततः प्रसादं कृत्वा सर्वांस्तान् शत्रून् व्यापादय। कौलिक आह। सुभगे कियन्मात्रास्ते तातस्य शत्रवः। तद्विश्रब्धा भव। क्षणेन सुदर्शनचक्रेण तांस्तिलशः खण्डयिष्यामि। अथ गच्छता कालेन सर्वं देशं शत्रुभिरुद्वास्य स राजा प्राकारशेषः कृतः। तथापि तं कौलिकं वसुदेवरूपमजानन् राजा नित्यमेव विशेषतः कर्पूरागुरुकस्तूरिकादिपरिमलविशेषान् नानाप्रकारवस्त्रपुष्पभक्ष्यपेयान् प्रेषयन् दुहितृमुखेन तमूचे। भगवन् नूनं प्रभाते स्थानभङ्गो भविष्यति। यतो यवसेन्धनसङ्क्षयः सञ्जातः। तथा सर्वो ऽपि जनः प्रहारैर्जर्जरितदेहः संवृत्तो योद्धुमक्षमः प्रचुरो मृतश्च। तदेवं ज्ञात्वा काले यदुचितं तत्क्रियतामिति। तच्छ्रुत्वा कौलिको व्यचिन्तयत्। स्थानभङ्गे सञ्जाते ममापि नूनं मृत्युरनया सह वियोगश्च भविष्यति। तस्माद्गरुडमारुह्य सायुधमात्मानमाकाशे दर्शयामि। कदाचिन्मां वासुदेवं मन्यमानास्ते साशङ्का अस्य राज्ञो योद्धृभिर्हन्यमाना नश्यन्ति। उक्तं च।

निर्विषेणापि सर्पेण कर्तव्या महती फटा।
विषं भवतु मा भूयात् फटाटोपो भयङ्करः ॥२२९॥

अथ यदि मम स्थानार्थं उद्यतस्य मृत्युर्भविष्यति। तदपि सुन्दरतरमेव। उक्तं च। गवार्थे ब्राह्मणार्थे च स्वाम्यर्थे स्त्रीकृते ऽथवा।
स्थानार्थे यस्त्यजेत् प्राणांस्तस्य लोकाः सनातनः ॥२३०॥

उक्तं च। चन्द्रे मण्डलसंस्थे विगृह्यते राहुणा दिनाधीशः।
शरणागतेन सार्द्धं विपदपि तेजस्विनां श्लाघ्या ॥२३१॥

एवं निश्चित्य दन्तधावनं कृत्वा तां प्रोवाच। सुभगे समस्तैः शत्रुभिर्हतैरन्नं पानीयं चास्वादयिष्यामि। किं बहुना त्वयापि सह सङ्गमं ततः करिष्यामि। परं वाच्यस्त्वयात्मपिता यत् प्रभाते प्रभूतेन सैन्येन

नगरान्निःक्रम्य योद्धव्यं। अहं चाकाशस्थित एव सर्वांस्तान् निस्तेजसः करिष्यामि। पश्चात् सुखेन भवता हन्तव्याः। यदि पुनरहं स्वयमेव तान् सूदयामि। तत् तेषां पापात्मनां वैकुण्ठगतिः स्यात्। तस्मात् ते तथा कर्तव्या यथा पलायमाना हन्यमानाः स्वर्गं न गच्छन्ति। सापि तदाकर्ण्य स्वयं गत्वा सर्वं पितुर्न्यवेदयत्। राजापि तस्या वाक्यं श्रद्दधानः प्रत्यूषे समुत्थाय सुसन्नद्धसैन्यो युद्धार्थं निश्चक्राम। कौलिको ऽपि मरणे कृतनिश्चयश्चापपाणिराकाशगतिर्युद्धाय प्रस्थितः। अत्रान्तरे भगवता नारायणेनातीतानागतवर्तमानवेदिना स्मृतमात्रो वैनतेयः सम्प्राप्तो विहस्य प्रोक्तः। भो गरुत्मन् जानासि त्वं यन्मम रूपेण कश्चित् कौलिको दारुमये गरुडे समारूढो राजकन्यकां कामयते। सो ऽब्रवीत्। देव सर्वं ज्ञायते तच्चेष्टितं। तत् किं कुर्मः साम्प्रतं। भगवानाह। अद्य कौलिको मरणनिश्चयः कृतनियमो युद्धार्थं विनिर्गतः। स नूनं क्षत्रियप्रधानशराहतो निधनमेष्यति। तस्मिन् हते सर्वो ऽपि जनो वदिष्यति। यत् प्रभूतक्षत्रियैर्मिलित्वा वासुदेवो गरुडश्च निपातितः। ततः परं लोको ऽयमावयोः पूजां न करिष्यति। तत् त्वं द्रुतं गत्वा तत्र दारुमये गरुडे सङ्क्रमणं कुरु। अहं कौलिकशरीरे प्रवेशं करिष्यामि। येन शत्रून् स व्यापादयति। शत्रुबधादावयोर्माहात्म्यवृद्धिर्भविष्यति। अथ गरुडे तथेति प्रतिपन्ने भगवान् नारायणस्तच्छरीरे सङ्क्रमणमकरोत्। ततो भगवन्माहात्म्येन स कौलिको गगणस्थः शङ्खचक्रगदाचापचिह्नितः क्षणेन लीलयैव समस्तानपि प्रधानक्षत्रियान् निस्तेजसश्चकार। ततस्तेन राज्ञा स्वसैन्यपरिवृतेन सङ्ग्रामे ते जिता निहताश्च। जातश्च लोकमध्ये प्रवादः। यथानेन विष्णुजामातृत्वप्रभावेन सर्वे शत्रवो निहता इति। कौलिको ऽपि तान् हतान् दृष्ट्वा प्रमुदितमना गगणादवतीर्णः। यावद्राजामात्यः पौरलोकाश्च तं नगरवास्तव्यं कौलिकं पश्यन्ति। ततः पृष्टः

किमेतदिति सो ऽपि मूलादारभ्य सर्वं प्रागवृत्तान्तं न्यवेदयत्। ततः कौलिके सहसानुरञ्जितमनसा शत्रुवधादवाततेजसा राज्ञा सा राजकन्यका सकलजनप्रत्यक्षं विवाहविधिना तस्मै समर्पिता। देशश्च प्रदत्तः। कौलिको ऽपि तया सार्द्धं पञ्चप्रकारं जीवलोकसारं विषयसुखमनुभवन् कालं निनायेति। अतः प्रोच्यते।

सुगुप्तस्यापि दम्भस्य ब्रह्माप्यन्तं न गच्छति।
कौलिको विष्णुरूपेण राजकन्यां निषेवते ॥२२२॥

तच्छ्रुत्वा करटक आह। भद्र अस्त्येवं। परं तथापि महन्मे भयं। यतो बुद्धिमान् सञ्जीवको रौद्रः सिंहः। तदसमर्थो ऽयं भवानेनं तस्माद्वियोजयितुं। सो ऽब्रवीत्। असमर्थो ऽपि समर्थ एव। उक्तं च यतः।

उपायेन हि तत् कुर्याद्यन्न शक्यं पराक्रमैः।
काक्या कनकसूत्रेण कृष्णसर्पो निपातितः ॥२२३॥

करटक आह। कथमेतत्। सो ऽब्रवीत्। अस्ति कस्मिंश्चित् कथा
प्रदेशे महान् न्यग्रोधपादपः। तत्र वायसदम्पती कृताश्रयौ प्रतिवस ॥६॥
तः। अथ तयोः प्रसवकाले तद्वृक्षविवरान्निःक्रम्य कृष्णसर्पः सदैव तदपत्यानि भक्षयति। ततस्तौ निर्वेदादन्यवृक्षमूलनिवासिनं प्रियसुहृदं गत्वा शृगालमूचतुः। भद्र किमेवंविधे सञ्जात आवयोः कर्तव्यं भवति। एष तावद्दुष्टात्मा कृष्णसर्पो वृक्षविवरान्निर्गत्यावयोर्बालकान् भक्षयति। तत् कथ्यतां तद्रक्षार्थं कश्चिदुपायः।

यस्य क्षेत्रं नदीतीरे भार्या च परसङ्गता।
गृहे सर्पाश्रयस्तस्य कथं स्याच्चित्तनिर्वृतिः ॥२२४॥

अन्यच्च। सर्पयुक्ते गृहे वासो मृत्युरेव न संशयः।
यद्ग्रामान्ते वसेत् सर्पस्तस्य स्यात् प्राणसंशयः ॥२२५॥

अस्माकमपि तत्र स्थितानां प्रतिदिनं प्राणसंशयः। शृगालः प्राह। नात्मविषये स्वल्पो ऽपि विषादः कार्यः। नूनं स लुब्धो नोपायं

विना बध्यः स्यात्। उक्तं च।

उपायेन जयो यादृग्रिपोस्तादृङ्न हेतिभिः।
उपायज्ञो ऽल्पकायो ऽपि न शूरैः परिभूयते ॥२३६॥

तथा च। भक्षयित्वा बहून् मत्स्यानुत्तमाधममध्यमान्।
अतिलौल्याद्बकः कश्चिन्मृतः कर्कटकग्रहात् ॥२३७॥

कथा ॥७॥

तावूचतुः। कथमेतत्। सो ऽब्रवीत्। अस्ति कस्मिंश्चिद्वनप्रदेशे नानाजलचरसनाथं महत्सरः। तत्र च कृताश्रयो बक एको वृद्धभावमुपागतो मत्स्यान् व्यापादयितुमसमर्थः। ततश्च क्षुत्क्षामकण्ठस्तस्य सरसस्तीरमुपविष्टो मुक्ताफलप्रकरसदृशैरश्रुप्रवाहैर्धरातलमभिषिञ्चन् रुरोद। नालेनेव स्थित्वा पादेनैकेन कुञ्चितग्रीवः कुमुदभ्रान्तिं जनयति धूर्तो बको बालमत्स्यानां। अथैकः कुलीरको नानाजलचरसमेतः समुपेत्य तस्य दुःखेन दुःखितः सादरमिदमूचे। माम किमद्य त्वया नाहारवृत्तिरनुष्ठीयते। केवलमश्रुपूर्णेन निःश्वासेनावस्थीयते। स आह। वत्स सत्यमुपलक्षितं भवता। अहं मत्स्यादः। परं मया वैराग्यतया साम्प्रतं प्रायोपवेशनं कृतं। तेनाहं समीपगतानपि मत्स्यान्न भक्षयामि। कुलीरकस्तच्छ्रुत्वा प्राह। माम किं तद्वैराग्यकारणं। स आह। वत्साहमस्मिन् सरसि जातो वृद्धिं गतश्च। तन्मयैव तच्छ्रुतं यद्द्वादशवार्षिकावृष्टिः सम्पद्यते लग्ना। कुलीरक आह। कस्माच्छ्रुतं भवता। बक आह। दैवज्ञमुखात्। यतः शनैश्चरो हि रोहिणीशकटं भित्त्वा भौमश्च शुक्रश्च प्रयास्यति। उक्तं च वराहमिहिरेण।

यदि भिन्ते सूर्यपुत्रो रोहिण्याः शकटमिह लोके च।
द्वादशवर्षाणि तदा न हि वर्षति माधवो भूमौ ॥२३८॥

तथा च। प्राजापत्ये शकटे भिन्ने कृत्वेव पातकं वासुधा।
भस्मास्थिसकलकीर्णा कापालिकमिव व्रतं धत्ते ॥२३९॥

तथा च। रोहिणीशकटमर्कनन्दनश्चेद्भिनत्ति रुधिरो ऽथवा शशी।
किं वदामि तदनिष्टसागरे सर्वलोकमुपयाति सङ्क्षयः ॥२४०॥

तथा च। रोहिणीशकटमध्यसंस्थिते चन्द्रमस्यशरणीकृता जनाः।
क्वापि यान्ति शिशुपाचिताशनाः सूर्यतप्तभिदुराम्बुपायिनः॥

तदेतत् सरः स्वल्पतोयं वर्तते। शीघ्रं शोषं यास्यति। अस्मिन् शुष्के यैः सहाहं वृद्धिं गतः सदैव क्रीडितश्च। ते सर्वे तोयाभावान्नाशं यास्यन्ति। तत् तेषां वियोगं द्रष्टुमहमसमर्थः। तेनैतत् प्रायोपवेशनं मया कृतं। साम्प्रतं सर्वे स्वल्पजलाशया जलचराः स्वजनैर्गुरुजलाशयेषु नीयन्ते। केचिच्च स्वयमेव मकरगोधाशिशुमारजलहस्तिप्रभृतयो गच्छन्ति। अत्र पुनः सरसि ये जलचरास्ते निश्चिन्तास्तिष्ठन्ति। तेनाहं विशेषाद्रोदिमि यद्बीजशेषमात्रमप्यत्र नोद्धरिष्यति। ततः स तदाकर्ण्यान्येषां जलचराणां तत्तस्य वचनं निवेदयामास। अथ ते सर्वे भयत्रस्तमनसो मत्स्यकच्छपप्रभृतय आगत्य तं बकं पप्रच्छुः। मामास्ति कश्चिदुपायो येनास्माकं रक्षा भवति। बकश्चाह। अस्त्यस्य जलाशयस्य नातिदूरे प्रभूतजलसनाथं पद्मिनीखण्डमण्डितं महत् सरः। यच्चतुर्विंशत्यापि वर्षैरवृष्टे ऽपि पर्जन्ये न शुष्यति। तद्यदि मम पृष्ठं कश्चिदारोहति तमहं तत्र नयामि। अथ ते जलचरा विश्वासमापन्नास्तात मातुल भ्रातरिति ब्रुवाणा अहं पूर्वमहं पूर्वमिति समन्तात् परितस्थुः। सो ऽपि दुष्टाशयस्तान् क्रमेण पृष्ठमारोप्य जलाशयस्य नातिदूराश्रयां विस्तीर्णां शिलां समासाद्य तस्यामाक्षिप्य स्वेच्छया भक्षयति। भूयो ऽपि जलाशयमागत्य जलचराणां मिथ्यावार्तासन्देशकैर्मनांसि नित्यमेव रञ्जयन्नाहारवृत्तिमकरोत्। अन्यस्मिन् दिवसे स कुलीरकेणोक्तः। माम मया सह ते प्रथमः स्नेहसम्भाषः सञ्जातः। तत् किं मां परित्यज्यान्यान् नयसि। तस्मादद्य मम प्राणत्राणं कुरु। तदाकर्ण्य सो ऽपि दुष्टाशयश्चिन्तितवान्। निर्विण्णो ऽहं मत्स्यमांसा

नां तस्मादेनं कुलीरकं व्यञ्जनस्थाने करोमि। बाढमित्युक्त्वा तं पृष्ठ समारोप्य तां वध्यशिलामुद्दिश्य प्रस्थितः। कुलीरको ऽपि दूरादेवास्थिपर्वतं शिलाश्रयं समुद्वीक्ष्य मत्स्यास्थीनि परिज्ञाय तमपृच्छत्। माम कियद्दूरे स जलाशयः। त्वं मदीयभारेणातिश्रान्तः। तत्कथय। सो ऽपि मन्दधीर्जलचरो ऽयमिति मत्वा न स्थले प्रभवत इति मत्वा सस्मितमिदमाह। कुलीरक कुतो ऽन्यजलाशयः। मम प्राणयात्रेयं। तस्मात् स्मर्यतामस्याभीष्टदेवता। त्वामप्यस्यां शिलायां प्रक्षिप्य भक्षयिष्यामीति। उक्तवति तस्मिन् स्वदशनसन्दंशेन मृणालनालधवलायां मृदुग्रीवायां गृहीतो मृतश्च। अथ स तां बकग्रीवां समादाय शनैः शनैस्तज्जलाशयमाससाद। ततः सर्वैरेव जलचरैः पृष्टः। भो कुलीरक किं निवृत्तस्त्वं। किं शकुनकारणं किञ्चित् सञ्जातं। सो ऽपि तव मातुलको न समायातः। तत् किं चिरयति। वयं सर्वे ऽपि सोत्सुकाः कृतक्षणास्तिष्ठामः। एवं तैरभिहिते कुलीरको विहस्य प्रोवाच। मूर्खाः सर्वे जलचरास्तेन मिथ्यावादिना वञ्चयित्वा नातिदूरे शिलातले प्रक्षिप्य भक्षिताः। तन्मयायुःशेषतया तस्य विश्वासघातकस्याभिप्रायं ज्ञात्वा ग्रीवेयं तस्यानीता। तदलं सम्भ्रमेण। अधुना सर्वेषां जलचराणां क्षेमं भविष्यति। अतो ऽहं ब्रवीमि।

भक्षयित्वा बहून् मत्स्यानुत्तमाधममध्यमान्।
अतिलौल्याद्बकः कश्चिन्मृतः कर्कटकग्रहात्॥२४२॥

वायस आह। भद्र तत् कथय कथं स दुष्टसर्पो वधमुपैष्यतीति। शृगाल आह। गच्छतु भवान् किञ्चिन्नगरं राजाधिष्ठानं। तत्र कस्यापि धनिनो राजामात्यादेः प्रमादिनः कनकसूत्रं हारं वा गृहीत्वा वृक्षकोटरे प्रक्षिप। येन स सर्पः सुखेन वध्यते। अथ काकः काकी च तत्क्षणादुड्डितौ कस्मिंश्चित् पुरे प्राप्तौ। ततश्च काकी किञ्चिदुपवनमध्ये गत्वा यावत् पश्यति। तावत् कस्यचिद्राज्ञो ऽन्तःपुरं जलासन्न

न्यस्तकनकसूत्रमुक्ताहारवस्त्राभरणं जलक्रीडां करोति। अथ सा वायसी कनकसूत्रमेकमादाय स्ववृक्षाभिमुखं प्रतस्थे। ततश्च कञ्चुकिनो वर्षधराश्च तन्नीयमानमुपलभ्य गृहीतलगुडहस्ताः सत्वरमनुययुः। काक्यपि सर्पकोटरे तत्कनकसूत्रं प्रक्षिप्य सुदूरतरमवस्थिता। अथ यावद्राजपुरुषास्तं वृक्षमारुह्य तत्कोटरमवलोकयन्ति। तावत् कृष्णसर्पः प्रसारितभोगस्तिष्ठति। ततस्तं लगुडप्रहारेण हत्वा कनकसूत्रमादाय यथाभिलषितं स्थानं गताः। वायसदम्पत्यपि ततः परं सुखेन वसतः स्म। अतो ऽहं ब्रवीमि।

उपायेन हि तत् कुर्याद्यन्न शक्यं पराक्रमैः।
काक्या कनकसूत्रेण कृष्णसर्पो निपातितः ॥२४३॥

तथा च।

उपेक्षितः क्षीणबलो ऽपि शत्रुः प्रमाददोषात् पुरुषैर्मदान्धैः।
साध्यो ऽपि भूत्वा प्रथमं ततो ऽसावसाध्यतां व्याधिरिव प्रयाति॥

तन्न किञ्चिदिह यद्बुद्धिमतामसाध्यमस्ति। उक्तं च।

यस्य बुद्धिर्बलं तस्य निर्बुद्धेस्तु कुतो बलं।
वने सिंहो मदोन्मत्तः शशकेन निपातितः ॥२४५॥

कथा ॥८॥

करटक आह। कथमेतत्। सो ऽब्रवीत्। कस्मिंश्चिद्वनमध्ये भासुरको नाम सिंहः प्रतिवसति स्म। अथासौ वीर्यातिरेकान्नित्यमेवानेकान् मृगशशकादीन् व्यापादयन्नोपरराम। अथान्येद्युस्तद्वनजाः सर्वे सारङ्गवराहमहिषगवयशशकादयो मिलित्वा तमभ्युपेत्य प्रोचुः। स्वामिन् किमनेन सकलमृगबधेन निःफलेन यतस्तवैकेनापि मृगेण तृप्तिर्भवति। तत् क्रियतामस्माभिः सह समयधर्मः। अद्य प्रभृति तवात्रोपविष्टस्यापि जातिक्रमेण प्रतिदिनमेको भक्षार्थं समेष्यति। एवं कृते तव तावत् प्राणयात्रा क्लेशं विना भविष्यति। अस्माकं पुनः सर्वोच्छेदनं न स्यात्। तदेष राजधर्मो ऽनुष्ठीयताम्। उक्तं च।

शनैः शनैश्च यो राज्यमुपभुङ्क्ते यथाफलं ।
रसायनमिव प्राज्ञः स पुष्टिं परमां व्रजेत् ॥२४६॥
विधिना मन्त्रयुक्तेन रूक्षापि मथितापि च ।
प्रयच्छति फलं भूमिररणीव हुताशनं ॥२४७॥
प्रजानां पालनं शस्यं स्वर्गकोशस्य वर्धनं ।
पीडनं धर्मनाशाय पापायायशसे स्थितं ॥२४८॥
गोपालेन प्रजाधेनोर्वित्तदुग्धं शनैः शनैः ।
पालनात् पोषणाद्ग्राह्यं न्याय्यां वृत्तिं समाचरेत् ॥२४९॥
अजा इव प्रजा हन्याद्यो मोहात् पृथिवीपतिः ।
तस्यैका जायते तृप्तिर्न द्वितीया कथञ्चन ॥२५०॥
फलार्थी नृपतिर्लोकान् पालयेद्यत्नमास्थितः ।
दानमानादितोयेन मालाकारोऽङ्कुरानिव ॥२५१॥
नृपदीपो धनस्नेहं प्रजाभ्यः संहरन्नपि ।
अन्तरस्थगुणैः शुभ्रैर्लक्ष्यते नैव केनचित् ॥२५२॥
यथा गौर्दुह्यते काले पाल्यते हि तथा प्रजाः ।
सिच्यते चीयते चैव लता पुष्पफलप्रदा ॥२५३॥
यथा बीजाङ्कुरः सूक्ष्मः प्रयत्नेनाभिरक्षितः ।
फलप्रदो भवेत् काले तद्वल्लोकः सुरक्षितः ॥२५४॥
हिरण्यं धान्यरत्नानि यानानि विविधानि च ।
तथान्यदपि यत्किञ्चित् प्रजाभ्यः स्यान्महीपतेः ॥२५५॥
लोकानुग्रहकर्तारः प्रवर्धन्ते नरेश्वराः ।
लोकानां सङ्क्षयाच्चैव क्षयं यान्ति न संशयः ॥२५६॥

अथ तेषां तद्वचनमाकर्ण्य भासुरक आह । अहो सत्यमभिहितं भवद्भिः । परं यदि ममोपविष्टस्यात्र नित्यमेव नैकः श्वापदः समागमिष्यति । तन्नूनं सर्वानपि भक्षयिष्यामि । अथ ते तथेति प्रतिज्ञाय नि

वृत्तिभाजस्तत्रैव वने निर्भयाः पर्यटन्ति। एकश्च प्रतिदिनं क्रमेणायाति। वृद्धो वा वैराग्ययुक्तो वा शोकग्रस्तो वा पुत्रकलत्रनाशभीतो वा तेषां मध्यात् तस्य भोजनार्थं मध्याह्नसमय उपतिष्ठते। अथ कदाचिज्जातिक्रमाच्छशकस्यावसरः समायातः। प्रेषितश्चानिच्छन्नपि समस्तमृगैः। सो ऽपि मन्दं मन्दं गत्वा वेलातिक्रमं विधाय व्याकुलितहृदयस्तस्य वधोपायं चिन्तयन् दिनशेषे प्राप्तः। सिंहो ऽपि वेलातिक्रमेण क्षुत्क्षामकण्ठः कोपाविष्टः सृक्किणी परिलेलिहन् व्यचिन्तयत्। अहो मया प्रातर्निःसत्त्वं वनं कर्तव्यं। एवं चिन्तयतस्तस्य शशको मन्दं मन्दं गत्वा प्रणम्य तस्याग्रे स्थितः। अथ तं चिरादायातमन्यच्च लघुतरमवलोक्य कोपप्रज्वलितात्मा तं निर्भर्त्सयन्नाह। रे शशकाधम एकस्तावल्लघुस्त्वं सम्प्राप्तो ऽपरं वेलातिक्रमेण। तस्मादपराधात् त्वां निपात्य प्रातः सकलान्यपि सत्त्वान्युच्छेदयिष्यामि। अथ शशकः प्रणम्य सविनयं प्रोवाच। स्वामिन् नात्रापराधो मम न चापरेषां सत्त्वानां। तच्छ्रूयतां कारणं। सिंह आह। तत् सत्वरं निवेदय यावत् मम दंष्ट्रान्तर्गतो भवान् न भविष्यति। शशक आह। स्वामिन् समस्तमृगैरद्य ज्ञातिक्रमेण मम लघुतरस्य प्रस्तावं विज्ञाय ततो ऽहं पञ्चशशकैः सह प्रेषितः। ततश्चाहमन्तराल आगच्छन् महता केनचिदपरसिंहेन विवरान्निर्गत्याभिहितः। रे क्व प्रस्थिता यूयं। अभीष्टदेवतां स्मरत। ततो मयाभिहितं। वयं स्वामिनो भासुरकसिंहस्य सकाश आहारार्थं समयधर्मेण गच्छामः। ततस्तेनाभिहितं। यद्येवं तर्हि मदीयमेतद्वनं मया सह समयधर्मेण समस्तैरपि श्वापदैर्वर्तितव्यं। चौररूपी स भासुरकः। अथ यदि सो ऽत्र राजा ततो विश्वासस्थाने चतुरः शशकानत्र धृत्वा तमाहूय द्रुततरमागच्छ। येन यः कश्चिदावयोर्मध्यात् पराक्रमेण राजा भविष्यति। स सर्वानेतान् मृगान् भक्षयिष्यति। ततो ऽहं तेनादिष्टः स्वामिसकाशमभ्यागतः। एतद्वेलातिक्रमकारणं। तदत्र

स्वामी प्रमाणं। तच्छ्रुत्वा भासुरक आह। भद्र यद्येवं तत् सत्वरं दर्शय मे तं चौरसिंहं। येनाहं मृगकोपं तस्योपरि क्षपयित्वा स्वस्थो भवामि। उक्तं च।

भूमिर्मित्रं हिरण्यं च विग्रहस्य पदत्रयं।
नास्त्येकमपि यद्येषां न तत् कुर्यात् कथञ्चन ॥२५७॥
यत्र न स्यात् फलं भूरि यत्र च स्यात् पराभवः।
न तत्र मतिमान् युद्धं समुत्पाद्य समाचरेत् ॥२५८॥

शशक आह। स्वामिन् सत्यमिदं। स्वभूमिहेतोः परिभावाच्च युध्यन्ते क्षत्रियाः। परं स दुर्गाश्रयमाश्रित्य दुर्गाणि क्रमतीव। तेन वयं विष्कम्भिताः। ततो दुर्गस्थो दुःसाध्यो रिपुर्भवति। उक्तं च।

न गजानां सहस्रेण न च लक्षेण वाजिनां।
यत् कृत्यं साध्यते राज्ञां दुर्गेणैकेन सिध्यति ॥२५९॥
शतमेको ऽपि सन्धत्ते प्राकारस्थो धनुर्धरः।
तस्माद्दुर्गं प्रशंसन्ति नीतिशास्त्रविचक्षणाः ॥२६०॥
पुरा गुरोः समादेशाद्धिरण्यकशिपोर्भयात्।
शक्रेण विहितं दुर्गं प्रभावाद्विश्वकर्मणः ॥२६१॥
तेनापि च वरो दत्तो यस्य दुर्गं स भूपतिः।
विजयी स्यात् ततो भूमौ दुर्गाणि स्युः सहस्रशः ॥२६२॥
दंष्ट्राविरहितो नागो मदहीनो यथा गजः।
सर्वेषां जायते वश्यो दुर्गहीनस्तथा नृपः ॥२६३॥

तच्छ्रुत्वा भासुरक आह। भद्र दुर्गस्थमपि तं चौरं दर्शय मम येनाहं व्यापादयामि। उक्तं च यतः।

जातमात्रं न यः शत्रुं रोगं च प्रशमं नयेत्।
महाबलो ऽपि तेनैव वृद्धिं प्राप्य स हन्यते ॥२६४॥
आत्मनः शक्तिमुद्वीक्ष्य मानोन्मादं तु यो व्रजेत्।

शत्रून् हन्यात् स एको ऽपि क्षत्रियान् भार्गवो यथा ॥२६५॥

शशक आह। अस्त्येतत्। तथापि बलवान् स मया दृष्टः। तन्न युज्यते स्वामिनस्तस्य सामर्थ्यमविज्ञाय गन्तुं। उक्तं च यतः।

अविदित्वात्मनः शक्तिं परस्य च समुत्सुकः।
गच्छन्नभिमुखो नाशं याति वह्नौ पतङ्गवत् ॥२६६॥
यो बलप्रोन्नतं याति निहन्तुं सबलो ऽप्यरिं।
विमदः स निवर्तेत शीर्णदन्तो यथा गजः ॥२६७॥

भासुरक आह। भो किं तवानेन व्यापारेण। दर्शय मे तं दुर्गस्थमपि। शशक आह। यद्येवं तदागच्छतु स्वामी। एवमुक्त्वाग्रे व्यवस्थितः। ततश्च कश्चित् कूपमासाद्य भासुरकमाह। स्वामिन् कस्ते प्रतापं सोढुं समर्थः। येन त्वां दृष्ट्वासौ दूरतो ऽपि चौरः प्रविष्टः स्वदुर्गं। तदागच्छ येन दर्शयामीति। तच्छ्रुत्वा भासुरक आह। भद्र सत्वरं दर्शय मे दुर्गं। तदनुदर्शितस्तेन कूपः। सो ऽपि मूर्खः सिंहः कूपमध्य आत्मनः प्रतिबिम्बं जलमध्यगतं दृष्ट्वा सिंहनादं मुमोच। ततस्तत्प्रतिशब्देन द्विगुणतरो नादः कूपात् समुत्थितः। अथासौ तं नादमाकर्ण्य शक्ततरो ऽयमिति मत्वा आत्मानं तस्योपरि क्षिप्त्वा प्राणान् मुमोच। शशको ऽपि हृष्टमनाः सर्वान् मृगानभिनन्द्य तैः प्रशस्यमानो यथासुखं तत्र वने वसति स्म। अतो ऽहं ब्रवीमि।

यस्य बुद्धिर्बलं तस्य निर्बुद्धेस्तु कुतो बलं।
वने सिंहो मदोन्मत्तः शशकेन निपातितः ॥२६८॥

तद्यदि भवान् कथयति तत् तत्रैव गत्वा तयोः स्वबुद्धिप्रभावेन मित्रभेदं करोमि। करटक आह। भद्र यद्येवं तच्छिवास्ते पन्थानः सन्तु। यथाभिप्रेतमनुष्ठीयतां। अथ दमनकः सञ्जीवकवियुक्तं पिङ्गलकमवलोक्य तत्रान्तरे प्रणम्याग्रे समुपविष्टः। पिङ्गलको ऽपि तमाह। भद्र किं

चिराद्दृष्टः। दमनक आह। न किञ्चिद्देवपादानामस्माभिः प्रयोजनं। तेनाहं नागच्छामि। तथापि राजप्रयोजनविनाशमवलोक्य दन्दह्यमानहृदयो व्याकुलतया स्वयमेवाभ्यागतो वक्तुं। उक्तं च यतः॥

प्रियं वा यदि वा द्वेष्यं शुभं वा यदि वाशुभं।
अपृष्टो ऽपि हि तं वदेद्यस्य नेच्छेत् पराभवं ॥२६९॥

अथ तस्य साभिप्रायं तद्वचनमाकर्ण्य पिङ्गलक आह। किं वक्तुमना भवान्। तत्कथ्यतामिति। स प्राह। देवायं सञ्जीवको युष्मत्पादानामुपरि द्रोहबुद्धिरिति। विश्वासगतस्य मम विजन इदमाह। भो दमनक दृष्टा मयास्य पिङ्गलकस्य सारासारता। तदहमेनं हत्वा सकलमृगाधिपत्यं त्वत्साचिव्यपदवीसमन्वितं करिष्यामि। तद्वज्रसारप्रहारसदृशं दारुणं वचः समाकर्ण्य मोहमुपगतो न किञ्चिदप्युक्तवान्। दमनको ऽपि तस्य तमाकारमवलोक्य चिन्तितवान्। अयं तावत् सञ्जीवकनिबद्धरागः। तन्नूनमनेन मन्त्रिणा राजा विनाशमवाप्स्यतीति। उक्तं च।

एकं भूमिपतिः करोति सचिवं राज्ये प्रमाणं यदा।
तं मोहाच्छ्रयते मदः स च मदाद्दास्येन निर्विद्यते॥
निर्विण्णस्य पदं करोति हृदये तस्य स्वतन्त्रस्पृहा।
स्वातन्त्र्यस्पृहया ततः स नृपतेः प्राणेष्वभिद्रुह्यते॥२७०॥

तत् किमत्र युक्तमिति। पिङ्गलको ऽपि चेतनां समासाद्य कथमपि तमाह। दमनक सञ्जीवकस्तावदस्माकं प्राणसमो भृत्यः। स कथं ममोपरि द्रोहबुद्धिं करोति। दमनक आह। देव भृत्यो न भृत्य इत्यनैकान्तिकमेतत्। उक्तं च।

न सो ऽस्ति पुरुषो राज्ञां यो न कामयते श्रियं।
अशक्ता एव सर्वत्र नरेन्द्रं पर्युपासते॥२७१॥

पिङ्गलक आह। भद्र तथापि मम तस्योपरि चित्तवृत्तिर्न विकृतिं

याति। अथवा साधिदमुच्यते।

अनेकदोषदुष्टो ऽपि कायः कस्य न वल्लभः।
कुर्वन्नपि व्यलीकानि यः प्रियः प्रिय एव स ॥२७२॥

दमनक आह। अत एवायं दोषः। उक्तं च।

यस्मिन्नेवाधिकं चक्षुरारोपयति पार्थिवः।
अकुलीनः कुलीनो वा स श्रियो भाजनं नरः ॥२७३॥

अपरं केन गुणविशेषेण स्वामी सञ्जीवकं निर्गुणमपि निकटे धारयति। अथ देव यद्येवं चिन्तयसि। महाकायो ऽयमनेन रिपून् व्यापादयिष्यामीति। तदस्मान्न सिध्यति। यतो ऽयं शष्पभोजी देवपादानां पुनः शत्रवो मांसाशिनः। तद्रिपुसाधनमस्य सहायत्वेन न भवति। तस्मादेनं दूषयित्वा हन्यतामिति। पिङ्गलक आह।

उक्तो भवति यः पूर्वं गुणवानिति संसदि।
तस्य दोषो न वक्तव्यः प्रतिज्ञाभङ्गभीरुणा ॥२७४॥

अन्यच्च मयास्य तव वचनेनाभयप्रदानं दत्तं। तत् कथं स्वयमेव व्यापादयिष्यामि। तत् सर्वथा सञ्जीवको ऽयं सुहृदस्माकं। न तं प्रति कश्चिन्मन्युरिति। उक्तं च।

यतः सदैन्यं प्राप्ता श्रीर्नीत एवार्हति क्षयं।
विषवृक्षो ऽपि संवर्ध्य स्वयं छेत्तुमसाम्प्रतं ॥२७५॥

तथा च। आदौ न चाप्रणयिनां प्रणयो विधेयो
दत्तो ऽथवा प्रतिदिनं परिपोषणीयः।
उत्क्षिप्य यत् क्षिपति तत् प्रकरोति लज्जां
भूमौ स्थितस्य पतनाद्भयमेव नास्ति ॥२७६॥

तथा च। उपकारिषु यः साधुः साधुत्वे तस्य को गुणः।
अपकारिषु यः साधुः स साधुः सद्भिरिष्यते ॥२७७॥

तद्द्रोहबुद्धेरपि मयास्य न विरुद्धमाचरणीयं। दमनक आह। स्वामिन्

नैष राजधर्मो यद्द्रोहबुद्धिरपि हन्यते ।

उक्तं च । तुल्यार्थं तुल्यसामर्थ्यं मर्मज्ञं व्यवसायिनं ।
अर्द्धराज्यहरं भृत्यं यो न हन्यात् स हन्यते ॥२७८॥

अपरं त्वयास्य मित्रत्वात् सर्वो राजधर्मः परित्यक्तः । राजधर्माभावात् सर्वो ऽपि परिजनो विरक्तः । यतः सञ्जीवकः शष्पभोजी भवान् मांसादस्तव प्रकृतयश्च । स्वप्रकृतिरपि तत्रैवाध्यवसायेन हिंसापराङ्मुखीव भाति । तत्तव व्यवसायवाह्यं कुतस्तेषां मांसाशनं । अतः सर्वे ऽपि परिचरास्तव मांसादास्तद्रहितं त्वां त्यक्त्वा यास्यन्ति वनान्तरं । ततो ऽपि त्वं विनष्ट एवास्य सङ्गत्या । न पुनस्ते कदाचिदाखेटके गतिर्भविष्यति । उक्तं च ।

यादृशैः सेव्यते भृत्यैर्यादृशांश्चोपसेवते ।
कदाचिन्नात्र सन्देहस्तादृग्भवति पूरुषः ॥२७९॥

तथा च । सन्तप्तायसि संस्थितस्य पयसो नामापि न ज्ञायते
मुक्ताकारतया तदेव नलिनीपत्रस्थितं राजते ।
स्वातौ सागरशुक्तिकुक्षिपतितं तज्जायते मौक्तिकं
प्रायेणाधममध्यमोत्तमगुणः संवासतो जायते ॥२८०॥

तथा च । असतां सङ्गदोषेण साधवो यान्ति विक्रियां ।
दुर्योधनप्रसङ्गेन भीष्मो गोहरणं गतः ॥२८१॥

अत एव सन्तो नीचबन्धं वर्जयन्ति । उक्तं च ।

न ह्यविज्ञातशीलाय प्रदातव्यः प्रतिश्रयः ।
मत्कुणस्य तु दोषेण हता मन्दविसर्पिणी ॥२८२॥

कथा ॥१॥ पिङ्गलक आह । कथमेतत् । सो ऽब्रवीत् । अस्ति कस्यचिन्महीपतेः कस्मिंश्चित् स्थाने मनोरमं शयनं । तत्र शुक्लतरपटयुगलमध्यसंस्थिता मन्दविसर्पिणी नाम श्वेता यूका प्रतिवसति स्म । सा च तस्य महीपतेः रक्तमास्वादयन्ती सुखेन कालं नयमाना तिष्ठति ।

अथान्येद्युस्तत्र शयने कश्चिद्भ्राम्यन्नग्निमुखो नाम मत्कुणः समायातः। अथ तं दृष्ट्वा सा विषण्णवदना प्रोवाच। भो ऽग्निमुख कुतस्त्वमत्रानुचितस्थाने समायातः। तद्यावन्न कश्चिद्वेत्ति तावच्छीघ्रं गम्यतामिति। स आह। भगवति गृहे आगतस्यासाधोरपि नैतद्युज्यते वक्तुं। उक्तं च।

एह्यागच्छ समाश्रयासनमिदं कस्माच्चिराद्दृश्यसे
का वार्त्ता अतिदुर्बलो ऽसि कुशलं प्रीतो ऽस्मि ते दर्शनात्।
एवं नीचजने ऽपि युज्यति गृहं प्राप्ते सतां सर्वदा
धर्मो ऽयं गृहमेधिनां निगदितः स्मार्त्तैर्लघुः स्वर्गदः ॥२८३॥

अपरं मयानेकमानुषाणामनेकविधरुधिराण्यास्वादितान्याहारदोषात्क्षारकटुतिक्तकषायाम्लरसास्वादानि। न च मया कदाचिन्मधुररक्तमास्वादितं। तद्यदि त्वं प्रसादं करोषि। तदस्य भूपतेर्विविधव्यञ्जनपक्वान्नचूष्यलेह्यखाद्याहारवशादस्य शरीरे यन्मिष्टरक्तं संजातं। तस्यास्वादनेन सौख्यं सम्पादयामि जिह्वया। उक्तं च।

रङ्कस्य भूपतेर्वापि जिह्वासौख्यं समं स्मृतं।
तन्मात्रं च स्मृतं सारं तदर्थं यतते जनः ॥२८४॥

तथा च। यद्येव न भवेल्लोके कर्म जिह्वाप्रतुष्टिदं।
तन्न भृत्यो भवेत् कश्चित् कस्यचित् वशगो ऽथवा ॥२८५॥

अन्यच्च। यदसत्यं वदेन्मर्त्यो यद्वासेव्यं च सेवते।
यद्गच्छति विदेशं च तत् सर्वमुदरार्थतः ॥२८६॥

तन्मया गृहागतेन बुभुक्षया पीड्यमानेन त्वत्सकाशाद्भोजनमर्थनीयं। तन्न त्वयैकाकिन्यास्य भूपते रक्तभोजनं कर्तुं युज्यते। तच्छ्रुत्वा मन्दविसर्पिण्याह। भो मत्कुण अहमस्य भूपते रक्तमास्वादयामि। परं निद्रावशगतस्य त्वं पुनरग्निमुख चपल। तद्यदि मया सह रक्तपानं करोषि तत्तिष्ठ। अभीष्टतरं रक्तमास्वादय। सो ऽब्रवीत्। भगवत्येवं

करिष्यामि । यावत् त्वं नास्वादयसि प्रथमं भूपते रक्तं तावन्मम देव गुरुकृतः शपथः स्यात् । एवं तयोः परस्परं वदतोः स राजा तच्छयनमासाद्य प्रसुप्तः । अथासौ मत्कुणो जिह्वालौल्योत्कृष्टौत्सुक्याज्जाग्रतमपि तं महीपतिमदशत् । अथ वा साध्विदमुच्यते ।

स्वभावो नोपदेशेन शक्यते कर्तुमन्यथा ।
सुतप्तमपि पानीयं पुनर्गच्छति शीततां ॥२८७॥
यदि स्याच्छीतलो वह्निः शीतांशुर्दहनात्मकः ।
तत् स्वभावो ऽत्र मर्त्यानां शक्यते कर्तुमन्यथा ॥२८८॥

अथासौ महीपतिः सूच्यग्रविद्ध इव तच्छयनं त्यक्त्वा तत्क्षणादेवोत्थितः । अहो ज्ञायतामत्र प्रच्छादनपटे मत्कुणो यूका वा नूनं तिष्ठति । येनाहं दष्ट इति । अथ ये कञ्चुकिनस्तत्र स्थितास्ते प्रच्छादनपटं सत्वरं प्रसार्य सूक्ष्मदृष्ट्या वीक्षां चक्रुः । अत्रान्तरे स मत्कुणो ऽतिचापल्यात् खट्वान्तं प्रविष्टः । सापि मन्दविसर्पिणी वस्त्रसन्ध्यन्तर्गता तैर्दृष्टा व्यापादिता च । अतो ऽहं ब्रवीमि ।

न ह्यविज्ञातशीलाय प्रदातव्यः प्रतिश्रयः ।
मत्कुणस्य तु दोषेण हता मन्दविसर्पिणी ॥२८९॥

एवं ज्ञात्वा त्वयैष वध्यः । नो चेत् त्वां व्यापादयिष्यति । उक्तं च ।

त्यक्ताश्चाभ्यन्तरा येन बाह्याश्चाभ्यन्तरीकृताः ।
स एव मृत्युमाप्नोति यथा राजा ककुद्रुमः ॥२९०॥

कथा ॥१०॥ पिङ्गलक आह । कथमेतत् । सो ऽब्रवीत् । कस्मिंश्चिद्वनप्रदेशे चण्डरवो नाम शृगालः प्रतिवसति स्म । स कदाचित् क्षुधाविष्टो जिह्वालौल्यान्नगरान्तरे प्रविष्टः । अथ तं नगरवासिनः सारमेया अवलोक्य सर्वतः परिधावन्तं तीक्ष्णदंष्ट्राग्रैर्भक्षितुमारब्धाः । सो ऽपि तैर्भक्ष्यमाणः प्राणभयात् प्रत्यासन्नं रजकगृहं प्रविष्टः । तत्र च नीलीरसपरिपूर्णं महाभाण्डं सज्जीकृतमासीत् । तत्रापि सारमेयैः समन्वितः

पपात। अथ यावन्निष्क्रान्तस्तावन्नीलीवर्णः समं सञ्जातः। ततः सर्वे ते सारमेयास्तं शृगालविशेषमजानन्तो यथाभीष्टदिशं जग्मुः। चण्डरवो ऽपि तदन्तरमासाद्य काननाभिमुखं प्रतस्थे। नैव नीलीवर्णेन कदाचित् त्यज्यते। उक्तं च।

वज्रलेपस्य मूर्खस्य नारीणां मर्कटस्य च।
एको ग्राहस्तु नीचानां नीलीमद्यपयोस्तथा ॥२११॥

अथ तं हरगलगरलतमालसमप्रभमपूर्वं सत्त्वमवलोक्य सर्वे सिंहव्याघ्रद्वीपिवृकप्रभृतयो ऽरण्यनिवासिनो भयव्याकुलीकृतमनसः समन्तात् पलायनक्रियां कुर्वन्ति कथयन्ति च। अहो अपूर्वमेतत् सत्त्वं कुतो ऽप्यागतं। तन्न विज्ञायते। कीदृगस्य चेष्टितं पौरुषं च। तद्दूरतरं गच्छामः। उक्तं च।

न यस्य चेष्टितं विद्यान्न कुलं न पराक्रमं।
न तस्य विश्वसेत् प्राज्ञो यदीच्छेच्छ्रियमात्मनः ॥२१२॥

चण्डरवो ऽपि तान् भयव्याकुलितान् विज्ञायेदमाह। भो भो श्वापदाः किं यूयं मां दृष्ट्वैवं सन्त्रस्ता व्रजथ। तन्न भेतव्यं। अहं ब्रह्मणाद्य स्वयमेवाकार्याभिहितः। यच्छ्वापदानां मध्ये कश्चिद्राजा नास्ति। तत्त्वं मयाद्य सर्वश्वापदप्रभुत्वे ऽभिषिक्तः ककुद्रुमाभिधः। ततो गत्वा क्षितितले तान् सर्वान् परिपालयेति। ततो ऽहमत्रागतः। तन्मम छत्रच्छायायां सर्वैरेव श्वापदैः सदैव वस्तव्यमिति। अहं ककुद्रुमो नाम राजा त्रैलोक्ये श्वापदराजा सञ्जातः। तच्छ्रुत्वा ते श्वापदाः सिंहपुरःसराः स्वामिन् प्रभो समादिशेति वदन्तस्तं परिवव्रुः। अथ तेन सिंहस्यामात्यपदवी प्रदत्ता। व्याघ्रस्य च शय्यापालत्वं। द्वीपिनस्ताम्बूलाधिकारः। करिणः प्रतीहारत्वं। वानरस्य छत्रधारत्वं। ये चात्मीयज्ञात्यास्तैः सहालापमात्रमपि न करोति। शृगालाः सर्वे ऽप्यर्धचन्द्रं दत्त्वा निःसारिताः। एवं तस्य राजक्रियायां वर्तमानस्य ते सिंहा

दयो मृगान् व्यापाद्य तत्पुरतः प्रक्षिपन्ति। सो ऽपि प्रभुधर्मेण सर्वेषां तान् विभज्य प्रयच्छति। एवं गच्छति काले कदाचित् तेन सभागतेन दूरदेशे शब्दायमानस्य शृगालवृन्दस्य कोलाहलो ऽश्रावि। तं शब्दं श्रुत्वा पुलकिततनुरानन्दाश्रुपरिपूर्णनयन उत्थाय तारस्वरेण विरोतुमारब्धवान्। अथ ते सिंहादयस्तमाकर्ण्य तारस्वरं शृगालो ऽयमिति मत्वा सलज्जमधोमुखाः क्षणमेकं स्थित्वा मिथः प्रोचुः। भो वाहिता वयमनेन क्षुद्रशृगालेन तद्वध्यतां वध्यतामिति। सो ऽपि तदाकर्ण्य पलायितुमिच्छन्ननुचितस्थाने ऽपि सिंहादिभिः खण्डशः कृतो मृतश्चेति। अतो ऽहं ब्रवीमि।

त्यक्ताश्चाभ्यन्तरा येन बाह्याश्चाभ्यन्तरीकृताः।
स एव मृत्युमाप्नोति यथा राजा ककुद्रुमः॥२१३॥

तदाकर्ण्य पिङ्गलक आह। भो दमनक कः प्रत्ययो ऽत्र विषये यत् स ममोपरि दुष्टबुद्धिः। स आह। देवाद्य ममाग्रे तेन निश्चयः कृतः। यत् प्रभाते पिङ्गलकं वधिष्यामि। तदत्र विषय एष एव प्रत्ययः। प्रभाते ऽवसरवेलायामारक्तमुखनयनः स्फुरिताधरो दिशो ऽवलोकयन्ननुचितस्थानोपविष्टस्त्वां क्रूरदृष्ट्या विलोकयिष्यति। एवं ज्ञात्वा यदुचितं तत् कर्तव्यमिति। एवमुक्त्वा तं प्रणम्य सञ्जीवकमुद्दिश्य प्रस्थितः। सञ्जीवको ऽपि सोद्वेगाकारं मन्दं मन्दं समायान्तं वीक्ष्य सादरं तमुवाच। भो मित्र स्वागतं ते। चिराद्दृष्टो ऽसि। शिवमपि भवतः। तत् कथय येनादेयमपि तुभ्यं गृहागताय प्रयच्छामि। उक्तं च यतः।

ते धन्यास्ते विवेकज्ञास्ते सभ्या इह भूतले।
आगच्छन्ति गृहे येषां कार्यार्थं सुहृदो जनाः॥२१४॥

दमनक आह। भो कथं शिवं सेवकजनस्य। उक्तं च।

सम्पत्तयः परायत्ताः सदा चित्तमनिर्वृतं।

स्वजीविते ऽप्यविश्वासस्तेषां ये राजसेवकाः ॥२९५॥

तथा च। सेवया धनमिच्छद्भिः सेवकैः पश्य यत् कृतं।
स्वातन्त्र्यं यच्छरीरस्य मूढैस्तदपि हारितं ॥२९६॥

अन्यच्च। तावज्जन्मापि दुःखाय ततो दुर्गतता सदा।
तत्रापि सेवया वृत्तिरहो कष्टपरम्परा ॥२९७॥

जीवन्तो ऽपि मृताः पञ्च व्यासेन परिकीर्तिताः।
दरिद्रो व्याधितो मूर्खः प्रवासी नित्यसेवकः ॥२९८॥

नाश्नाति स्वेच्छयौत्सुक्याद्विनिद्रो न प्रबुध्यते।
न निःशङ्कं वचो ब्रूते सेवको ऽप्यत्र जीवति ॥२९९॥

सेवा स्ववृत्तिराख्याता यैस्तैर्मिथ्या प्रजल्पितं।
स्वच्छन्दं चरति चात्र सेवकः परशासनात् ॥३००॥

भूशय्या ब्रह्मचर्यं च कृशत्वं लघुभोजनं।
सेवकस्य यतेर्यद्वद्विशेषः पापकर्मजः ॥३०१॥

शीतातपादिकष्टानि सहते यानि सेवकः।
धनाय तानि चाल्पानि यदि धर्मान्न मुच्यते ॥३०२॥

मृदुनापि सुवृत्तेन सुमृष्टेनापि हारिणा।
मोदकेनापि किं तेन निष्पत्तिर्यस्य सेवया ॥३०३॥

सञ्जीवक आह। अथ भवान् किं वक्तुमनाः। सो ऽब्रवीत्। मित्र सचिवानां न मन्त्रभेदं कर्तुं युज्यते। उक्तं च यतः।

यो मन्त्रं स्वामिनो भिन्द्यात् साचिव्ये सन्नियोजितः।
स हत्वा नृपतेः कार्यं स्वयं च नरकं व्रजेत् ॥३०४॥

येन यस्य कृतो भेदः सचिवेन महीपतेः।
तेन शस्त्रवधस्तस्य कृत इत्याह नारदः ॥३०५॥

तथापि मया तव स्नेहपाशबद्धेन मन्त्रभेदः कृतः। यतस्त्वं मम वचनेनात्र राजकुले विश्वस्तः प्रविष्टश्च। उक्तं च।

विश्रम्भाढ्यस्य यो मृत्युमवाप्नोति कथञ्चन ।
तस्य हत्या तदुत्थानं प्राहेदं वचनं मनुः ॥ ३०६ ॥

तत्त्वोपरि पिङ्गलको ऽयं दुष्टबुद्धिः । कथितं चाद्यानेन मत्पुरतश्चतुष्कर्णतया यत् प्रभाते सञ्जीवकं हत्वा समस्तं मृगपरिवारं चिरात् तृप्तिं नेष्यामि । ततः स मयोक्तः । स्वामिन्नयुक्तमिदं यन्मित्रद्रोहेण जीवनं क्रियत इति । उक्तं च यतः ।

अपि ब्रह्मवधं कृत्वा प्रायश्चित्तेन शुध्यति ।
तदर्हेण विचीर्णेन न कथञ्चित् सुहृद्वधः ॥ ३०७ ॥

ततस्तेनाहं सामर्षेणोक्तः । भो दुष्टबुद्धे सञ्जीवकस्तावच्छष्पभोजी वयं मांसाशिनः । तदस्माकं स्वाभाविकं वैरमिति । तत् कथमात्मसकाशे रिपुरुपेक्ष्यते । तस्मात् सामादिभिरुपायैर्हन्यतामिति । न च हते तस्मिन् दोषः स्यात् । उक्तं च ।

दत्वापि कन्यकां वैरी निहन्तव्यो विपश्चिता ।
अन्योपायैरशक्यो यो हते दोषो न विद्यते ॥ ३०८ ॥
कृत्याकृत्यं न मन्येत क्षत्रियो युधि सङ्गतः ।
प्रसुप्तो द्रोणपुत्रेण धृष्टद्युम्नः पुरा हतः ॥ ३०९ ॥

तदहं तस्य निश्चयं ज्ञात्वा त्वत्सकाशमिहागतः । साम्प्रतं मे नास्ति विश्वासघातकदोषः । मया सुगुप्तमन्त्रस्तव निवेदितः । तत्ते प्रतिभाति तत् कुरुष्वेति । अथ सञ्जीवकस्तस्य तद्वचनं वज्रपातदारुणं श्रुत्वा क्षणं मोहमुपागतः । पश्चाच्चेतनं लब्ध्वा सवैराग्यमिदमाह । अहो साध्विदमुच्यते ।

दुर्जनगम्या नार्यः प्रायेणास्नेहवान् भवति राजा ।
कृपणानुसारि च धनं मेघो गिरिजलधिवर्षी च ॥ ३१० ॥
अहं हि सम्मतो राज्ञो य एवं मन्यते कुधीः ।
बलीवर्दः स विज्ञेयो विषाणपरिवर्जितः ॥ ३११ ॥

वरं वनं वरं भैक्ष्यं वरं भारोपजीवनं ।
वरं व्याधिर्मनुष्याणां नाधिकारेण सम्पदः ॥३१२॥

तदयुक्तं मया कृतं। यदनेन सह मैत्री कृता। उक्तं च यतः।

ययोरेव समं वित्तं ययोरेव समं कुलं।
तयोर्मैत्री विवाहश्च न तु पुष्टविपुष्टयोः ॥३१३॥

तथा च। मृगा मृगैः सङ्गमनुव्रजन्ति गावश्च गोभिस्तुरगास्तुरङ्गैः।
मूर्खाश्च मूर्खैः सुधियः सुधीभिः समानशीलव्यसनेषु सख्यं॥

तद्यदि गत्वा तं प्रसादयिष्यामि। तथापि न मे प्रसादं यास्यति। उक्तं च यतः।

निमित्तमुद्दिश्य हि यः प्रकुप्यति ध्रुवं स तस्यापगमे प्रशाम्यति।
अकारणद्वेषपरो हि यो भवेत् कथं नरस्तं परितोषयिष्यति ॥३१५॥

अहो साधिदमुच्यते।

भक्तानामुपकारिणां परहितव्यापारयुक्तात्मनां।
सेवासंव्यवहारतत्त्वविदुषां द्रोहच्युतानामपि।
व्यापत्तिः स्खलितान्तरेषु नियता सिद्धिर्भवेद्वा न वा।
तस्मादम्बुपतेरिवावनिपतेः सेवा सदा शङ्किनी ॥३१६॥

तथा च। भावस्निग्धैरुपकृतमपि द्वेष्यतां याति लोके।
साक्षादन्यैरपकृतमपि प्रीतये चोपयाति।
दुर्ग्राह्यत्वान्नृपतिमनसां नैकभावाश्रयाणां।
सेवाधर्मः परमगहनो योगिनामप्यसाध्यः ॥३१७॥

तत् परिज्ञातं मया मम प्रसादमसहमानैरेष पिङ्गलको ऽन्यैः समीपवर्तिभिः प्रकोपितः। तेनायं ममादोषस्याप्येवं वदति। उक्तं च।

प्रभोः प्रसादमन्यस्य न सहन्तीह सेवकाः।
सपत्न्य इव सङ्क्रुद्धाः सपत्नाः सुकृतैरपि ॥३१८॥

भवति चाप्येवं यतो गुणवत्सु समीपवृत्तिषु गुणहीनानां न प्रसादो

भवति। उक्तं च।

गुणवत्तरपात्रेण छाद्यन्ते गुणिनां गुणाः।
रात्रौ दीपशिखा कान्तिर्न भानावुदिते सति ॥३१९॥

दमनक आह। भो मित्र यद्येवं तत्र नास्ति ते भयं। प्रकोपितो ऽपि स नैर्दुर्जनैस्तत्र वचनरचनया प्रसादं यास्यति। स आह। भो न युक्तमुक्तं भवता। लघूनामपि दुर्जनानां मध्ये स्थातुं न शक्यते। उपायान्तरं विधाय ते नूनं विघ्नन्ति। उक्तं च यतः।

बहवः पण्डिताः क्षुद्राः सर्वे मायोपजीविनः।
कुर्युः कृत्यमकृत्यं वा उष्ट्रे काकादयो यथा ॥३२०॥

कथा ॥५॥ दमनक आह। कथमेतत्। सो ऽब्रवीत्। अथ कस्मिंश्चिद्वनोद्देशे मदोत्कटो नाम सिंहः प्रतिवसति। तस्य चानुचरा द्वीपिवायसगोमायवः सन्ति। अथ कदाचित् तैरितस्ततो भ्रमद्भिः सार्थभ्रष्टः क्रथनको नामोष्ट्रो दृष्टः। अथ सिंह आह। अहो अपूर्वमिदं सत्वं। ततो ज्ञायतां किमेतदारण्यमुत ग्राम्यं वेति। तच्छ्रुत्वा वायस आह। भो स्वामिन् ग्राम्यो ऽयमुष्ट्रनामा जीवविशेषस्तव भोज्यः। तद्व्यापाद्यतां। सिंह आह। नाहं गृहागतं हन्मि। उक्तं च।

गृहे शत्रुमपि प्राप्तं विश्वस्तमकुतोभयं।
यो हन्यात् तस्य पापं स्याच्छतब्राह्मणघातजं ॥३२१॥

तदभयप्रदानं दत्वा मत्सकाशमानीयतां येनास्यागमनकारणं पृच्छामि। अथासौ सर्वैरपि विश्वास्याभयप्रदानं दत्वा मदोत्कटसकाशमानीतः। प्रणम्योपविष्टश्च। ततस्तस्य पृच्छतस्तेनात्मवृत्तान्तः सर्वः सार्थभ्रंशसमुद्भवो निवेदितः। ततः सिंहेनोक्तं। भो क्रथनक मा त्वं ग्रामं गत्वा भूयो ऽपि भारोद्वहनकष्टभागी भूयाः। तदत्रैवारण्ये निर्विशङ्को मरकतसदृशानि शष्पाग्राणि भक्षयन् मया सह वस। सो ऽपि तथेत्युक्त्वा तेषां मध्ये विचरन्नकुतो ऽपि भयमिति सुखेनास्ते। तथान्येद्युर्मदोत्क

टस्य महागजेनारण्यचारिणा सह युद्धमभूत्। तत्र तस्य दन्तमुसलप्रहारैर्व्यथा सञ्जाता। व्यथितः कथमपि न प्राणैर्विमुक्तः। अथ शरीरासामर्थ्यान्न कुत्रचित् पदमपि चलितुं शक्नोति। ते ऽपि सर्वे काकादयो ऽप्रभुत्वेन तस्य क्षुधाविष्टाः परं दुःखं भेजुः। अथ तान् सिंहः प्राह। भो अन्विष्यतां कुत्रचित् किञ्चित् सत्त्वं येनाहमेतामपि दशां प्राप्तस्तं हत्वा युष्मद्भोजनं सम्पादयामि। अथ ते चत्वारो ऽपि भ्रमितुमारब्धाः। यावन्न किञ्चित् पश्यन्ति तावद्वायसशृगालौ परस्परं मन्त्रयतः। शृगाल आह। भो वायस किं प्रभूतभ्रान्तेन। यदस्माकं प्रभोः क्रथनको विश्वस्तस्तिष्ठति। तदेनं हत्वा सर्वपरिवारस्य प्राणयात्रां कुर्मः। वायस आह। भो युक्तमुक्तं भवता। परं स्वामिना तस्याभयं दत्तमिति। तेनाबध्यो ऽयमिति। शृगाल आह। भो वायस अहं स्वामिनं विज्ञाप्य तथा करिष्ये यथा स्वामी बधं करिष्यति। तत् तिष्ठन्तु भवन्तो ऽत्रैव यावदहं गत्वा गृहं प्रभोराज्ञां गृहीत्वागच्छामि। एवमभिधाय सत्वरं सिंहमुद्दिश्य प्रस्थितः। अथ सिंहमासाद्येदमाह। स्वामिन् भ्रान्त्वा समागता वयं समस्तं वनं। परं न किञ्चित् सत्त्वं समासादितं। तत् किं कुर्मो वयं साम्प्रतं बुभुक्षया पदमेकमपि प्रचलितुं न शक्ताः। देवो ऽपि पथ्याशीव वर्तते। तद्यदि देवादेशो भवति। तदा क्रथनकपिशितेनाद्य पथ्या क्रिया क्रियते। अथ सिंहस्तस्य तद्दारुणं वचनमाकर्ण्य सकोपमिदमाह। धिग् धिक् पापाधम। यद्येवं भूयो वदसि। तत त्वां तत्क्षणमेव बधिष्यामि। यतो मया तस्याभयं प्रदत्तं। तत् कथं स्वयमेव व्यापादयामि। उक्तं च।

न गोप्रदानं न महीप्रदानं नान्नप्रदानं हि तथा प्रधानं।
यथा वदन्तीह बुधाः प्रधानं सर्वप्रदानेष्वभयप्रदानं ॥ ३२२॥

एकतः क्रतवः सर्वे समाप्तवरदक्षिणाः।
एकतो भयभीतस्य प्राणिनः प्राणरक्षणं ॥ ३२३॥

तच्छ्रुत्वा शृगाल आह। स्वामिन् यद्यभयप्रदानं दत्त्वा बधः क्रियते। तदा ते दोषो भवति। यदि पुनः स देवपादानां भक्त्यात्मनो जीवितं प्रयच्छति। तत्र न दोषः। ततो यदि स्वयमेवात्मानं बधाय नियोजयति। तद्बध्यो ऽथवास्माकं मध्यादेकतमो बध्य इति। यतो देवपादाः पथ्याशिनः क्षुधानिरोधादन्त्यां दशां यास्यन्ति। तत् किमेतैः प्राणैरस्माकं यत् स्वाम्यर्थे न यास्यन्ति। यदि स्वामिपादानां किञ्चिदनिष्टं भविष्यति। तदास्माभिः पृष्ठतो ऽपि वह्निप्रवेशः कार्यः॥ उक्तं च।

यस्मिन् कुले यः पुरुषः प्रधानः स सर्वयत्नेन हि रक्षणीयः।
तस्मिन् विनष्टे कुलसारभूते न नाभिभङ्गे ह्यरयो वहन्ति॥३२४॥

तदाकर्ण्य मदोत्कट आह। यद्येवं तत् कुरुष्व यद्रोचते। तच्छ्रुत्वा स त्वरं गत्वा सर्वांस्तानुवाच। भो भो स्वामिनो महत्यवस्था वर्तते। नासिकान्तप्राप्तजीवितस्तिष्ठति। तत् किं पर्यटितेन। तेन विना को ऽस्मानत्र वने रक्षयिष्यति। तद्गत्वा तस्य क्षुद्रोगात् परलोकं प्रस्थितस्यात्मशरीरदानं कुर्मः। येन स्वामिप्रसादस्यानृणतां गच्छामः।

उक्तं च। आपदं प्राप्नुयात् स्वामी यस्य भृत्यस्य पश्यतः।
प्राणेषु विद्यमानेषु स भृत्यो नरकं व्रजेत्॥३२५॥

तदनन्तरं ते सर्वे गत्वा बाष्पपूरितदृशो मदोत्कटं प्रणम्योपविष्टाः। तान् दृष्ट्वा मदोत्कटः प्राह। भो प्राप्तं दृष्टं वा किञ्चित् सत्त्वं। अथ तेषां मध्यात् काकः प्रोवाच। स्वामिन् वयं तावत् सर्वत्रैव पर्यटिताः। परं न किञ्चित् प्राप्तं दृष्टं वा सत्त्वं। तदेवं तावदद्य मां भक्षयित्वा प्राणान् धारयतु स्वामी। येन देवस्याश्वासनं भवति। मम पुनः स्वर्गप्राप्तिरिति। उक्तं च यतः।

स्वाम्यर्थे यस्त्यजेत् प्राणान् भृत्यो भक्तिसमन्वितः।
परं स पदमाप्नोति जरामरणवर्जितं॥३२६॥

तच्छ्रुत्वा शृगाल आह। भो स्वल्पकायो भवान्। तव भक्षणात्

स्वामिनः प्राणयात्रापि तावन्न भवति। अपरं दोषश्च समुत्पद्यते। उक्तं च। काकमांसं शुनोच्छिष्टं स्तोकं तदपि दुर्बलं।
भक्षितेनापि किं तेन तृप्तिर्येन न जायते ॥३२७॥

तद्दर्शिता भवता स्वामिभक्तिश्चानृण्यं भर्तृपिण्डस्य। प्राप्तश्चोभयोर्लोकयोः साधुवादः। तदपसराग्रतः। येनाहमपि स्वामिनं विज्ञापयामि। तथानुष्ठिते सादरं शृगालः प्रणम्य प्रोवाच। स्वामिन्नद्य मम कायेन प्राणधारणं कृत्वा ममोभयलोकप्राप्तिं कुरु। उक्तं च यतः।

स्वाम्यायत्ताः सदा प्राणा भृत्यानामर्जिता धनैः।
यतस्तेन न दोषो ऽस्ति तेषां ग्रहणसम्भवे ॥३२८॥

अथ तच्छ्रुत्वा द्वीपी प्राह। भोः साधूक्तं भवता। परं भवानपि स्वल्पकायः स्वजात्यश्च नखायुधत्वादभक्ष्य एव। उक्तं च।

नाभक्ष्यं भक्षयेत् प्राज्ञः प्राणैः कण्ठगतैरपि।
विशेषात् तदपि स्तोकं लोकद्वयविनाशनं ॥३२९॥

तद्दर्शितं त्वयात्मनः कौलीन्यं। अथवा साधु चेदमुच्यते।

एतदर्थं कुलीनानां नृपाः कुर्वन्ति सङ्ग्रहं।
आदिमध्यावसानेषु न ते यान्ति हि विक्रियां ॥३३०॥

तदपसरतु भवानग्रतो येनाहमपि स्वप्रभुं प्रसादयामि। तथानुष्ठिते द्वीपी प्रणम्य मदोत्कटमाह। स्वामिन् क्रियतामद्य मम प्राणैः प्राणयात्रा। दीयतां मे स्वर्गे ऽक्षयो वासः। विस्तार्यतां पृथ्वीतले प्रभूततरं यशः। तन्नात्र विकल्पः कार्यः। उक्तं च।

मृतानां स्वामिनः कार्ये भृत्यानामनुवर्तिनां।
भवेत् स्वर्गे ऽक्षयो वासः कीर्तिश्च धरणीतले ॥३३१॥

तच्छ्रुत्वा क्रथनकश्चिन्तयामास। एतैस्तावच्छोभनानि वाक्यानि प्रोक्तानि। न चैको ऽपि स्वामिना विनाशितः। तदहमपि प्राप्तकालं विज्ञापयामि। येन मम वचनमेते त्रयो ऽपि समर्थयन्ति। इति निश्चित्य

प्रोवाच। भो युक्तमुक्तं भवता। परं भवानपि नखायुधः। तत् कथं भवन्तमपि स्वामी भक्षयति। उक्तं च।

मनसापि स्वजात्यानां यो ऽनिष्टानि प्रचिन्तयेत्।
भवन्ति तस्य तान्येव लोके ऽत्रैव परत्र च ॥३३२॥

तदपसरतु भवान् येनाहं स्वामिनं विज्ञापयामि। तथानुष्ठिते क्रथनको ऽग्रे स्थित्वा प्रणम्योवाच। स्वामिन्नेते तावदभक्ष्या भवतां। तन्मम प्राणैः प्राणयात्रा विधीयतां। येनास्माकमुभयलोकप्राप्तिर्भवति। उक्तं च यतः।

न यज्वनो ऽपि गच्छन्ति तां गतिं नैव योगिनः।
यां यान्ति प्रोज्झितप्राणाः स्वाम्यर्थे सेवकोत्तमाः ॥३३३॥

एवमभिहिते सिंहानुज्ञातचित्रकशृगालाभ्यां विदारितकुक्षिः काकेनोत्पाटितचक्षुः क्रथनकः प्राणानत्याक्षीत्। ततश्च तैः क्षुद्रपण्डितैः सर्वैरपि भक्षितः। अतो ऽहं ब्रवीमि।

बहवः पण्डिताः क्षुद्राः सर्वे मायोपजीविनः।
कुर्युः कृत्यमकृत्यं वा उष्ट्रे काकादयो यथा ॥३३४॥

आख्याते चाख्यानके पुनर्दमनकं सञ्जीवको ऽब्रवीत्। तद्भद्र क्षुद्रपरिवारो ऽयं ते राजा मया सम्यग्ज्ञातः सतामसेव्यश्च। उक्तं च यतः।

अशुद्धप्रकृतौ राज्ञि जनता नानुरज्यते।
तथा गृध्रसमासन्नः कलहंसो ऽपि सञ्चरन् ॥३३५॥

तथा च॥ गृध्राकारो ऽपि सेव्यः स्याद्धंसाकारैः सभासदैः।
हंसाकारो ऽपि सन्त्याज्यो गृध्राकारैः शतैर्नृपः ॥३३६॥

तन्नूनं ममोपरि केनचिद्दुर्जनेनायं प्रकोपितः। तेनैवं वदति। अथवा भवत्येतत्। उक्तं च।

मृदुना सलिलेन खन्यमानान्यवघृष्यन्ति गिरेरपि स्थलानि।
उपजापविदां च कर्णजापैः किमु चेतांसि मृदूनि मानवानां ॥

कर्णविषेण च भग्नः किं किं न करोति बालिशो लोकः ।
क्षपणकतामपि धत्ते पिबति सुरां नरकपाले ऽपि ॥ ३३८ ॥

अथवा साधिदमुच्यते ।

पादाहतो ऽपि दृढदण्डसमाहतो ऽपि
यं दंष्ट्रया स्पृशति तं किल हन्ति सर्पः ।
को ऽप्येष एव पिशुनो ऽग्रमनुष्यधर्मः
कर्णे परं स्पृशति हन्त्यपरं समूलं ॥ ३३९ ॥

तथा च । अहो खलु भुजङ्गस्य विपरीतवधक्रमः ।
कर्णे लगति चान्यस्य प्राणैरन्यो वियुज्यते ॥ ३४० ॥

तदेवं गते ऽपि किं कर्तव्यमिति । अहं त्वां सुहृद्भावात् पृच्छामि । दमनक आह । तव तावद्देशान्तरगमनं युज्यते । नैवंविधस्य कुस्वामिनः सेवां विधातुं । उक्तं च यतः ।

गुरोरप्यवलिप्तस्य कार्याकार्यमजानतः ।
उत्पथप्रतिपन्नस्य परित्यागो विधीयते ॥ ३४१ ॥

सञ्जीवक आह । अस्माकमुपरि स्वामिनि कुपिते गन्तुं न शक्यते । न चान्यत्रगतानां निर्वृत्तिर्भवति । उक्तं च यतः ।

गुरुमपराधं कृत्वा दूरं गत्वा तु न स्वपिति धीमान् ।
दीर्घौ बुद्धिमतो बाहू ताभ्यां हिंसति हिंसकं ॥ ३४२ ॥

तद्युद्धं मुक्त्वा मे नान्यदस्ति श्रेयस्करं । उक्तं च ।

न तान् हि तीर्थैस्तपसा च लोकान् स्वर्गैषिणो दानशतैः सुवित्तैः ।
क्षणेन यान् यान्ति रणे सुधीराः प्राणान् समुज्झन्ति हि ये सुशीलाः ॥

मृतैः सम्प्राप्यते श्रेयो जीवद्भिः कीर्तिरुत्तमा ।
तदुभावपि शूराणां गुणावेतौ सुदुर्लभौ ॥ ३४४ ॥

द्वाविमौ पुरुषौ लोके सूर्यमण्डलभेदिनौ ।
परिव्राड् यो ऽभियुक्तश्च रणे चाभिमुखो हतः ॥ ३४५ ॥

ललाटदेशे रुधिरं स्रवन्तं शूरस्य यस्य प्रविशेच्च वक्त्रे ।
तत् सोमपानेन समं भवेच्च सङ्ग्रामयज्ञे विधिवत् प्रदिष्टं ॥ ३४६ ॥

होमार्थैर्विधिवत् प्रदानविधिना सद्विप्रवृन्दार्चनैः
यज्ञैर्भूरि सुदक्षिणैः सुविहितैः सम्प्राप्यते यत् फलं ।
सत्तीर्थाश्रमवासहोमनियमैश्चान्द्रायणाद्यैः कृतैः
पुम्भिस्तत् फलमाहवे विनिहतैः सम्प्राप्यते तत्क्षणात् ॥ ३४७ ॥

तदाकर्ण्य दमनकश्चिन्तयामास । युद्धाय कृतनिश्चयो ऽयं दृश्यते । दुरात्मा तद्यदि कदाचित् तीक्ष्णशृङ्गाभ्यां स्वामिनं प्रहरिष्यति । तन्महानर्थः सम्पद्यते । तदेनं भूयो ऽपि स्वबुद्ध्या प्रबोध्य तथा करोमि यथा देशान्तरगमनं करोति । आह च । भो मित्र सम्यगभिहितं भवता । किंतु कः स्वामिभृत्ययोः सङ्ग्रामः । उक्तं च ।

बलवन्तं रिपुं दृष्ट्वा किलात्मानं प्रगोपयेत् ।
बलवद्भिश्च कर्तव्या शरच्चन्द्रप्रकाशता ॥ ३४८ ॥

अन्यच्च । शत्रोर्विक्रममज्ञात्वा वैरमारभते हि यः ।
स पराभवमाप्नोति समुद्रष्टिट्टिभाद्यथा ॥ ३४९ ॥

कथा सञ्जीवक आह । कथमेतत् । दमनकः कथयति । कस्मिंश्चित् स
॥१२॥ मुद्रतीरैकदेशे टिट्टिभदम्पती प्रतिवसतः स्म । ततो गच्छति काले ऋतुसमयमासाद्य टिट्टिभी गर्भमधत्त । अथासन्नप्रसवा सती सा टिट्टिभमित्यूचे । भो कान्त मम प्रसवसमयो वर्तते । तद्विचिन्त्यतां किमपि निरुपद्रवं स्थानं । येन तत्राहमण्डकविमोक्षणं करोमि । टिट्टिभ आह । भद्रे रम्यो ऽयं समुद्रोपकण्ठः । तदत्रैव प्रसवः कार्यः । सा प्राह । अत्र पूर्णिमादिने समुद्रवेला चरति । सा मत्तगजेन्द्रानपि समाकर्षयति । तद्दूरमन्यत्र किञ्चित् स्थानमन्विष्यतां । तच्छ्रुत्वा विहस्य टिट्टिभः प्राह । भद्रे न युक्तमुक्तं भवत्या । का मात्रा समुद्रस्य यो मम प्रसूतिं दूषयिष्यति । किं न श्रुतं भवत्या ।

बह्वाम्बरचरमार्गं व्यपगतधूमं सदा महद्भयदं ।
मन्दमतिः कः प्रविशति हुताशनं स्वेच्छया मनुजः ॥ ३५० ॥
मत्तेभकुम्भविदलनकृतश्रमं सुप्तमन्तकप्रतिमं ।
यमलोकदर्शनेच्छुः सिंहं बोधयति को नाम ॥ ३५१ ॥
को गत्वा यमसदनं स्वयमन्तकमादिशत्यजातभयः ।
प्राणानपहर मत्तो यदि शक्तिः काचिदस्ति तव ॥ ३५२ ॥
प्रालेयलेशमिश्रे मरुति प्राभातिके च वातिजडे ।
गुणदोषज्ञः पुरुषो जलेन कः शीतमपनयति ॥ ३५३ ॥

तस्माद्विश्रब्धात्रैव गर्भं विमुञ्च । उक्तं च ।

यः पराभवसन्त्रस्तः स्वस्थानं विजहाति वा ।
तेन चेत् पुत्रिणी माता बन्ध्या धीमद्भिरुच्यते ॥ ३५४ ॥

तथा च । मा जीवन् यः परावज्ञादुःखदग्धो ऽपि जीवति ।
तस्याजननिरेवास्तु जननीक्लेशकारिणः ॥ ३५५ ॥

इत्येवं वदति टिट्टिभे विहस्यमाना टिट्टिभी विदिततत्त्वा तच्छक्तेरुक्तवती । साध्विदमेवं च बकुसदृशं ।

किं भाषितेन गुरुणा लोके हास्यो भविष्यसि खगेन्द्र ।
दत्ते तदिहाश्चर्यं यच्छति को हस्तिपिण्डानि ॥ ३५६ ॥

टिट्टिभो ऽब्रवीत् । किं क्रियते समुद्रेण । तदाकर्ण्य समुद्रश्चिन्तयामास । अहो गर्वो ऽयं पक्षिकीटस्यास्य । अथवा साध्विदमुच्यते ।

स्वचित्तकल्पितो गर्वः कस्य केन प्रशाम्यति ।
उत्क्षिप्य टिट्टिभः पादौ शेते भङ्गभयाद्दिवः ॥ ३५७ ॥

तन्मयास्य प्रमाणं कौतूहलादपि द्रष्टव्यं । किं ममैषो ऽण्डापहारे कृते करिष्यति । इति चिन्तयित्वा स्थितः । अथ प्रसवानन्तरं प्राणयात्रार्थं गतायां टिट्टिभ्यां समुद्रस्तु वेलाव्याजेनाण्डान्यपजहार । अथायाता टिट्टिभी प्रसवस्थानं शून्यमवलोक्य प्रलपन्ती टिट्टिभमूचे । भो

मूर्ख कथितं ते मया पूर्वमासीत्। यत् समुद्रवेलयाण्डानां विनाशो भविष्यति। तद्दूरतरं व्रजावः। परं मूढतयाहङ्कारमाश्रितो मम वचनं न करोषि। अथवा साधु चेदमुच्यते।

सुहृदां हितकामानां न करोतीह यो वचः।
स कूर्म इव दुर्बुद्धिः काष्ठाद्भ्रष्टो विनश्यति ॥३५८॥

कथा ॥१३॥ टिट्टिभ आह। कथमेतत्। सा प्राह। अस्ति कस्मिंश्चिज्जलाशये कम्बुग्रीवो नाम कच्छपः। तस्य च सङ्कटविकटनाम्नी मित्रे हंसजातीये परमस्नेहकोटिमाश्रिते नित्यमेव सरस्तीरमासाद्य तेन सहानेककथा देवर्षिब्रह्मर्षिराजर्षीणां कृत्वास्तमयवेलायां स्वनीडसंश्रयं चक्रतुः। अथ गच्छता कालेनावृष्टिवशात् तत् सरः शनैः शनैः शोषमगमत्। तद्दुःखदुःखितौ तावूचतुः। भो मित्र जम्बालशेषमेतत् सरः सञ्जातं। तत् कथं भवान् भविष्यति। अथ व्याकुलत्वं नो हृदि वर्तते। तच्छ्रुत्वा कम्बुग्रीव आह। भो नास्त्यस्माकं जीवितव्यं जलाभावात्। तथाप्युपायश्चिन्त्यतामिति। उक्तं च।

मित्रार्थे बान्धवार्थे च बुद्धिमान् यतते सदा।
जातास्वापत्सु यत्नेन जगादेदं वचो मनुः ॥३५९॥

तदानीयतां किञ्चित् दृढतरं रज्जुलघुकाष्ठादि। अन्विष्यतां च प्रभूतसलिलसनाथं सरः। ततो मां लघुकाष्ठाधिरूढं दन्तैरुभयतो गृहीतकोटिविभागं तत्र सरसि निनयतं। तावूचतुः। भो मित्र करिष्याव एतत्। परं भवता मौनव्रतेन स्थातव्यं। नो चेत् तव काष्ठात् पातो भविष्यति। ततः खण्डशो भविष्यसि। कच्छप आह। मम खलु मौनव्रतमद्यप्रभृति यावदाकाशगमनेन तत् सरः प्राप्यते। तथानुष्ठिते गच्छता कम्बुग्रीवेणाधोभागव्यवस्थितं किञ्चित् पुरमालोकितं। तत्र ये पौरास्ते तं तथा नीयमानमवलोक्य सविस्मयमिदमूचुः। अहो चक्राकारं किमपि पक्षिभ्यां नीयते पश्यत पश्यतेति। अथ तेषां को

लाहलमाकर्ण्य कम्बुग्रीवः प्रोवाच। भो किमेष कोलाहल इति वक्तुमना अर्द्धोक्ते निपातितः पौरैः खण्डशः कृतश्च। अतो ऽहं ब्रवीमि।

सुहृदां हितकामानां न करोतीह यो वचः।
स कूर्म इव दुर्बुद्धिः काष्ठाद्भ्रष्टो विनश्यति ॥३६०॥

पुनश्चाब्रवीत्। अनागतविधाता च प्रत्युत्पन्नमतिस्तथा।
द्वावेतौ सुखमेधेते यद्भविष्यो विनश्यति ॥३६१॥

कथा ॥१४॥

टिट्टिभ आह। कथमेतत्। सा कथयति। कस्मिंश्चिज्जलाशये ऽनागतविधाता प्रत्युत्पन्नमतिर्यद्भविष्यश्चेति त्रयो मत्स्याः प्रतिवसन्ति स्म। अथ कदाचित् तं जलाशयं दृष्ट्वा गच्छद्भिर्मत्स्यजीविभिरभिहितं। अहो बहुमत्स्यो ऽयं ह्रदः। कदाचिदपि नास्माभिरन्वेषितः। तदद्य तावदाहारवृत्तिः सञ्जाता। सन्ध्यासमयश्च संवृत्तः। तत् प्रभाते ऽत्रागन्तव्यमिति निश्चयः। अथ तेषां तत् कुलिशपातोपमं वचः समाकर्ण्यानागतविधाता सर्वान् मत्स्यानाहूयेदमूचे। अहो श्रुतं भवद्भिर्यन्मत्स्यजीविभिरभिहितं। तद्रात्रावपि गम्यतां किञ्चिन्निकटं सरः। उक्तं च। अशक्तैर्बलिनः शत्रोः कर्तव्यं प्रपलायनं।
संश्रितव्यो ऽथवा दुर्गो नान्या तेषां गतिर्भवेत् ॥३६२॥

तन्नूनं प्रभातसमये ते मत्स्यजीविनो ऽत्र समागत्य मत्स्यसङ्क्षयं करिष्यन्ति। एतन्मम मनसि वर्तते। तन्नयुक्तं साम्प्रतं क्षणमप्यत्रावस्थातुं। उक्तं च।

विद्यमाना गतिर्येषामन्यत्रापि सुखावहा।
ते न पश्यन्ति विद्वांसो देशभङ्गं कुलक्षयं ॥३६३॥

तदाकर्ण्य प्रत्युत्पन्नमतिः प्राह। अहो सत्यमभिहितं भवता। ममाप्यभीष्टमेतत्। तदन्यत्र गम्यतामिति। उक्तं च।

परदेशभयाद्भीता बहुमाया न पुंसकाः।

स्वदेशे निधनं यान्ति काकाः कापुरुषा मृगाः ॥३६४॥

अन्यच्च।
यस्यास्ति सर्वत्र गतिः स कस्मात्
स्वदेशरागेण हि याति नाशं।
तातस्य कूपो ऽयमिति ब्रुवाणाः
क्षारं जलं कापुरुषाः पिबन्ति ॥३६५॥

अथ तत् समाकर्ण्य प्रोच्चैर्विहस्य यद्भविष्यः प्राह। अहो न भवद्भ्यां मन्त्रितं सम्यगेतदिति। यतः किं वाङ्मात्रेणापि तेषां पितृपैतामहिकमेतत् सरस्त्यक्तुं युज्यते। यद्यायुःक्षयो ऽस्ति तदन्यत्रगतानामपि मृत्युर्भविष्यति। उक्तं च।

सर्वाणां दुर्जनानां च परहिंस्रानुजीविनां।
अभिप्राया न सिध्यन्ति तेनेदं वर्तते जगत् ॥३६६॥

तदहं न यास्यामि। भवद्भ्यां च यत् प्रतिभाति तत् कर्तव्यं। अथ तस्य तं निश्चयं ज्ञात्वानागतविधाता प्रत्युत्पन्नमतिश्च निष्क्रान्तौ सह परिजनेन। अथ प्रभाते तैर्मत्स्यजीविभिर्जालैस्तत्ऽजलाशयमालोक्य यद्भविष्येन सह तत् सरो निर्मत्स्यतां नीतं। ततो ऽहं ब्रवीमि।

अनागतविधाता च प्रत्युत्पन्नमतिस्तथा।
द्वावेतौ सुखमेधेते यद्भविष्यो विनश्यति ॥३६७॥

तच्छ्रुत्वा टिट्टिभः आह। भद्रे यन्मां किं यद्भविष्यसदृशं सम्भावयसि। तत् पश्य मे प्रभावं। यदेनं दुष्टबुद्धिं समुद्रं स्वचञ्च्वा शोषयिष्यामि। टिट्टिभी प्राह। अहो कस्ते समुद्रेण सह विग्रहः। तन्नयुक्तमस्योपरि विग्रहं कर्तुं। उक्तं च।

पुंसामसमर्थानामुपद्रवायात्मनो भवेत् कोपः।
पिठरं ज्वलदतिमात्रं निजपार्श्वानेव दहति तरां ॥३६८॥
महतस्तु रमा विलङ्घयन् निजदोषेण कुधीर्विनश्यति।
कुरुते न खलु स्वयेच्छया शलभानिन्धनमिद्धदीधितिः ॥३६९॥

टिट्टिभः प्राह। प्रिये मैवं वद। येषामुत्साहशक्तिर्भवति। ते स्वल्पा अपि गुरून् विक्रमन्ते। उक्तं च।

विशेषात् परिपूर्णस्य याति शत्रोरमर्षिणः ।
आभिमुख्यं शशाङ्कस्य यथाद्यापि विधुन्तुदः ॥ ३७० ॥

तथा च। प्रमाणादभ्यधिकस्यापि गण्डश्याममदच्युतेः ।
पदं मूर्ध्नि समाधत्ते केशरी मत्तदन्तिनः ॥ ३७१ ॥

अन्यच्च। बालस्यापि रवेः पादाः पतन्त्युपरि भूभृतां ।
तेजसा सह जातानां वयः कुत्रोपयुज्यते ॥ ३७२ ॥

तथा च। हस्ती स्थूलतरः स चाङ्कुशवशः किं हस्तिमात्रो ऽङ्कुशः।
दीपे प्रज्वलिते प्रणश्यति तमः किं दीपमात्रं तमः ।
वज्रेणापि हताः पतन्ति गिरयः किं वज्रमात्रो गिरिः ।
तेजो यस्य विराजते स बलवान् स्थूलेषु कः प्रत्ययः ॥ ३७३ ॥

तदनया चञ्च्वास्य सकलमपि तोयं शुष्कस्थलतां नेष्यामि। टिट्टिभी प्राह। भो कान्त यत्र जाह्नवी नवनदीशतानि गृहीत्वा नित्यमेव प्रविशति। तथा सिन्धुश्च। तत् कथं तमष्टादशनदीशतैः पूर्यमाणं विप्रुषवाहिन्या चञ्च्वा शोषयिष्यसि। तत् किमश्रद्धेयेनोक्तेन। टिट्टिभः प्राह। प्रिये

अनिर्वेदः श्रियो मूलं चञ्चुर्मे लोहसन्निभा ।
अहोरात्राणि दीर्घाणि समुद्रः किं न शुष्यति ॥ ३७४ ॥

तथा च। दुरधिगमः परभागो यावत् पुरुषेण पौरुषं न कृतं ।
जयति तुलामधिरूढो भास्वानपि जलदपटलानि ॥ ३७५ ॥

टिट्टिभी प्राह। यदि त्वयावश्यमेव समुद्रेण सह विग्रहानुष्ठानं कार्यं। तदन्यानपि विहङ्गमान् समाहूय सुहृज्जनसहित एवं समाचर। उक्तं च यतः।

बहूनामप्यसाराणां समवायो बलावहः ।

तृणैरावेष्ट्यते रज्जुर्येन नागो ऽपि बध्यते ॥३७६॥

तथा च। चटकाकाष्ठकूटेन मक्षिकादर्दुरैस्तथा।
महाजनविरोधेन कुञ्जरः प्रलयं गतः ॥३७७॥

कथा ॥१५॥ टिट्टिभः प्राह। कथमेतत्। साब्रवीत्। अस्ति कस्मिंश्चिद्वनोद्देशे चटकदम्पती तमालतरुकृतनीडौ प्रतिवसतः स्म। अथ तयोर्गच्छता कालेन सन्ततिरभवत्। अन्यस्मिन्नहनि प्रमत्तो वनगजः कश्चित् तं तमालवृक्षं घर्मार्त्तश्छायार्थी समाश्रितः। ततो मदोत्कर्षात् तां तस्य शाखां चटकाश्रितां पुष्कराग्रेणाकृष्याभाङ्क्षीत्। तस्या भङ्गेन च टकाण्डानि सर्वाणि विशीर्णानि। आयुःशेषतया च चटकौ कथमपि प्राणैर्नोज्झितौ। अथ चटका स्वाण्डभङ्गाभिभूता प्रलापान् कुर्वाणा न किञ्चित् सुखमाससाद। एतस्मिन्नन्तरे तस्यास्तान् प्रलापान् समाकर्ण्य काष्ठकूटो नाम पक्षी तस्याः परमसुहृत् तद्दुःखदुःखितो ऽभ्युपेत्य तामुवाच। भगवति किं वृथाप्रलापेन। उक्तं च यतः।

नष्टं मृतमतिक्रान्तं नानुशोचन्ति पण्डिताः।
पण्डितानां च मूर्खाणां विशेषो ऽयं यतः स्मृतः ॥६७८॥

तथा च। अशोच्यानीह भूतानि यो मूढस्तानि शोचति।
स दुःखाल्लभते दुःखं द्वावनर्थौ निषेवते ॥३७९॥

अन्यच्च। श्लेष्माश्रु बान्धवैर्मुक्तं प्रेतो भुङ्क्ते यतो ऽवशः।
तस्मान्न रोदितव्यं हि क्रियाः कार्याश्च शक्तितः ॥३८०॥

चटका प्राह। अस्त्येतत्। परं किमनेन दुष्टगजेन मदान्मे सन्तानस्य क्षयः कृतः। तद्यदि त्वं मम सत्यसुहृत् तदस्य गजापसदस्य किञ्चिद्वधोपायं चिन्तय। यस्यानुष्ठानेन मे सन्ततिविनाशदुःखमपसरति।

उक्तं च। आपदि येनोपकृतं येन च हसितं दशासु विषमासु।
उपकृत्य तयोरुभयोः पुनरपि जातं नरं मन्ये ॥३८१॥

काष्ठकूट आह। सत्यमभिहितं भवत्या। उक्तं च।

स सुहृद्व्यसने यः स्यादन्यजात्युद्भवो ऽपि सन् ।
वृद्धौ सर्वो ऽपि मित्रं स्यात् सर्वेषामेव देहिनां ॥ ३८२॥

तथा च। स सुहृद्व्यसने यः स्यात् स पुत्रो यत्र निष्कृतिः ।
स भृत्यो यो विधेयज्ञः सा भार्या यत्र निर्वृतिः ॥ ३८३॥

तत् पश्य मे बुद्धिप्रभावं। परं किंतु ममापि सुहृद्भूता वीणारवा नाम मक्षिकास्ति। तत् तामाहूयागच्छामि। येन स दुरात्मा दुष्टगजो बध्यते। अथासौ चटकया सह मक्षिकां समासाद्य प्रोवाच। भद्रे ममेष्टेयं चटका केनचिद्दुष्टगजेन पराभूताण्डकस्फोटनेन। तदस्य बधोपायमनुतिष्ठतो मे साहाय्यं कर्तुमर्हसि। मक्षिकाप्याह। भद्र किमुच्यते ऽत्र विषये। उक्तं च यतः।

पुनः प्रत्युपकाराय मित्राणां क्रियते प्रियं ।
यत् पुरा मित्रमित्रस्य कार्यं मित्रैः कृतं न किं ॥ ३८४॥

सत्यमेतत्। परं ममापि मेघनादो नाम परमसुहृद्भेको ऽस्ति। तमपि समाहूय यथोचितं कुर्मः। उक्तं च।

हितैः साधुसमाचारैः शास्त्रज्ञैर्मतिशालिभिः ।
कथंचिन्न विकल्पन्ते विद्वद्भिश्चिन्तिता नयाः ॥ ३८५॥

अथ त्रयो ऽपि ते गत्वा मेघनादस्य समीपे समस्तमपि वृत्तान्तं निवेद्य तस्थुः। अथ स प्रोवाच। कियन्मात्रो ऽसौ वराको गजो महाजनस्य कुपितस्याग्रे। तन्मदीयो मन्त्रः कर्तव्यः। मक्षिके त्वं गत्वा मध्याह्नसमये तस्य मदोद्धतस्य गजस्य कर्णे वीणारवसदृशं शब्दं कुरु। येन निमीलितनयनः श्रवणसुखलालसो भवति। ततश्च काष्ठकूटचञ्च्वा स्फोटितनयनो ऽन्धीभूतस्तृषार्त्तो मम गर्तातटाश्रितस्य सपरिकरस्य शब्दं श्रुत्वा जलाशयं मत्वा समभ्येति। ततो गर्तामासाद्य पतति पञ्चत्वं याति च। एवं समवायात् कर्तव्यं यथा वैरसाधनं भवति। अथ तथानुष्ठिते स मत्तगजो मक्षिकागेयसुखान्निमीलितनेत्रः काष्ठकूटापहृ

तच्चनुर्मध्यन्दिनसमये तृषार्त्तो भ्राम्यन् मण्डूकशब्दानुसारी गच्छन् महतीं गर्तामासाद्य पतितो मृतश्च। अतो ऽहं ब्रवीमि।

चटककाष्ठकूटेन मक्षिकादर्दुरैस्तथा ।
महाजनविरोधेन कुञ्जरः प्रलयं गतः ॥ ३८६ ॥

टिट्टिभ आह। भद्रे एवं भवतु। सुहृद्वर्गसमुदायेन समुद्रं शोषयिष्यामि। इति निश्चित्य बकसारसहंसमयूरादीन् सर्वान् विहङ्गमान् समाहूय प्रोवाच। भो पराभूतो ऽहं समुद्रेणाण्डकापहरणेन। तच्चिन्त्यतामस्य शोषणोपायः। अथ ते सर्वे सम्मन्त्र्य प्रोचुः। अशक्ता वयं समुद्रशोषणे। तत् किं वृथाप्रयासेन। उक्तं च।

अबलः प्रोन्नतं शत्रुं यो याति मदमोहितः ।
युद्धार्थं स निवर्तेत शीर्णदन्तो यथा गजः ॥ ३८७ ॥

तदस्माकं स्वामी वैनतेयो ऽस्ति। ततस्तस्मै सर्वमेतत् परिभवस्थानं निवेद्यतामिति। येन स्वजातिपरिभवकुपितो वैराग्यं गच्छति। अथ वात्रावलेपं करिष्यति। तथापि नास्ति दोषः। उक्तं च यतः।

सुहृदि निरन्तरचित्ते गुणवति भृत्ये ऽनुवर्तिनि कलत्रे ।
स्वामिनि शक्तिसमेते निवेद्य दुःखं सुखी भवति ॥ ३८८ ॥

तथानुष्ठिते सर्वे ते पक्षिणो विषण्णवदना बाष्पपूरितदृशः करुणस्वरेण वैनतेयमासाद्य फूत्कर्तुमारब्धाः। अहो अब्रह्मण्यमब्रह्मण्यं। अधुना सदाचारस्य टिट्टिभस्य भवति नाथे ऽपि सति समुद्रेणाण्डकान्यपहृतानि। तत् प्रनष्टमधुना पक्षिकुलं। अन्ये ऽपि स्वेच्छया समुद्रव्यापादयिष्यन्ति। उक्तं च।

एकस्य कर्म संवीक्ष्य करोत्यन्यो ऽपि गर्हितं ।
गतानुगतिको लोको न लोकः पारमार्थिकः ॥ ३८९ ॥

तथा च। चाटतस्करदुर्वृत्तमहासाहसिकादिभिः ।
पीड्यमानाः प्रजा रक्ष्याः कूटच्छद्मादिभिस्तथा ॥ ३९० ॥

अन्यच्च। प्रजानां धर्मषड्भागो राज्ञो भवति रक्षितुः।
अधर्मादपि षड्भागो जायते यो न रक्षति ॥३११॥
प्रजापीडनसन्तापात् समुद्भूतो हुताशनः।
राज्ञः श्रियं कुलं प्राणानादग्ध्वा विनिवर्तते ॥३१२॥
राजा बन्धुरबन्धूनां राजा चक्षुरचक्षुषां।
राजा पिता च माता च सर्वेषां न्यायवर्तिनां ॥३१३॥
फलार्थी पार्थिवो लोकान् पालयेद्यत्नमास्थितः।
दानमानादितोयेन मालाकारो ऽङ्कुरानिव ॥३१४॥
यथा बीजाङ्कुरः सूक्ष्मः प्रयत्नेनाभिरक्षितः।
फलप्रदो भवेत् काले तथा लोको ऽपि रक्षितः ॥३१५॥
हिरण्यं धान्यरत्नानि यानानि विविधानि च।
तथान्यदपि यत् किंचित् प्रजाभ्यः स्यान्नृपस्य तत् ॥३१६॥

अथैवं गरुडः समाकर्ण्य टिट्टिभदुःखदुःखितः कोपाविष्टश्च व्यचिन्तयत्। अहो सत्यमुक्तमेतैः पक्षिभिः। तदद्य गत्वा तं समुद्रं शोषयिष्यामः। एवं विचिन्तयतस्तस्य विष्णुदूतः समागत्य प्रोवाच। भो गरुत्मन् भगवता नारायणेनाहं तव पार्श्वे प्रेषितः देवकार्याय भगवानमरावत्यां यास्यतीति। तत् सत्वरमागम्यतां। तच्छ्रुत्वा गरुडः साभिमानं तमाह। भो दूत किं मया कुभृत्येन भगवान् करिष्यति। तद्गत्वा तं वद। अन्यो भृत्यो वाहनायास्मत्स्थाने क्रियतां। मदीयो नमस्कारो वाच्यो भगवतः। दूत आह। भो वैनतेय कदाचिद्भगवन्तं प्रति त्वया नैतदभिहितमीदृक्। तत् कथय किं ते भगवतो ऽपमानं कृतं। गरुड आह। भगवदाश्रयभूतेन समुद्रेणास्मद्भृत्यस्य टिट्टिभस्याण्डान्यपहृतानि। तद्यदि तस्य निग्रहं न करोति। तदहं भगवतो न भृत्य इत्येष मे निश्चयस्त्वया वाच्यः। तद्द्रुततरं भवता भगवतः समीपे गन्तव्यं। अथ दूतमुखेन वैनतेयं प्रणयकुपितं विज्ञाय भगवां

श्चिन्तयामास। स्थाने कोपो वैनतेयस्य। तत् स्वयमेव गत्वा तं सम्बोध्य सम्मानपुरस्सरमानयामि। उक्तं च।

भक्तं शक्तं कुलीनं च न भृत्यमपमानयेत्।
पुत्रवल्लालयेन्नित्यं य इच्छेच्छ्रियमात्मनः ॥ ३९७ ॥

अन्यच्च। राज्ञा तुष्टो ऽपि भृत्यानां मानमात्रं प्रयच्छति।
ते तु सम्मानितास्तस्य प्राणैरप्युपकुर्वते ॥ ३९८ ॥

इत्येवं सम्प्रधार्य रुक्मपुरे वैनतेयसकाशं सत्वरमगमत्। वैनतेयो ऽपि गृहायागतं भगवन्तमवलोक्य त्रपादधोमुखः प्रणम्योवाच। भगवंस्त्वदाश्रयोन्मत्तेन समुद्रेण पश्य मे भृत्यस्याण्डकान्यपहृत्य ममापमानं विहितं। तद्भगवल्लज्जया मया विलम्बितं। नो चेदेनमहं स्थलान्तमद्यैव नयामि। उक्तं च यतः।

येन स्याल्लघुता वाथ पीडा चित्ते प्रभोः क्वचित्।
प्राणत्यागे ऽपि तत् कर्म न कुर्यात् कुलसेवकः ॥ ३९९ ॥

तच्छ्रुत्व भगवानाह। भो वैनतेय सत्यमभिहितं भवता। उक्तं च यतः।

भृत्यापराधजो दण्डः स्वामिनो जायते यतः।
येन लज्जापि तस्योत्था न भृत्यस्य तथा पुनः ॥ ४०० ॥

तदागच्छ येनाण्डानि समुद्रादादाय टिट्टिभं सम्भावयामः। अमरपुरीं च गच्छामः। तथानुष्ठिते समुद्रो भगवता निर्भर्त्स्य धनुष्याग्नेयं शरं सन्धायाभिहितः। भो दुरात्मन् दीयतां टिट्टिभस्याण्डानि। नो चेत् त्वां स्थलतां नेष्यामि। ततः समुद्रेण सभयेन टिट्टिभाण्डानि तानि दत्तानि। टिट्टिभेनापि स्वभार्यार्पितानि। अतो ऽहं ब्रवीमि।

शत्रोर्विक्रममज्ञात्वा वैरमारभते हि यः।
स पराभवमाप्नोति समुद्रष्टिट्टिभाद्यथा ॥ ४०१ ॥

तदाकर्ण्य सञ्जीवकस्तमेव भूयो ऽपि पप्रच्छ। भो मित्र कथं ज्ञेयो ऽसौ मया दुष्टबुद्धिरिति। इयन्तं कालं यावदुत्तरोत्तरस्नेहेन प्रसादेन च

तेनाहं दृष्टः। न कदाचित् तद्विकृतिर्दृष्टा। तत् कथ्यतां येनाहमात्मरक्षार्थं तद्वधायोद्यमं करोमि। दमनक आह। भद्र किमत्र ज्ञेयं। एष ते प्रत्ययः। रक्तनेत्रस्त्रिशिखां भृकुटिं दधानः सृक्कणी परिलेलिहंस्त्वां दृष्ट्वा यदि भविष्यति। तदा दुष्टबुद्धिः। अन्यथा सप्रसादश्चेति। तदा ज्ञापय मां। स्वाश्रयं प्रतिगच्छामि। त्वया च यथा मन्त्रभेदो न भवति तथा विधातव्यं। यदि निशामुखं प्राप्य गन्तुं शक्नोषि। तदा देशत्यागः कार्यः। तथात्मा सामभेदोपप्रदानदण्डादिभी रक्षणीयः। उक्तं च यतः।

अपि पुत्रकलत्रैर्वा प्राणान् रक्षेत पण्डितः।
विद्यमानैर्यतस्तैः स्यात् सर्वं भूयो ऽपि देहिनां ॥४०२॥

तथा च। येन केनाप्युपायेन शुभेनाप्यशुभेन वा।
उद्धरेद्दीनमात्मानं समर्थो धर्ममाचरेत् ॥४०३॥

यो मायां कुरुते मूढः प्राणत्यागे धनादिषु।
तस्य प्राणाः प्रणश्यन्ति तैर्नष्टैर्नष्टमेव तत् ॥४०४॥

एवमभिधाय दमनकः करटकपार्श्वमगमत्। करटको ऽपि तं दृष्ट्वा प्रोवाच। भद्र किं कृतं त्वया तत्र गतेन। दमनक आह। मया तावन्नीतिबीजनिर्वापणं कृतं। परतस्तद्दैवपर्यायायत्तं। उक्तं च।

पराङ्मुखे ऽपि दैवे ऽत्र कृत्यं कार्यं विपश्चिता।
आत्मदोषविनाशाय स्वचित्तस्तम्भनाय च ॥४०५॥

करटक आह। तत् कथय त्वया कीदृक् नीतिबीजं निर्वापितं। सो ऽब्रवीत्। मयान्योन्यं ताभ्यां मिथ्याप्रजल्पनेन भेदस्तथा विहितो यथा भूयो मन्त्रयन्तावेकस्थानस्थितौ न द्रक्ष्यसि। करटक आह। अहो न युक्तं भवता विहितं। यतः परस्परं तौ स्नेहार्द्रहृदयौ सुखाश्रयौ कोपसागरे प्रक्षिप्तौ। उक्तं च।

अविरुद्धं सुखस्थं यो दुःखमार्गे नियोजयेत्।

जन्मजन्मान्तरे दुःखी स नरः स्यादसंशयं ॥४०६॥

अपरं च यत् त्वं भेदमात्रेणापि तुष्टः। तदप्ययुक्तं। यतः सर्वो ऽपि जनो वित्तूपकरणे समर्थो भवति नोपकरणे। उक्तं च।

नाशयितुमेव नीचः परकार्यं वेत्ति न प्रसाधयितुं।
पातयितुमस्ति शक्तिर्वायोर्वृक्षं न चोन्नमितुं ॥४०७॥

दमनक आह। भो अनभिज्ञो भवान् नीतिशास्त्रस्य। तेनैतद्ब्रवीषि। उक्तं च।

उत्तिष्ठमानस्तु परो नोपेक्ष्यः पथ्यमिच्छता।
समौ हि शिष्टैराम्नातौ वर्त्स्यन्तावामयः स च ॥४०८॥

तच्छत्रुभूतो ऽयमस्माकं मन्त्रिपदापहरणात्। उक्तं च।

पितृपैतामहं स्थानं यो यस्यात्र जिगीषते।
स तस्य सहजः शत्रुरुच्छेद्यो ऽपि प्रिये स्थितः ॥४०९॥

तन्मया स उदासीनतया समानीतो ऽभयप्रदानेन यावत्। तावदहमपि तेन साचिव्यपदात् प्रच्यावितः। अथवा साधिदमुच्यते।

दद्यात् साधुर्यदि निजपदे दुर्जनाय प्रवेशं।
तन्नाशाय प्रभवति ततो वाञ्छमानः स्वयं सः।
तस्माद्देयो विपुलमतिभिर्नावकाशो ऽधमानां।
जारो ऽपि स्याद्गृहपतिरिति श्रूयते वाक्यतो ऽत्र ॥४१०॥

तेन मया तस्योपरि बधोपाय एष विरचितः। येन देशत्यागो मृत्युर्वा भविष्यति। तच्च त्वामुक्त्वान्यो न ज्ञास्यति। तन्मया युक्तमेतत् स्वार्थाय प्रतिष्ठितं। उक्तं च यतः।

निस्त्रिंशं हृदयं कृत्वा वाणी चेक्षुरसोपमा।
विकल्पो ऽत्र न कर्तव्यो हन्यात् तत्रापकारिणं ॥४११॥

अपरं विहतो ऽप्येष सञ्जीवको ऽस्माकमुपभोग्यो भविष्यति। तदेकं तावद्वैरसाधनं। अपरं साचिव्यं भविष्यति तृप्तिश्चेति। तद्गुणत्रये ऽस्मिन्नुपस्थिते कस्मान्मां दूषयसि जाड्यभावात्। उक्तं च यतः।

परस्य पीडनं कुर्वन् स्वार्थसिद्धिं च पण्डितः ।
मूढबुद्धिर्न भक्षेत वने चतुरको यथा ॥४१२॥

कथा ॥१६॥

करटक आह । कथमेतत् । सो ऽब्रवीत् । अस्ति कस्मिंश्चिद्वनोद्देशे वज्रदंष्ट्रो नाम सिंहः । तस्य चतुरकक्रव्यमुखनामानौ शृगालवृकौ भृत्यभूतौ सदैवानुगतौ तत्रैव वने प्रतिवसतः । अथान्यदिने सिंहेन कदाचिदासन्नप्रसवा प्रसववेदनया स्वयूथाद्भ्रष्टोष्ट्र्युपविष्टा कस्मिंश्चिद्वनगहने समासादिता । अथ तां व्यापाद्य यावदुदरं स्फोटयति तावज्जीवल्लघुवपुर्दासेरकशिशुर्निःक्रान्तः । सिंहो ऽपि दासेरक्याः पिशितेन परां तृप्तिमुपागतः । परं स्नेहाद्बालदासेरकं त्यक्तं गृहमानीय तमुवाच । भद्र न ते ऽस्ति मृत्योर्भयं मत्तो नान्यस्मादपि । तत् स्वेच्छयात्र वने चतुरकक्रव्यमुखाभ्यां लालितेन भ्राम्यतामिति । यतस्ते शङ्कुसदृशौ कर्णौ ततः शङ्कुकर्णो नाम भविष्यति । एवमनुष्ठिते चत्वारो ऽपि त एकस्थानविहारिणः परस्परमनेकप्रकारं गोष्ठीसुखमनुभवन्तस्तिष्ठन्ति । शङ्कुकर्णो ऽपि यौवनपदवीमारूढः क्षणमपि न तं सिंहं मुञ्चति । अथ कदाचिद्वज्रदंष्ट्रस्य मत्तगजेन सह युद्धमभवत् । तेन मदवीर्यात् स दन्तप्रहारैस्तथा क्षतशरीरो विहितो यथा कथंचिन्न दैवाद्व्यापादितः । ततश्च प्रहारजर्जरितदेहो यदा स प्रचलितुं न शक्नोति । तदा क्षुत्क्षामकण्ठस्तान् भृत्यानुवाच । भो अन्विष्यतां किंचित् सत्त्वं येनाहमेवं स्थितो ऽपि तद्व्यापाद्यात्मनो युष्माकं च क्षुत्प्रणाशं करोमि । तच्छ्रुत्वा ते त्रयो ऽपि तत्रैव वने सन्ध्याकालं यावत् परिभ्रान्ताः । परं न किंचिदपि सत्त्वं समासादितं । अथ चतुरकश्चिन्तयामास । यदि शङ्कुकर्णो ऽयं व्यापाद्यते तदा सर्वेषां कतिचिद्दिनानि तृप्तिर्भवति । परं नैनं स्वामी मित्रत्वादाश्रयसमाश्रितत्वाच्च विनाशयिष्यति । अथ बुद्धिप्रभावेन स्वामिनं प्रतिबोध्य तथा करिष्ये यथा व्यापादयिष्यति । उक्तं च ।

अवध्यं वाथवागम्यमकृत्यं नास्ति किञ्चन ।
लोके बुद्धिमतां बुद्धेस्तस्मात् तां हि नियोजयेत् ॥४१३॥

एवं विचिन्त्य शङ्कुकर्णमिदमाह। भो शङ्कुकर्ण स्वामी तावत् पथ्यं विना क्षुधया परिपीड्यते। स्वाम्यभावादस्माकमपि स्वयं विनाशः समायातः। ततो वाक्यं किञ्चित् स्वाम्यर्थं वदिष्यामि। तच्छ्रूयतां। भो भद्र शीघ्रतरं निवेदय। येन ते वचनमविकल्पः करोमि। अपरं स्वामिनो हिते कृते मया सुकृतशतं कृतं भविष्यति। चतुरक आह। भो भद्र आत्मीयशरीरं द्विगुणलाभेन स्वामिने प्रयच्छ। येन ते द्विगुणं शरीरं भवति। स्वामिनः पुनः प्राणयात्रा भवति। तदाकर्ण्य शङ्कुकर्णः प्राह। भद्र यद्येवं तदा मदीयमेवेदं प्रयोजनं। तदुच्यतां स्वाम्येतदेव क्रियतामिति। परमत्र विषये धर्मप्रतिभूर्याचनीयः। एवं निश्चित्य सर्वे ते सिंहसकाशमाजग्मुः। ततश्चतुरक आह। देव किञ्चित् सत्त्वं प्राप्तमद्य। भगवानादित्यो ऽप्यस्तं गतः। तद्यदि द्विगुणवृद्ध्यास्य शङ्कुकर्णस्य शरीरं प्रयच्छसि धर्मप्रतिभुवा। तदासौ स्वशरीरं ददाति। सिंह आह। यद्येवं तदा सुन्दरतरं। अस्य व्यवहारस्य धर्मप्रतिभूः क्रियतां। अथ सिंहवचनानन्तरं वृकशृगालाभ्यां विदारितकुक्षिः शङ्कुकर्णः पञ्चत्वमुपागतः। अथ वज्रदंष्ट्रश्चतुरकमाह। भो चतुरक यावदहं नदीं गत्वा स्नानदेवतार्चनविधिं निर्वर्त्यागच्छामि। तावत् त्वयात्राप्रमत्तेन भाव्यं। इत्युक्त्वा नद्यां गतः। अथ तस्मिन् गते चतुरकश्चिन्तयामास। कथं ममैकाकिनो भोज्यो ऽयमुष्ट्रो भविष्यति। इति विचिन्त्य क्रव्यमुखमाह। भो क्रव्यमुख क्षुधालुर्भवान्। तद्यावदसौ स्वामी नागच्छति। तावत् त्वमस्योष्ट्रस्य मांसं भक्षय। अहं त्वां स्वामिनो ऽग्रे निर्दोषं प्रतिपादयिष्यामि। सो ऽपि तच्छ्रुत्वा किञ्चित्मांसं यावदास्वादयति। तावच्चतुरकेनाभिहितं। भो भो क्रव्यमुख समागच्छति स्वामी। तत् त्यक्त्वैनं दूरे तिष्ठ येनास्य भक्षणं न

विकल्पयति। तथानुष्ठिते सिंहः समायातः। यावदुष्ट्रं पश्यति तावद्रिक्तीकृतहृदयो दासेरकः। ततो भृकुटीं कृत्वा परुषतरमिदमाह। अहो केनैष उष्ट्र उच्छिष्टतां नीतः। येन तमपि व्यापादयामि। एवमभिहिते क्रव्यमुखश्चतुरकमुखमवलोकयति। किल वद किञ्चिद्येन मम शान्तिर्भवति। अथ चतुरको विहस्योवाच। भो ममाग्रे ऽपि क्रमेलकहृदयं भक्षयित्वा। अधुना मम मुखमवलोकयसि। तदास्वादयास्य दुर्णयतरोः फलमिति। तदाकर्ण्य क्रव्यमुखः प्राणभयाद्देशान्तरमनागमनाय गतः। सिंहश्च तत्रैव तिष्ठति। एतस्मिन्नन्तरे दैवयोगात् तेनैव मार्गेण महादासेरकसार्थो भाराक्रान्तः समागच्छति। तस्याग्रेसरस्योष्ट्रस्य कण्ठे महती घण्टा प्रबद्धास्ते। तस्याः शब्दं दूरतो ऽपि समाकर्ण्य सिंहश्चतुरकमाह। भद्र ज्ञायतां किमेष रौद्रः शब्दः श्रूयते ऽश्रुतपूर्वः। तच्छ्रुत्वा चतुरकः किञ्चिद्वनान्तरं गत्वा। सत्वरं तमभ्येत्य सवेगमुवाच। स्वामिन् गम्यतां गम्यतां यदि शक्नोषि गन्तुं। सो ऽब्रवीत्। भद्र किमेवं मां व्याकुलयसि। तत् कथय। किमेतदिति। चतुरक आह। स्वामिन्नेष धर्मराजस्तवोपरि कुपितः। यत् किलानेन मदीयदासेरको मां प्रतिभुवं दत्वाकाल एव व्यापादितः। तत् सहस्रगुणमात्मीयमुष्ट्रमस्य सकाशाद्ग्रहीष्यामि। इति निश्चित्य बृहदुष्ट्रमानमादायाग्रेसरोष्ट्रस्य ग्रीवायां बद्ध्वा। बध्यदासेरकसक्तानपि पितृपितामहानादाय वैरनिर्यातनार्थमायात एव। सिंहो ऽपि तत् सर्वं दूरादेवावलोक्य मृतमुष्ट्रं परित्यज्य स्वप्राणभयात् प्रणष्टः। चतुरको ऽपि शनैः शनैस्तस्योष्ट्रस्य मांसं भक्षयामास। ततो ऽहं ब्रवीमि।

परस्य पीडनं कुर्वन् स्वार्थसिद्धिं च पण्डितः।
मूढबुद्धिर्न भक्षेत वने चतुरको यथा ॥४१४॥

अथ गते दमनके सञ्जीवकश्चिन्तयामास। अहो किमेतन्मया कृतं। यच्छष्पभोजिना मांसाशिना सह मैत्र्यनुग्रहः कृतः। अथवा साधु

चेदमुच्यते।

अगम्यानि पुमान् याति यो ऽसेव्यांश्च निषेवते।
स मृत्युमुपगृह्णाति गर्भमश्वतरी यथा ॥४१५॥

तत् किं करोमि। क्व गच्छामि। कथं मे शान्तिर्भविष्यति। अथवा तमेव पिङ्गलकमनुगच्छामि। कदाचिच्छरणागतं मां रक्षति। प्राणैर्न वियोजयति। उक्तं च यतः।

धर्मार्थं यततामपीह विपदो दैवाद्यदि स्युः क्वचित्।
तत् तासामुपशान्तये सुमतिभिः कार्यो विशेषान्नयः।
लोके ख्यातिमुपागतात्र सकले लोकोक्तिरेषा यतः।
दग्धानां किल वह्निना हितकरः सेको ऽपि तस्योद्भवः ॥४१६॥

तथा च। कोके ऽथवा तनुभृतां निजकर्मपाकं।
नित्यं समाश्रितवतां सुहितक्रियाणां।
भावार्जितं शुभमथाप्यशुभं निकामं।
यद्भावि तद्भवति नात्र विचारहेतुः ॥४१७॥

अपरं चान्यत्रगतस्यापि मे कस्यचिद्दुष्टसत्त्वस्य मांसाशिनः सकाशान्मृत्युर्भविष्यति। तद्वरं सिंहात्। उक्तं च।

महद्भिः स्पर्द्धमानस्य विपदेव गरीयसी।
दन्तभङ्गो हि नागानां श्लाघ्यो गिरिविदारणे ॥४१८॥

तथा च। महतो ऽपि क्षयं लब्ध्वा श्लाघ्यं नीचो ऽपि गच्छति।
दानार्थी मधुपो यद्वद्गजकर्णसमाहतः ॥४१९॥

एवं निश्चित्य स स्खलितगतिर्मन्दं मन्दं गत्वा सिंहाश्रयं पश्यन्नपठत्। अहो साधु चेदमुच्यते।

अन्तर्लीनभुजङ्गमं गृहमिव व्यालाकुलं वा वनं।
ग्राहाकीर्णमिवाभिरामकमलच्छायासनाथं सरः।
नानादुष्टजनैरसत्यवचनैः क्षुद्रैरनार्यैर्वृतं।

दुःखेनेह विगाह्यते प्रचकितैराज्ञां गृहं वार्द्धिवत् ॥४२०॥

एवं पठन् दमनकोक्ताकारं दृष्ट्वा तं पिङ्गलकं स चकितः संवृतशरीरो दूरतरं प्रणामकृतिं विनाप्युपविष्टः। पिङ्गलको ऽपि तथाविधं विलोक्य दमनकवाक्यं श्रद्दधानः कोपात् तस्योपरि पपात। अथ सञ्जीवकस्तु पिङ्गलकखरनखरविकर्तितशरीरः पृष्ठशृङ्गाभ्यां तदुदरमुल्लिख्य कथमपि तस्मादपेतः। पुनरपि शृङ्गाभ्यां तं हन्तुमिच्छन् युद्धायावस्थितः। अथ द्वावपि तौ पुष्पितपलाशप्रतिमौ परस्परबधकाङ्क्षिणौ दृष्ट्वा करटकः साक्षेपं दमनकमुवाच। भो मूढमते यदनयोर्विरोधस्त्वया कृतः। तन्न साधु विहितं। यतः सकलमपि वनमिदं व्याकुलीकृतं भवता। तत् त्वं न नीतितत्त्वं वेत्सि। उक्तं च नीतिविद्भिः।

कार्याण्युत्तमदण्डसाहसफलान्यायाससाध्यानि ये।
प्रीत्या संशमयन्ति नीतिकुशलाः साम्नैव ते मन्त्रिणः।
निःसाराल्पफलानि ये त्वविधिना वाञ्छन्ति दण्डोद्यमैः।
तेषां दुर्णयचेष्टितैर्नरपतेरारोप्यते श्रीस्तुलां ॥४२१॥

तद्यदि स्वाम्यभिघातो भविष्यति। तत् किं त्वदीयमन्त्रबुद्ध्या क्रियते। अथ सञ्जीवको न बध्यते। तथाप्यभव्यं। यतः प्राणसन्देहात् तस्य च बधः। तन्मूढ कथं त्वं मन्त्रिपदवीमभिलषसि। सामसिद्धिं न वेत्सि। तद्वृथा मनोरथो ऽयं ते दण्डरुचेः। उक्तं च।

सामादिदण्डपर्यन्तो नयः प्रोक्तः स्वयम्भुवा।
तेषां दण्डस्तु पापीयांस्तस्माद्दण्डं विवर्जयेत् ॥४२२॥

तथा च। साम्नैव यत्र सिद्धिर्न तत्र दण्डो बुधेन विनियोज्यः।
पित्तं यदि शर्करया शाम्यति को ऽर्थः पटोलेन ॥४२३॥

तथा च। साम्नैवादौ प्रयोक्तव्यं कार्यं कार्यविचक्षणैः।
सामसिद्धा हि विधयो न प्रयान्ति पराभवं ॥४२४॥

अन्यच्च। न चन्द्रेण न चौषध्या न सूर्येण न वह्निना।

साम्नैव विलयं याति विद्वेषि प्रभवं तमः ॥४२५॥

तद्यत् त्वं मन्त्रित्वमभिलषसि। तदप्ययुक्तं। यतस्त्वं मन्त्रिगतिं न वेत्सि। यतः पञ्चविधो मन्त्रः। स च कर्मणामारम्भोपायः। पुरुषद्रव्यसम्पत्। देशकालविभागः। विनिपातप्रतीकारः। कार्यसिद्धिश्चेति। सो ऽयं स्वाम्यमात्ययोरेकतमस्य किं वा द्वयोरपि विनिपातः सम्पद्यते लग्नं। तद्यदि काचिच्छक्तिरस्ति। तद्विचिन्त्यतां विनिपातप्रतीकारः। भिन्नसन्धाने हि मन्त्रिणां बुद्धिपरीक्षा। तन्मूर्ख तत् कर्तुमसमर्थस्त्वं यतो विपरीतबुद्धिरसि। उक्तं च।

घातयितुमेव नीचः परकार्यं वेत्ति न प्रसाधयितुं।
पातयितुमस्ति शक्तिर्नाखोरुद्धर्तुमुत्त्रिपदं ॥४२६॥

अथवा न ते दोषो ऽयं स्वामिनो दोषो यस्ते मन्दमतेर्वाक्यं श्रद्दधाति। उक्तं च।

नराधिपा नीचजनानुवर्त्तिनो बुधोपदिष्टेन पथा न यान्ति ये।
विशन्ति ते दुर्गममार्गनिर्गमं समस्तसम्बाधनमर्थपञ्जरं ॥४२७॥

तद्यदि त्वमस्य मन्त्री भविष्यसि। तदान्यो ऽपि कश्चिन्नास्य समीपे साधुजनः समेष्यति। उक्तं च।

गुणालयो ऽप्यसन्मन्त्री नृपतिर्नाधिगम्यते।
प्रसन्नस्वादुसलिलो दुष्टग्राहो यथा ह्रदः ॥४२८॥

तथा च शिष्टरहितस्य स्वामिनो ऽपि नाशो भविष्यति। उक्तं च।

चित्रास्वादकथैर्भृत्यैरनायासितकार्मुकैः।
ये रमन्ते नृपास्तेषां रमन्ते रिपवः श्रिया ॥४२९॥

तत् किं ते मूर्खस्योपदेशेन। केवलं दोषो न गुणः। उक्तं च।

नानाम्यं नाम्यते दारु नाश्मनि स्यात् क्षुरक्रिया।
सूचीमुखं विजानीहि नाशिष्यायोपदिश्यते ॥४३०॥

दमनक आह। कथमेतत्। करटको ऽब्रवीत्। अस्ति कस्मिंश्चित्

पर्वतैकदेशे वानरयूथं। तच्च कदाचिद्धेमन्तसमये ऽतिकठोरवातसंस्पर्शवेपमानकलेवरं तुषारवर्षोद्धतप्रवर्षघनधारानिपातसमाहतं न कथञ्चिच्छान्तिमगमत्। अथ केचिद्वानरा वह्निकणसदृशानि गुञ्जाफलान्यवचित्य वह्निवाञ्छया फूत्कुर्वन्तः समन्तात् तस्थुः। अथ सूचीमुखो नाम पक्षी तेषां तं वृथायासमवलोक्य प्रोवाच। भो सर्वे मूर्खा यूयं। नैते वह्निकणाः। गुञ्जाफलान्येतानि। तत् किं वृथाश्रमेण। नैतस्माच्छीतरक्षा भविष्यति। तदन्विष्यतां कश्चिन्निर्वातो वनप्रदेशः। गुहा वा गिरिकन्दरं वा। अद्यापि साटोपा मेघा दृश्यन्ते। अथ तेषामेकतमो वृद्धवानरस्तमुवाच। भो मूर्ख किं तवानेन व्यापारेण। तन्मौनेन स्थीयतां। उक्तं च। कथा ॥१७॥

मुहुर्विघ्नितकर्माणं द्यूतकारं पराजितं।
नालापयेद्विवेकज्ञो यदीच्छेत् सिद्धिमात्मनः ॥४३१॥

तथा च। आखेटकं वृथाक्लेशं मूर्खं व्यसनसंस्थितं।
आलापयति यो मूढः स गच्छति पराभवं ॥४३२॥

सो ऽपि तमनादृत्य भूयो ऽपि वानराननवरतमाह। भो किं वृथाक्लेशेन। अथ यावदसौ न कथञ्चित् प्रलपन् विरमति। तावदेकेन वानरेण व्यर्थश्रमत्वात् कुपितेन पक्षाभ्यां गृहीत्वा शिलायामास्फालितः। उपरतश्च। अतो ऽहं ब्रवीमि।

नानाम्यं नाम्यते दारु नाश्मनि स्यात् क्षुरक्रिया।
सूचीमुखं विजानीहि नाशिष्यायोपदिश्यते ॥४३३॥

तथा च। उपदेशो हि मूर्खाणां प्रकोपाय न शान्तये।
पयः पानं भुजङ्गानां केवलं विषवर्द्धनं ॥४३४॥

अन्यच्च। उपदेशो न दातव्यो यादृशे तादृशे जने।
पश्य वानरमूर्खेण सुगृही निर्गृही कृता ॥४३५॥

दमनक आह। कथमेतत्। सो ऽब्रवीत्। अस्ति कस्मिंश्चिद्वनो

कस्मिंश्चिद्वनोद्देशे शमीवृक्षः। तस्य लम्बमानशाखायां कृतावासावरण्यचटकदम्पती
॥१८॥ वसतः स्म। अथ कदाचित् तयोः सुखसंस्थयोर्हेमन्तमेघो मन्दं मन्दं वर्षितुमारब्धः। अत्रान्तरे कश्चिच्छाखामृगो वातासारसमाहतः प्रोद्धूषितशरीरो दन्तवीणां वादयन् वेपमानस्तच्छमीमूलमासाद्योपविष्टः। अथ तं तादृशमवलोक्य चटका प्राह। भो भद्र।

हस्तपादसमोपेतो दृश्यसे पुरुषाकृतिः।
शीतेन भिद्यसे मूढ कस्मान्न कुरुषे गृहं ॥४३६॥

एतच्छ्रुत्वा तां वानरः सकोपमाह। अधमे कस्मान्न त्वं मौनव्रता भवसि। अहो धार्ष्ट्यमस्याः। गृहमासाद्य मामुपहसति। यतः।

सूचीमुखी दुराचारा रण्डा पण्डितवादिनी।
नाशङ्कते प्रजल्पन्ती तत् किमेनां न हन्म्यहं ॥४३७॥

एवं प्रलप्य तामाह। मुग्धे किं तव ममोपरि चिन्तया। उक्तं च।

वाच्यं श्रद्धासमेतस्य पृच्छतो ऽत्र विवेकिना।
प्रोक्तं पृच्छाविहीने स्यादरण्यरुदितोपमं ॥४३८॥

तत् किं बहुना। तावत् स कीशो तया निजकुलायगर्वितयाभिहितो यावत् तां शमीमारुह्य तस्याः कुलायः शतधा खण्डशः कृतः। अतो ऽहं ब्रवीमि।

उपदेशो न दातव्यो यादृशे तादृशे जने।
पश्य वानरमूर्खेण सुगृही निर्गृही कृता ॥४३९॥

तन्मूर्ख गुरुभिः शिक्षितो ऽपि न शिष्यसे त्वं। अथवा न ते दोषो ऽस्ति। यतः साधोः शिक्षा गुणाय सम्पद्यते नासाधोः। उक्तं च।

किं करोत्येव पाण्डित्यमस्थाने विनियोजितं।
अन्धकारप्रतिच्छन्ने घटे दीप इवाहितः ॥४४०॥

तत् त्वं व्यर्थपाण्डित्यमाश्रित्य मम वचनमशृण्वान आत्मशान्तिमपि न वेत्सि। तन्नूनमपजातस्त्वं। उक्तं च।

ज्ञातः पुत्रो ऽनुज्ञातश्च अतिज्ञातस्तथैव च ।
अपज्ञातश्च लोके ऽस्मिन् मन्तव्याः शास्त्रवेदिभिः ॥४४१॥
मातृतुल्यगुणो ज्ञातस्त्वनुज्ञातः पितुः समः ।
अतिज्ञातो ऽधिकस्तस्मादपज्ञातो ऽधमाधमः ॥४४२॥

उक्तं च । रामो हेममृगं न वेत्ति । अपि च ।

अप्यात्मनो विनाशं गणयति न खलः परव्यसनहृष्टः ।
प्रायो मस्तकनाशे समरमुखे नटति कबन्धः ॥४४३॥

अहो साध्विदमुच्यते ।

धर्मबुद्धिः कुबुद्धिश्च द्वावेतौ विदितौ मम ।
पुत्रेण व्यर्थपाण्डित्यात् पिता धूमेन घातितः ॥४४४॥

कथा ॥११॥

दमनक आह । कथमेतत् । सो ऽब्रवीत् । अस्ति कस्मिंश्चिदधिष्ठाने धर्मबुद्धिः पापबुद्धिश्च द्वे मित्रे प्रतिवसतः स्म । अथ कदाचित् पापबुद्धिना चिन्तितं । अहं तावन्मूर्खो दारिद्र्योपहतश्च । तदेनं धर्मबुद्धिमादाय देशान्तरं गत्वा । अस्याश्रयेणार्थोपार्जनं कृत्वा । एनमपि वञ्चयित्वा सुखी भवामि । अन्यस्मिन्नहनि स धर्मबुद्धिं प्राह । भो मित्र वार्द्धकाभावे किं त्वमात्मविचेष्टितं स्मरसि । देशान्तरमदृष्ट्वा कां शिशुजनस्य वार्तां कथयिष्यसि । उक्तं च ।

देशान्तरेषु बहुविधभाषावेषादि येन न ज्ञातं ।
भ्रमता धरणीपीठे तस्य फलं जन्मनो व्यर्थं ॥४४५॥

तथा च। विद्यां वित्तं शिल्पं तावन्नाप्नोति मानवः सम्यक् ।
यावद्भ्रमति न भूमौ देशाद्देशान्तरं हृष्टः ॥४४६॥

अथ तस्य तद्वचनमाकर्ण्य प्रहृष्टमनास्तेनैव सह गुरुजनाभ्यनुज्ञातः शुभे ऽहनि देशान्तरं प्रस्थितः । तत्र धर्मबुद्धिप्रभावेन भ्रमता पापबुद्धिनापि प्रभूततरं वित्तमासादितं । ततश्च द्वावपि तौ प्रभूतोपार्जितद्रव्यौ प्रहृष्टौ स्वगृहं प्रत्यौत्सुक्येन निवृत्तौ । उक्तं च यतः ।

प्राप्तविद्यार्थशिल्पानां देशान्तरनिवासिनां ।
क्रोशमात्रो ऽपि भूभागः शतयोजनवद्भवेत् ॥४४७॥

अथ स्वस्थानसमीपवर्त्तिना पापबुद्धिना धर्मबुद्धिरभिहितः । भद्र न सर्वमेतद्वित्तं गृहं प्रतिनेतुं युज्यते । यतः कुटुम्बिनो बान्धवाश्च प्रार्थयिष्यन्ति । तदत्रैव वनगहने क्वापि भूमौ निक्षिप्य किञ्चिन्मात्रमादाय गृहं प्रविशावः । भूयो ऽपि प्रयोजने सञ्जाते तन्मात्रं समेत्यास्मात् स्थानान्नेष्यावः । उक्तं च ।

न वित्तं दर्शयेत् प्राज्ञः कस्यचित् स्वल्पमप्यहो ।
मुनेरपि यतस्तस्य दर्शनाच्चलते मनः ॥४४८॥

तथा च । यथामिषं जले मत्स्यैर्भक्ष्यते श्वापदैर्भुवि ।
आकाशे पक्षिभिश्चैव तथा सर्वत्र वित्तवान् ॥४४९॥

तदाकर्ण्य धर्मबुद्धिराह । भद्र तर्ह्येवं क्रियतां । तथानुष्ठिते द्वावपि तौ स्वगृहं गत्वा सुखेन संस्थितवन्तौ । अथान्यस्मिन्नहनि पापबुद्धिर्निशीथे ऽटव्यां गत्वा तत् सर्वं वित्तं समादाय गर्तां पूरयित्वा स्वभवनं जगाम । अथान्येद्युर्धर्मबुद्धिं समभ्येत्य प्रोवाच । सखे बहुकुटुम्बावावां । वित्ताभावात् सीदावः । तद्गत्वा तत्र स्थाने किञ्चिन्मात्रं धनमानयावः । सो ऽब्रवीत् । भद्र एवं क्रियतां । अथ द्वावपि तत् स्थानं यावत् खनतस्तावद्रिक्तं भाण्डं दृष्टवन्तौ । अत्रान्तरे पापबुद्धिरात्मशिरस्ताडयन् प्रोवाच । भो धर्मबुद्धे त्वया हृतमेतद्धनं नान्येन । यतो भूयो ऽपि गर्तापूरणं कृतं । तत् प्रयच्छ मे तस्यार्द्धं । अथाहं राजकुले निवेदयिष्यामि । स आह । भो दुरात्मन् । मैवं वद । धर्मबुद्धिः खल्वहं । नैतच्चौरकर्म करोमि । उक्तं च ।

मातृवत् परदाराणि परद्रव्याणि लोष्टवत् ।
आत्मवत् सर्वभूतानि वीक्षन्ते धर्मबुद्धयः ॥४५०॥

एवं द्वावपि तौ विवादमानौ धर्माधिकरणं गतौ । प्रोचतुश्च परस्परं

दूषयन्तौ। अथ धर्माधिकरणाधिष्ठितपुरुषैर्दिव्यार्थे यावन्नियोजितौ तावत् पापबुद्धिराह। अहो न सम्यग्दृष्टो ऽयं न्यायः। उक्तं च।

विवादे ऽन्विष्यते पत्रं तदभावे ऽपि साक्षिणः।
साक्ष्यभावात् ततो दिव्यं प्रवदन्ति मनीषिणः ॥४५१॥

तदत्र विषये मम वृक्षदेवता साक्षिभूता तिष्ठति। साप्यावयोरेकतरं चौरं वा साधुं करिष्यति। अथ तैः सर्वैरभिहितं। भो युक्तमुक्तं भवता। उक्तं च यतः।

अन्त्यजो ऽपि यदा साक्षी विवादे सम्प्रजायते।
न तत्र युज्यते दिव्यं किं पुनर्यत्र देवता ॥४५२॥

तदस्माकमप्यत्र विषये महत् कुतूहलं वर्तते। प्रत्यूषसमये युवाभ्यामप्यस्माभिः सह तत्र वनोद्देशे गन्तव्यं। एतस्मिन्नन्तरे पापबुद्धिर्गृहे गत्वा स्वं जनकं समुवाच। तात प्रभूतो ऽयं मयार्थो धर्मबुद्धेश्चोरितः। स च तव वचनेन परिणतिं गच्छति। अन्यथास्माकं प्राणैः सह यास्यति। स चाह। वत्स तद्वद द्रुतं येन प्रोक्त्वा स्थिरतां नयामि। पापबुद्धिः प्राह। तात अस्ति तस्मिन् प्रदेशे महाशमी। तस्यां महत् कोटरमस्ति। तत्र त्वं साम्प्रतमेव प्रविश। ततः प्रभाते यदाहं सत्यश्रावणं करोमि। तदा त्वया वाच्यं यद्धर्मबुद्धिश्चौर इति। तथानुष्ठिते प्रत्यूषे स्नात्वा पापबुद्धिर्धौतप्रावरणो धर्मबुद्धिपुरःसरो धर्माधिकरणिकैः सह तां शमीमभ्येत्य तारस्वरेण प्रोवाच।

आदित्यचन्द्रावनिलो ऽनलश्च द्यौर्भूमिरापो हृदयं मनश्च।
अहश्च रात्रिश्च उभे च सन्ध्ये धर्मो हि जानाति नरस्य वृत्तं ॥४५३॥

भगवति वनदेवते आवयोर्मध्ये यश्चौरस्तं कथय। अथ पापबुद्धिपिता शमीकोटरस्थः प्रोवाच। भो शृणुत शृणुत धर्मबुद्धिनापहृतमेतद्धनं। तदाकर्ण्य सर्वे ते राजपुरुषा विस्मयोत्फुल्ललोचना यावद्धर्मबुद्धिना तच्छमीकोटरं वह्निभोज्यद्रव्यैः परिवेष्ट्य वह्निना सन्दीपितं। अथ

ज्वलति तस्मिन्नर्द्धदग्धशरीरः स्फुटिताक्षः करुणं परिदेवयन् पापबुद्धिपिता शमीकोटरान्निश्चक्राम। ततश्च तैः सर्वैः पृष्टः। भो किमिदं। इत्युक्ते स पापबुद्धिविचेष्टितं सर्वमिदं तेषां निवेदयित्वोपरतः। अथ तं पापबुद्धिं शमीशाखायां प्रविलम्ब्य राजपुरुषा धर्मबुद्धिं प्रशस्येदमूचुः। अहो साधिदमुच्यते।

उपायं चिन्तयेत् प्राज्ञः तथापायं च चिन्तयेत्।
पश्यतो वकमूर्खस्य नकुलेन हता वकाः ॥४५४॥

कथा ॥२०॥ धर्मबुद्धिः प्राह। कथमेतत्। ते प्रोचुः। अस्ति कस्मिंश्चिद्वनोद्देशे बहुवकसनाथो वटपादपः। तस्य कोटरे कृष्णसर्पः प्रतिवसति स्म। स च वकबालकानजातपक्षानपि सदैव भक्षयन् कालं नयति। अथैको वकस्तेन भक्षितान्यपत्यानि दृष्ट्वा शिशुवैराग्यात् सरस्तीरमासाद्य वाष्पपूरितनयनो ऽधोमुखस्तिष्ठति। तं च तादृक्चेष्टितमवलोक्य कुलीरकः प्रोवाच। माम किमेवं रुद्यते भवताद्य। स आह। भद्र किं करोमि। मन्दभाग्यो ऽहं। मम बालकाः स्वजनाश्च वटकोटरनिवासिना सर्पेण भक्षिताः। तद्दुःखदुःखितो ऽहं रोदिमि। तत् कथय मे यद्यस्ति कश्चिदुपायस्तद्विनाशाय। तदाकर्ण्य कुलीरकश्चिन्तयामास। अयं तावदस्मज्जातिसहजवैरी। तत् तथाविधं सत्यानृतमुपदेशं प्रयच्छामि। यथान्ये ऽपि वकाः सङ्क्षयमायान्ति। उक्तं च।

नवनीतसमां वाणीं कृत्वा चित्तं तु निर्दयं।
तथा प्रबोध्यते शत्रुः सान्वयो म्रियते यथा ॥४५५॥

आह च। माम यद्येवं तन्मत्स्यमांसखण्डानि नकुलबिलद्वारात् सर्पकोटरं यावत् प्रक्षिप। येन नकुलस्तन्मार्गेण गत्वा तं दुष्टसर्पं विनाशयति। तथानुष्ठिते मत्स्यमांसखण्डानुसारिणा नकुलेन कृष्णसर्पं निहत्य ते ऽपि तद्वृक्षाश्रया वकाः सर्वे शनैः शनैर्भक्षिताः। अतो वयं ब्रूमः।

उपायं चिन्तयेत् प्राज्ञः तथापायं च चिन्तयेत् ।
पश्यतो बकमूर्खस्य नकुलेन हता बकाः ॥४५६॥

तदनेन पापबुद्धिनोपायश्चिन्तितो नापायः । ततस्तत्फलं प्राप्तं । यतो ऽहं ब्रवीमि ।

धर्मबुद्धिः कुबुद्धिश्च द्वावेतौ विदितौ मम ।
पुत्रेण व्यर्थपाण्डित्यात् पिता धूमेन घातितः ॥४५७॥

एवं मूढ त्वयाप्युपायश्चिन्तितो नापायः । तन्न भवसि त्वं सज्जनः । केवलं पापबुद्धिवत् तत्र भवसि । त्वं मया परिज्ञातः स्वामिनः प्राणसन्देहानयनात् । प्रकटीकृतं त्वया स्वयमेवात्मनो दुष्टत्वं कौटिल्यं च । अथवा साध्विदमुच्यते ।

यत्नादपि कः पश्येच्छिखिनामाहारनिःसरणमार्गं ।
यदि जलदध्वनिमुदितास्त एव मूढा न नृत्येयुः ॥४५८॥

तद्यत्त्वं स्वामिनमप्येनां दशां नयसि । तदस्मद्विधस्य का गणना । तस्मान्ममासन्नेन भवता न भाव्यं । उक्तं च ।

तुलां लोहसहस्रस्य खादन्ति यत्र मूषकाः ।
गजं तत्र हरेच्छ्येनो बालकं को ऽत्र विस्मयः ॥४५९॥

दमनक आह । कथमेतत् । करटकः कथयति । अस्ति कस्मिंश्चि कथा
दधिष्ठाने नान्दुको नाम बणिक्पुत्रः । अपरं च तत्रैव स्थाने बणि ॥२१॥
ग्लक्ष्मणो नाम प्रतिवसति स्म । स च विभवक्षयाद्देशान्तरगमनं व्यचिन्तयत् । उक्तं च ।

यत्र देशे ऽथवा स्थाने भोगान् भुक्त्वा स्ववीर्यतः ।
तस्मिन् विभवहीनो यो वसेत् स पुरुषाधमः ॥४६०॥

तथा च । येनाहङ्कारयुक्तेन चिरं विलसितं पुरा ।
दीनं वदति तत्रैव यः परेषां स निन्दितः ॥४६१॥

तस्य च गृहे लोहभारघटिता पूर्वपुरुषोपार्जिता तुलासीत् । तां च

श्रेष्ठिनान्दुकस्य गृहे निक्षेपभूतां कृत्वा देशान्तरं प्रस्थितः। ततश्च सुचिरं कालं यथेच्छया देशान्तरं भ्रान्त्वा पुनस्तत्रैव स्वपुरं समागम्य श्रेष्ठिनान्दुकं प्राह। भो श्रेष्ठिन् दीयतां मे सा निक्षेपतुला। स आह। भो नास्ति सा। त्वदीया तुला मूषकैर्भक्षिता। तच्छ्रुत्वा लक्ष्मणो प्राह। भो नान्दुक नास्ति ते दोषो यदि सा मूषकैर्भक्षितेति। ईदृगेवायं संसारः। न किंचिदत्र शाश्वतमस्ति। परमहं नद्यां स्नानार्थं गमिष्यामि। तत् त्वमात्मीयं शिशुमेनं धनदेवनामानं मया सह स्नानोपकरणहस्तं प्रेषयेति। सो ऽपि नान्दुको निजचौर्यभयाल्लक्ष्मणस्य शङ्कितः स्वं पुत्रमुवाच। वत्स पितृव्यो ऽयं ते लक्ष्मणः स्नानार्थं नद्यां यास्यति। तद्गम्यतामनेन सह स्नानोपकरणमादायेति। अहो साध्विदमुच्यते।

न भक्त्या कस्यचित् को ऽपि प्रियं प्रकुरुते नरः।
मुक्त्वा भयं प्रलोभं वा कार्यकारणमेव च ॥४६२॥

तथा च। अत्यादरो भवेद्यत्र कार्यकारणवर्जितः।
तत्र शङ्का प्रकर्तव्या परिणामे ऽसुखावहा ॥४६३॥

अथासौ नान्दुकपुत्रः स्नानोपकरणमादाय प्रहृष्टमना लक्ष्मणेन सह प्रस्थितः। तथानुष्ठिते स लक्ष्मणः स्नात्वा तं धनदेवं नान्दुकपुत्रं नदीतटगुहायां प्रक्षिप्य तद्द्वारं बृहच्छिलयावछाद्य च सत्वरं नान्दुकगृहमागतः। पृष्टश्च तेन वणिजा। भो लक्ष्मण कथ्यतां कुत्र मे शिशुर्यस्त्वया सह नदीं गतः। स आह। नदीतटाच्छ्येनेनापहृत इति। श्रेष्ठ्याह। मिथ्यावादिन् किं क्वचिच्छ्येनो बालकं हर्तुं शक्नोति। तत् समर्पय मे सुतं। अन्यथा राजकुले निवेदयिष्यामि। स आह। भो सत्यवादिन् श्येनो बालकं न नयति। तथा मूषका अपि भारलोहघटितां तुलां न भक्षयन्ति। तदर्पय मे तुलां यदि दारकेन तव प्रयोजनं। एवं तौ विवदमानौ द्वावपि राजद्वारमागतौ। अत्र च नान्दु

कस्तारस्वरेण प्रोवाच। भो अब्रह्मण्यमब्रह्मण्यं वर्तते। मम शिशुरनेन चौरेणापहृतः। अथ धर्माधिकारिणस्तं लक्ष्मणमूचुः। भो समर्प्यतां श्रेष्ठिसुतः। स आह। किं करोमि। पश्यतो मे नदीतटाच्छ्येनेनापहृतः। तच्छ्रुत्वा ते प्रोचुः। भो न सत्यमभिहितं भवता। किं श्येनः पञ्चदशवार्षिकं पुत्रं हर्तुं समर्थः स्यात्। लक्ष्मणो विहस्याह। भो भो श्रूयतां मद्वचनं।

तुलां लोहसहस्रस्य खादन्ति यत्र मूषकाः।
गजं तत्र हरेच्छ्येनो बालकं को ऽत्र विस्मयः ॥४६४॥

ते प्रोचुः। कथमेतत्। लक्ष्मणो ऽपि सर्वतुलावृत्तान्तमकथयत्। तच्छ्रुत्वा ते विहस्य नान्दुकस्य चरितं लक्ष्मणस्य च। द्वावपि तौ परस्परं सम्बोध्य तुलाशिशुप्रदानेन सन्तोषितौ। अतो ऽहं ब्रवीमि।

तुलां लोहसहस्रस्य खादन्ति यत्र मूषकाः।
गजं तत्र हरेच्छ्येनो बालकं को ऽत्र विस्मयः ॥४६५॥

करटकः पुनरब्रवीत्। तन्मूर्ख पिङ्गलकवृत्तं सञ्जीवकप्रसादमसहमानेन त्वयैतत् कृतं। अहो साध्विदमुच्यते।

प्रायेणात्र कुलान्वितानकुलजाः श्रीवल्लभं दुर्भगाः।
दातारं कृपणा ऋजूननृजवो वित्ते स्थितं निर्धनाः।
वैरूप्योपहताश्च कान्तवपुषं धर्माश्रयं पापिनः।
नानशास्त्रविचक्षणं च पुरुषं निन्दन्ति मूर्खाः सदा ॥४६६॥

तथा च। मूर्खाणां पण्डिता द्वेष्या निर्धनानां महाधनाः।
व्रतिनः पापशीलानामसतीनां कुलस्त्रियः ॥४६७॥

अथैवं वदतोस्तयोः सञ्जीवकः क्षणमेकं पिङ्गलकेन सह युद्धं कृत्वा तस्य खरनखरप्रहारतो गतायुर्वसुन्धरापृष्ठे पतितः। अथ तं गतायुषमवलोक्य पिङ्गलकस्तद्गुणस्मरणादार्द्रहृदयः सन् प्रोवाच। भो मया पापेन सञ्जीवकं व्यापादयता न युक्तं कृतं। यतो विश्वासघातादन्य

न्नास्ति पापतरं कर्म। उक्तं च।

भूमिक्षये राजविनाश एव भृत्यस्य वा बुद्धिमतो विनाशे।
न युक्तमुक्तं ह्यनयोः समत्वं नष्टापि भूमिः सुलभा न भृत्याः ॥४६८॥

अपरं मयैष शष्पभुक्साचिव्यं प्रापितः। पश्चात् स्वयमेव हतः। एतच्च पापतरं कर्म कृतं। उक्तं च।

इतः सदैत्यप्राप्तश्रीर्नेत एवार्हति क्षयं।
विषवृक्षो ऽपि संवृद्धः स्वयं छेत्तुमसाम्प्रतं ॥४६९॥

तथा मया सभामध्ये सो ऽयं सदैव शंसितः। तत् किं कथयिष्यामि परेषां गुरुसन्मानपूजितमित्राणामग्रे। उक्तं च।

उक्तो भवति यः पूर्वं गुणवानिति संसदि।
न तस्य दोषो कर्तव्यः प्रतिज्ञाभङ्गभीरुणा ॥४७०॥

एवं विलपन्तं दमनकः समुपेत्य सहर्षमिदमाह। देव कातरतमस्तवैष न्यायः। यच्छष्पभुजं द्रोहकारिणं हत्वेत्थं शोचसि। तन्नैतदुपपन्नं भूभुजां। उक्तं च यतः।

पिता वा यदि वा भ्राता पुत्रो भार्याथवा सुहृत्।
प्राणद्रोहं यदा गच्छेद्धन्तव्यो नास्ति पातकं ॥४७१॥

तथा च।

राजा घृणी ब्राह्मणः सर्वभक्षी स्त्री चात्रपा दुष्टमतिः सहायः।
प्रेष्यः प्रतीपो ऽधिकृतः प्रमादी त्याज्या अमी यश्च कृतं न वेत्ति॥

अपि च।

सत्यानृता च परुषा प्रियवादिनी च हिंस्रा दयालुरपि चार्थपरा वदान्या।
भूरिव्यया प्रचुरवित्तसमागमा च वेश्याङ्गनेव नृपनीतिरनेकरूपा॥

अपि च। अकृतोपद्रवः कश्चिन्महानपि न पूज्यते।
पूजयन्ति नरा नागान्न तार्क्ष्यं नागघातिनं ॥४७४॥

तथा च। अशोच्यानन्वशोचस्त्वं प्रज्ञावादांश्च भाषसे।

गतासूनगतासूंश्च नानुशोचन्ति पण्डिताः ॥४७५॥

एवं तेन सम्बोधितः पिङ्गलकः सञ्जीवकशोकं परित्यज्य। दमनकं साचिव्यपदमारोप्य। स्वयं सुखेन राज्यमकरोत्।

इति श्रीविष्णुशर्मविरचिते पञ्चतन्त्रके
मित्रभेदो नाम प्रथमं तन्त्रं
समाप्तं

अथेदमारभ्यते मित्रसम्प्राप्तिर्नाम द्वितीयं तन्त्रं। तस्यायमाद्यः श्लोकः।

असाधना अपि प्राज्ञा बुद्धिमन्तो बहुश्रुताः।
साधयन्त्याशु कार्याणि काकाखुमृगकूर्मवत्॥१॥

तद्यथानुश्रूयते। अस्ति दक्षिणात्ये जनपदे मिहिलारोप्यं नाम नगरं। तस्य नातिदूरस्थो महोच्छ्रायवान् नानाविहङ्गोपभुक्तफलः कीटावृतकोटरश्छायाश्वासितपथिकजनो महान्यग्रोधपादपो ऽस्ति। युक्तमथवा प्रोक्तं च।

छायासुप्तमृगः शकुन्तनिवहैर्विष्वग्विलुप्तच्छदः।
कीटैरावृतकोटरः कपिकुलैः स्कन्धे कृतप्रश्रयः।
विस्रब्धो मधुपैर्निपीतकुसुमः श्लाघ्यः स एव द्रुमः।
सर्वाङ्गैर्बहुसत्त्वसङ्गसुखदो भूभारभूतो ऽपरः॥२॥

तत्र च लघुपतनको नाम वायसः प्रतिवसति स्म। स कदाचित् प्राणयात्रार्थं पुरमुद्दिश्य प्रचलितो यावत् पश्यति। तावज्जालहस्तो ऽतिकृष्णतनुः स्फुटितचरण ऊर्ध्वकेशो यमकिङ्कराकारो लुब्धकः सम्मुखो बभूव। अथ तं दृष्ट्वा शङ्कितमना व्यचिन्तयत्। अहो ऽयं दुरात्माद्य मदाश्रयवटपादपसम्मुखो गच्छति। तन्न ज्ञायते किमद्य वटनिवासिनां विहङ्गमानां सङ्क्षयो भविष्यति न वा। एवं बहुविधं विचिन्त्य तत्क्षणान्निवृत्य तमेव वटपादपं गत्वा तान् सर्वान् विहङ्गमान् प्रोवाच। भो अयं दुरात्मा लुब्धको जालतण्डुलहस्तः समभ्येति। तत्

सर्वथा तस्य न विश्वसनीयं। एष जालं प्रसार्य तण्डुलान् प्रक्षेप्स्यति। ते तण्डुला भवद्भिः सर्वैरपि कालकूटसदृशा द्रष्टव्याः। एवं वदतस्तस्य स लुब्धकस्तत्र वटतल आगत्य तज्जालं प्रसार्य सिन्दुवारसदृशांस्तण्डुलान् प्रक्षिप्य नातिदूरं गत्वा निभृतं स्थितः। अथ ये तत्र पक्षिणः स्थितास्ते लघुपतनकवाक्यार्गलया निवारितास्तांस्तण्डुलान् हलाहलाङ्कुरानिव वीक्षमाणास्तस्थुः। अत्रान्तरे चित्रग्रीवो नाम कपोतराजः सहस्रपरिवारः प्राणयात्रार्थं परिभ्रमंस्तांस्तण्डुलान् दूरतो ऽप्यपश्यत्। अथ लघुपतनकेन निवार्यमाणो ऽपि जिह्वालौल्यात् तद्भक्षणार्थमपतत्। सपरिवारो निबद्धश्च। अथवा साध्विदमुच्यते।

जिह्वालौल्यप्रसक्तानां जलमध्यनिवासिनां।
अचिन्तितो बधो ऽज्ञानां मीनानामिव जायते ॥३॥

अथवा दैवप्रतिकूलतया भवत्येवं। न कश्चिदस्य दोषः। उक्तं च।

पौलस्त्यः कथमन्यदारहरणे दोषं न विज्ञातवान्।
रामेणापि कथं न हेमहरिणस्यासम्भवो लक्षितः।
अक्षैश्चापि युधिष्ठिरेण सहसा प्राप्तो ह्यनर्थः कथं।
प्रत्यासन्नविपत्तिमूढमनसां प्रायो मतिः क्षीयते ॥४॥

तथा च। कृतान्तपाशबद्धानां दैवोपहतचेतसां।
बुद्धयः कुब्जगामिन्यो भवन्ति महतामपि ॥५॥

अत्रान्तरे लुब्धकस्तान् बद्धान् विज्ञाय प्रहृष्टमनाः प्रोद्यतयष्टिर्वधार्थं प्रधावितः। चित्रग्रीवो ऽप्यात्मानं सपरिवारं बद्धं मत्वा लुब्धकमायान्तमवलोक्य तान् कपोतानूचे। अहो न भेतव्यं। उक्तं च यतः।

व्यसनेष्वेव सर्वेषु यस्य बुद्धिर्न हीयते।
स तेषां पारमभ्येति तत्प्रभावादसंशयं ॥६॥

तथा च। सम्पत्तौ च विपत्तौ च महतामेकरूपता।
उदये सविता रक्तो रक्तश्चास्तमने तथा ॥७॥

तत् सर्वे वयं हेलयोड्डीय सज्जाला अस्यादर्शनं गत्वा मुक्तिं प्राप्नुमः। नो चेद्भयविक्लवाः सन्तो हेलया समुत्पतनं न करिष्यथ। तदा मृत्युमवाप्स्यथेति। उक्तं च।

तन्तवो ऽप्यायता नित्यं तन्तवो बहुलाः समाः।
बहूनुद्धादयो ऽजस्रं निबध्नन्त्यगमानपि ॥८॥

तथानुष्ठिते लुब्धकस्य जालमादायाकाशेन गच्छतस्तान् भूतलस्थो लुब्धकः पर्यधावत्। तत ऊर्द्ध्वनयनः श्लोकमेनमपठत्।

अक्लेशादिव चिन्तितमुपतिष्ठति सिद्धमेव पुण्यवतां।
उड्डीयापुण्यवतां गच्छन्ति कपोतकाः पश्य ॥९॥

अथवा। जालमादाय गच्छन्ति संहताः पक्षिणो ऽप्यमी।
यावच्च विवदिष्यन्ते पतिष्यन्ति न संशयः ॥१०॥

लघुपतनको ऽपि प्राणयात्राक्रियां त्यक्त्वा किमत्र भविष्यतीति कुतूहलात् तत्पृष्ठलग्नो ऽनुससार। अथ दृष्टिगोचरान् कपोतान् विज्ञाय लुब्धको निराशः श्लोकमेनं पठन् निवृत्तः।

न हि भवति यन्न भाव्यं हि भाव्यं विनापि यत्नेन।
करतलगतमपि नश्यति यस्य तु भवितव्यता नास्ति ॥११॥

तथा च। पराङ्मुखे विधौ चेत् स्यात् कथञ्चिद्द्रविणागमः।
तत् सो ऽन्यदपि सङ्गृह्य याति शङ्खनिधिर्यथा ॥१२॥

तदास्तां तावद्विहङ्गमामिषलोभो यावत् कुटुम्बजीवनोपायभूतं जालमपि मे नष्टं। चित्रग्रीवो ऽपि लुब्धकमदर्शनीभूतं विज्ञाय तान् कपोतानुवाच। भो निवृत्तः स दुरात्मा लुब्धकः। तत् सर्वैरपि स्वस्थैर्गम्यतां मिहिलारोप्यस्य नगरस्य प्रागुत्तरदिग्भागे। तत्र मम सुहृद्धिरण्यको नाम मूषकः सर्वेषां पाशच्छेदनं करिष्यति। उक्तं च यतः।

सर्वेषामेव मर्त्यानां व्यसने समुपस्थिते।
वाङ्मात्रेणापि साहाय्यं मित्रादन्यो न सन्दधे ॥१३॥

एवं ते कपोताश्चित्रग्रीवेण सम्बोधिता हिरण्यकबिलदुर्गं प्रापुः। हिरण्यको ऽपि सहस्रमुखबिलदुर्गं प्रविष्टः सन्नकुतोभयः सुखेनास्ते।

अथ च। अनागतं भयं दृष्ट्वा नीतिशास्त्रविशारदः।
अवसन् मूषकस्तत्र कृत्वा शतमुखं बिलं ॥१४॥

अथ चित्रग्रीवो ऽपि बिलदुर्गद्वारं गत्वा तारस्वरेण प्रोवाच। भो भो मित्र हिरण्यक सत्वरमागच्छागच्छ। महती मे व्यसनावस्था वर्तते। तदाकर्ण्य हिरण्यको ऽपि बिलदुर्गान्तर्गतः प्रोवाच। भो भो को भवान्। किमर्थमायातः। कीदृक् ते व्यसनावस्थानं। तत् कथ्यतामिति। तच्छ्रुत्वा चित्रग्रीव आह। चित्रग्रीवो नाम कपोतराजो ऽहं ते सुहृत्। तत् सत्वरमागच्छ। गुरुतरं प्रयोजनमस्ति। तदाकर्ण्य स पुलकिततनुः प्रहृष्टात्मा स्थिरमनास्त्वरमाणो निःक्रान्तः। अथवा साध्विदमुच्यते।

सुहृदः स्नेहसम्पन्ना लोचनानन्ददायिनः।
गृहे गृहवतां नित्यमागच्छन्ति कृतात्मनां ॥१५॥
आदित्यस्योदयं ज्ञातताम्बूलं भारतीकथा।
इष्टा भार्या सुमित्रं च अपूर्वाणि दिने दिने ॥१६॥

तथा च। भवने सुहृदो यस्य समागच्छन्ति नित्यशः।
चित्ते च तस्य सौख्यस्य न किञ्चित् प्रतिमं सुखं ॥१७॥

अथ चित्रग्रीवं सपरिवारं पाशबद्धमालोक्य हिरण्यकः सविषादमिदमाह। भो किमेतत्। स आह। भो जानन्नपि किमेवं पृच्छसि। उक्तं च यतः।

यस्माच्च येन च यदा च यथा च यच्च यावच्च यत्र च शुभाशुभमात्मकर्म।
तस्माच्च तेन च तदा च तथा च तच्च तावच्च तत्र च कृतान्तवशादुपैति॥

तत् प्राप्तं मयैतद्बन्धनं जिह्वालौल्यात्। साम्प्रतं त्वं पाशविमोक्षणं कुरु। मा विलम्ब। तदाकर्ण्य हिरण्यकः प्राह। अहो साध्विदमुच्यते।

अर्द्धार्द्धाद्योजनशतादामिषं वीक्षते खगः ।
सो ऽपि पार्श्वस्थितं दैवाद्बन्धनं नैव पश्यति ॥ १९ ॥

तथा च ।

रविनिशाकरयोर्ग्रहपीडनं गजभुजङ्गविहङ्गमबन्धनं ।
मतिमतां च निरीक्ष्य दरिद्रतां विधिरहो बलवानिति मे मतिः ॥

तथा च । व्योमैकान्तविहारिणो ऽपि विहगाः सम्प्राप्नुवन्त्यापदं ।
बध्यन्ते निपुणैरगाधसलिलान्मीनाः समुद्रादपि ।
दुर्णीतं किमिहास्ति किं च सुकृतं कः स्थानलाभे गुणः ।
कालो हि व्यसनप्रसारितभुजो गृह्णाति दूरादपि ॥ २१ ॥

एवमुक्त्वा चित्रग्रीवस्य पाशं छेत्तुमुद्यतः । चित्रग्रीव आह । मा मैवं कुरु । प्रथमं मम भृत्यानां पाशच्छेदः क्रियतां । ततो ममेति । तच्छ्रुत्वा हिरण्यकः कुपितः प्राह । भो न युक्तमुक्तं भवता । यतः स्वामिनो ऽनन्तरं भृत्यः । स आह । भद्र मा मैवं वद । एते सर्वे ऽपि वराका मदाश्रयाः । अपरमपि परित्यज्य समागताः । तत् कथमेतावन्मात्रमपि सन्मानं न करोमि । उक्तं च ।

यः सन्मानं सदा धत्ते भृत्यानां क्षितिपो ऽधिकं ।
वित्ताभावे ऽपि तं दृष्टास्ते त्यजन्ति न कर्हिचित् ॥ २२ ॥

तथा च । विश्वासः सम्पदां मूलं तेन यूथपतिर्गजः ।
सिंहो मृगाधिपत्ये ऽपि न मृगैः परिवार्यते ॥ २३ ॥

अपरं मत्पाशच्छेदे कदाचित् तव दन्तभङ्गो भवति । अथवा स पापात्मा लुब्धकः समभ्येति । तन्नूनं मम नरकपातः । उक्तं च ।

सदाचारेषु भृत्येषु संसीदत्सु च यः प्रभुः ।
सुखी स्यान्नरकं याति परत्रेह च सीदति ॥ २४ ॥

तच्छ्रुत्वा प्रहृष्टो हिरण्यकः प्राह । भो वेद्म्यहं राजधर्ममेनं । परं तव परीक्षेयं कृता । तत् सर्वेषां पाशच्छेदं विधास्यामि । भवानप्यनेन

विधिना बहुकपोतपरिवारितो भविष्यति। उक्तं च।

कारुण्यं संविभागश्च यस्य भृत्येषु सर्वदा।
सम्भाव्यः स महीपालस्त्रैलोक्यस्यापि रक्षणे ॥२५॥

एवमुक्त्वा सर्वेषां पाशच्छेदं कृत्वा हिरण्यकश्चित्रग्रीवमाह। मित्र गम्यतामधुना स्वाश्रयं प्रति। भूयो ऽपि व्यसने सम्प्राप्ते समागन्तव्यमिति सम्प्रेष्य। एवमुक्त्वा स्वदुर्गं प्रविष्टः। चित्रग्रीवो ऽपि सपरिवारः स्वाश्रयमगमत्। अथवा साधिदमुच्यते।

मित्रवान् साधयत्यर्थान् दुःसाध्यानपि वै जनः।
तस्मान्मित्राणि कुर्वीत समानान्येव चात्मनः ॥२६॥

लघुपतनको ऽपि वायसस्तं चित्रग्रीवबन्धनमोक्षमवलोक्य विस्मयमना व्यचिन्तयत्। अहो बुद्धिरस्य हिरण्यकस्य शक्तिश्च दुर्गसामग्री च। तदीदृगेव विधिर्विहङ्गमानां बन्धात् मोक्षक्रियासमाचारः। अहं च न कस्यचिद्विश्वसिमि चलकृतिश्च। तथाप्येनं मित्रं करोमि। उक्तं च।

अपि सम्पूर्णतायुक्तैः कर्तव्याः सुहृदो बुधैः।
नदीशः परिपूर्णो ऽपि मित्रोदयमुपेक्षते ॥२७॥

तदेवं सम्प्रधार्य पादपादवतीर्य बिलद्वारमाश्रित्य चित्रग्रीववच्छब्देन हिरण्यकमाहूतवान्। एह्येहि भो हिरण्यक एहि। तच्छब्दं श्रुत्वा हिरण्यको व्यचिन्तयत्। किमन्यो ऽपि कश्चित् सावशेषबन्धनः कपोतस्तिष्ठति। येन मां व्याहरति। आह च। भो को भवान्। स आह। अहं लघुपतनको नाम वायसः। तच्छ्रुत्वा हिरण्यको विशेषादन्तर्लीनः। आह च। भद्र द्रुतं गम्यतामस्मात् स्थानात्। वायस आह। अहं तव पार्श्वे गुरुकार्येण समागतः। तत् किं न क्रियते मया सह सन्दर्शनं। हिरण्यक आह। न मे ऽस्ति त्वया सह सङ्गमेन प्रयोजनं। वायस आह। भो चित्रग्रीवस्य बन्धमोक्षणं त्वत्सकाशाद्दृष्ट्वा मे महती प्रीतिः सञ्जाता। तत् कदाचिन्मम बन्धने सञ्जाते

तव पार्श्वान्मुक्तिर्भविष्यति। तत् क्रियतां मया सह मैत्रीति। हिरण्यक आह। अहो त्वं भोक्ता। अहं भोज्यभूतः। तत् का त्वया सह मम मैत्री। उक्तं च।

ययोरेव समं वित्तं ययोरेव समं कुलं।
तयोर्मैत्री विवाहश्च न तु पुष्टविपुष्टयोः ॥२८॥

तथा च। यो मित्रं कुरुते मूढ आत्मनो ऽसदृशं कुधीः।
हीनं वाप्यधिकं वापि हास्यतां यात्यसौ जने ॥२९॥

तद्गम्यतामिति। वायस आह। भो हिरण्यक एषो ऽहं तव दुर्गद्वारमुपविष्टः। यदि त्वं मैत्रीं न करोषि तत् प्राणमोक्षणं तवाग्रे करिष्यामि। अथवा प्रायोपवेशनं मे स्यादिति। हिरण्यक आह। भो कथं त्वया पूर्ववैरिणा सह मैत्रीं करोमि। उक्तं च।

वैरिणा न हि सन्दध्यात् सुश्लिष्टेनापि सन्धिना।
सुतप्तमपि पानीयं शमयत्येव पावकं ॥३०॥

वायस आह। भवता सह मम दर्शनमपि नास्ति। कुतो वैरं। तत् किमनुचितं वदसि। हिरण्यक आह। द्विविधं वैरं भवति सहजं कृत्रिमं च। तत् सहजवैरी त्वमस्माकं। उक्तं च यतः।

कृत्रिमं नाशमायाति वैरं द्राक् कृत्रिमैर्गुणैः।
प्राणदानं विना वैरं सहजं याति न क्षयं ॥३१॥

वायस आह। भो द्विविधस्यापि वैरस्य लक्षणं श्रोतुमिच्छामि। तत् कथ्यतां। हिरण्यक आह। भो कारणेन निवृत्तं कृत्रिमं। तत् तदर्होपकारकारणाद्गच्छति। स्वाभाविकं पुनः कथमपि न गच्छति। तद्यथा नकुलसर्पाणां। शष्पभुग्नखायुधानां। जलानलयोः। देवदैत्यानां। सारमेयमार्जाराणां। सपत्नीनां। ईश्वरदरिद्राणां। सिंहगजानां। लुब्धकहरिणानां। श्रोत्रियभ्रष्टक्रियाणां। पतिव्रताकुलटानां। मूर्खपण्डितानां। सज्जनदुर्जनानां। नित्यं वैरं भवति। न च कस्यचित्

केनापि को ऽपि व्यापादितः। तथापि प्राणान् सन्तापयन्ति। वायस आह। भो अकारणमेतत्। श्रूयतां मे वचनं।

कारणान्मित्रतां याति कारणादेति शत्रुतां।
तस्मान्मित्रत्वमेवात्र योज्यं वैरं न धीमता ॥३२॥

तस्मात् कुरु मया सह समागमं मित्रधर्मार्थं च। हिरण्यक आह। त्वया सह मम कः समागमः। भो श्रूयतां नीतिसर्वस्वं।

सकृद्दुष्टं हि यो मित्रं पुनः सन्धातुमिच्छति।
स मृत्युमुपगृह्णाति गर्भादश्वतरी यथा ॥३३॥

अथवा गुणवानहं। न मे कश्चिद्वैरयातनां करिष्यति। एतदपि न सम्भाव्यं। उक्तं च।

सिंहो व्याकरणस्य कर्तुरहरत् प्राणान् प्रियान् पाणिनेः।
मीमांसाकृतमुन्ममाथ सहसा हस्ती मुनिं जैमिनिं।
छन्दोज्ञाननिधिं जघान मकरो वेलातटे पिङ्गलं।
अज्ञानावृतचेतसामतिरुषां को ऽर्थस्तिरश्चां गुणैः ॥३४॥

वायस आह। अस्त्येतत्। तथापि श्रूयतां।

उपकारिच्च लोकानां निमित्तान्मृगपक्षिणां।
भयाल्लोभाच्च मूर्खाणां मैत्री स्याद्दर्शनात् सतां ॥३५॥

तथा च। मृद्घट इव सुखभेद्यो दुःसन्धानश्च दुर्जनो भवति।
सुजनस्तु कनकघट इव दुर्भेदः सुकरसन्धिश्च ॥३६॥

अपि च। इक्षोरग्रात् क्रमशः पर्वणि पर्वणि यथा रसविशेषः।
तद्वत् सज्जनमैत्री विपरीतानां तु विपरीता ॥३७॥

तथा च।

आरम्भगुर्वी क्षयिणी क्रमेण लघ्वी पुरा वृद्धिमती च पश्चात्।
दिनस्य पूर्वार्द्धपरार्द्धभिन्ना छायेव मैत्री खलु सज्जनानां ॥३८॥

तत् साधुरेवाहं। अपरं त्वां शपथादिभिर्निर्भयं करोमि। हिरण्यक

आह। न मे ऽस्ति त्वदीयशपथैः प्रत्ययः। उक्तं च यतः।

शपथैः संहितस्यापि न विश्वासं रिपोर्व्रजेत्।
श्रूयते शपथं कृत्वा वृत्रः शक्रेण सूदितः ॥३९॥

तथा च। न विश्वासं विना शत्रुर्देवानामपि सिध्यति।
विश्वासात् त्रिदशेन्द्रेण दितेर्गर्भो विदारितः ॥४०॥

अन्यच्च। बृहस्पतेरपि प्राज्ञस्तस्मान्नैवात्र विश्वसेत्।
य इच्छेदात्मनो वृद्धिमायुष्यं च सुखानि च ॥४१॥

तथा च। सुसूक्ष्मेणापि रन्ध्रेण प्रविशत्यन्तरं रिपुः।
नाशयेच्च शनैः पश्चात् प्लवं सलिलपूरवत् ॥४२॥

अपि च। न विश्वसेदविश्वस्ते विश्वस्ते ऽपि न विश्वसेत्।
विश्वासाद्भयमुत्पन्नं मूलान्यपि निकृन्तति ॥४३॥

तथा च। न वध्यते ह्यविश्वस्तो दुर्बलो ऽपि बलोत्कटैः।
विश्वस्ताश्चाशु वध्यन्ते बलवन्तो ऽपि दुर्बलैः ॥४४॥

पुनश्च। सुकृतिर्विष्णुगुप्तस्य मित्राप्तिर्भार्गवस्य च।
बृहस्पतेरविश्वासो नीतिसन्धौ त्रिधास्थितः ॥४५॥

तथा च। महताप्यर्थसारेण यो विश्वसिति शत्रुषु।
भार्यासु च विरक्तासु तदन्तं तस्य जीवितं ॥४६॥

तच्छ्रुत्वा लघुपतनको ऽपि निरुत्तरो विहितश्चिन्तयामास। अहो बुद्धिप्रागल्भ्यमस्य नीतिविषये। अथवा। अत एवास्योपरि मे मैत्रीपक्षपातः। आह च। भो हिरण्यक।

सतां साप्तपदं मैत्रमित्याहुर्विबुधा जनाः।
तस्मात् त्वं मित्रतां प्राप्तो वचनं मम तच्छृणु ॥४७॥

तद्दुर्गस्थेनापि त्वया मया सह नित्यमेवालापगुणदोषसम्भाषितगोष्ठीकथा सर्वदा कर्तव्या। यद्येवं न विश्वसिषि। तच्छ्रुत्वा हिरण्यको ऽपि व्यचिन्तयत्। विदग्धवचनो ऽयं दृश्यते लघुपतनकः सत्यवाक्यश्च।

तद्युक्तमनेन सह मैत्रीकरणं। सुभाषितगोष्ठी शुभा भविष्यति। आह च। यद्येवं तदस्तु त्वया सह मैत्री। परं कदाचिन्मम दुर्गे चरणपातो ऽपि त्वया न कर्तव्यः। उक्तं च।

भीतभीतः पुरा शत्रुर्मन्दं मन्दं विसर्पति।
भूमौ प्रहेलया पश्चाज्जारहस्तो ऽङ्गनास्विव ॥४८॥

तच्छ्रुत्वा वायस आह। भद्र यद्येवं तद्भवतु। ततः प्रभृति द्वावपि तौ सुभाषितगोष्ठीसुखमनुभवन्तौ तिष्ठतः। परस्परं कृतोपकारौ कालं नयतः। लघुपतनको ऽपि मांसखण्डानि सुमृष्टानि हिरण्यकार्थमानयति। हिरण्यको ऽपि विशिष्टांस्तण्डुलानन्यानपि भक्ष्यविशेषान् लघुपतनकार्थमानयति। अथवा युज्यते द्वाभ्यामप्येतत्। उक्तं च।

ददाति प्रतिगृह्णाति गुह्यमाख्याति पृच्छति।
भुङ्क्ते भोजयते चैव षड्विधं प्रीतिलक्षणं ॥४९॥

तथा च। नोपकारं विना प्रीतिः कथञ्चित् कस्यचिद्भवेत्।
उपयाचितदानेन यतो देवा अभीष्टदाः ॥५०॥

अपि च। तावत् प्रीतिर्भवेल्लोके यावद्दानं प्रदीयते।
वत्सः क्षीरक्षयं दृष्ट्वा परित्यजति मातरं ॥५१॥

पश्य दानस्य माहात्म्यं सद्यः प्रत्ययकारकं।
यत्प्रभावादपि द्वेषी मित्रतां याति तत्क्षणात् ॥५२॥

तथा च।

पुत्रादपि प्रियतरं नियमेन मन्ये द्दानं पशोरपि विवेकविवर्जितस्य।
दत्ते खले ऽपि निखिलं खलु येन दुग्धं नित्यं ददाति महिषी ससुतापि पश्य॥

किं बहुना। प्रीतिं निरन्तरां कृत्वा दुर्भेद्यां नखमांसवत्।
मूषको वायसश्चैव गतावेकान्तमित्रतां ॥५४॥

एवं स मूषकस्तदुपकाररञ्जितस्तथा विश्वस्तो यथा तस्य पक्षमध्ये प्रविष्टस्तेनैव सह सर्वदा गोष्ठीमनुभवति। अथान्यस्मिन्नहनि वायसो

ऽश्रुपूर्णनेत्रो ऽभ्येत्य तमुवाच। भो हिरण्यक विरक्तिः सञ्जाता मे साम्प्रतमस्य देशस्योपरि। तदन्यत्र यास्यामि। हिरण्यक आह। भद्र किं विरक्तेः कारणं। सो ऽब्रवीत्। भद्र श्रूयतां। अत्र देशे महोत्पातानावृष्ट्या दुर्भिक्षं सञ्जातं। दुर्भिक्षत्वाज्जनो बुभुक्षापीडितः को ऽपि बलिमात्रमपि न प्रयच्छति। अपरं गृहे गृहे बुभुक्षितैर्जनैर्विहङ्गमानां बन्धनार्थं पाशाः प्रगुणीकृतास्तिष्ठन्ति। अहमप्यायुःशेषतया पाशेन बद्ध उद्धरितः। एतद्विरक्तेः कारणं। हिरण्यक आह। अथ क्व भवान् प्रस्थितः। स प्राह। अस्ति दक्षिणापथे वनगहनमध्ये महासरः। तत्रास्ति मे तवाप्यधिकः परमसुहृन्मन्थरको नाम कूर्मः। स च मे मत्स्यमांसखण्डानि दास्यति। तद्भक्षणात् तेन सह सुभाषितगोष्ठीसुखेन कालं नेष्यामि। नाहमत्र विहङ्गानां पाशबन्धात् क्षयं द्रष्टुमिच्छामि। उक्तं च।

अनावृष्टिहते देशे शस्ये च प्रलयं गते।
धन्यास्तात न पश्यन्ति देशभङ्गं कुलक्षयं ॥५५॥

तथा च। विद्वत्त्वं च नृपत्वं च नैव तुल्यं कदाचन।
स्वदेशे पूज्यते राजा विद्वान् सर्वत्र पूज्यते ॥५६॥

हिरण्यक आह। यद्येवं तदहमपि त्वया सह तत्रैवागमिष्यामि। यतो ममापि महद्दुःखं प्रवर्तते। वायस आह। भो तव किं दुःखं। तत् कथ्यतां। हिरण्यक आह। भो मित्र बहु वक्तव्यमस्ति। अत्र विषये तत्रैव गत्वा सर्वं सविस्तरं कथयिष्यामि। वायस आह। अहं तावदाकाशगतिर्भवान् भूचरः। तत् कथं भवतो मया सहागमनं। स आह। यदि मत्प्राणै रक्षितैः प्रयोजनं। तदात्मपृष्ठमारोप्य मां तत्र प्रापयिष्यसि। नान्यथा मम गतिरस्ति। तच्छ्रुत्वा सानन्दं वायस आह। यद्येवं तद्धन्यो ऽहं यद्भवत्तं महान्तं कालं नयामि। अहं सम्पातादिकानष्टावुड्डीनगतिविशेषान् वेद्मि। उक्तं च।

सम्पातं च प्रपातं च महापातं निपातनं ।
चक्रं तिर्यक् चोर्ध्वमष्टमं लघुसंज्ञकं ॥५७॥

तस्मात् समारुह मत्पृष्ठं । येन सुखेन तत् सरः प्रापयामि । तथानुष्ठिते हिरण्यकस्तत्क्षणादेव तस्योपरि समारूढः । सो ऽपि तमादाय सम्पातोड्डयनेन प्रस्थितः । ततः शनैः शनैस्तेन सह तत् सरः प्रचलितः । एतस्मिन्नन्तरे लघुपतनकं मूषिकाधिष्ठितं दूरतो ऽपि दृष्ट्वा देशकालविदसामान्यः काको ऽयमिति मत्वा सत्वरं मन्थरको जले प्रविष्टः । लघुपतनको ऽपि तीरस्थतरुकोटरे हिरण्यकं मुक्त्वा स्वयं शाखाग्रमारुह्य तारस्वरेण प्रोवाच । भो मन्थरक मन्थरक आगच्छागच्छ । तव मित्रमहं लघुपतनको नाम वायसश्चिरात् सोत्कण्ठहृदयः समायातः । तदागत्यालिङ्गय मां । उक्तं च यतः ।

किं चन्दनैः सकर्पूरैस्तुहिनैः शीतलैश्च किं ।
सर्वे ते मित्रगात्रस्य कलां नार्हन्ति षोडशीं ॥५८॥

तथा च । केनामृतमिदं सृष्टं मित्रमित्यक्षरद्वयं ।
आपदां च परित्राणं शोकसन्तापभेषजं ॥५९॥

तच्छ्रुत्वा निपुणतरं परिज्ञाय पुलकिततनुरानन्दाश्रुपूरितनयनो मन्थरकः सत्वरं सलिलान्निष्क्रम्य प्रोवाच । एह्येहि मित्र आलिङ्गय मां । चिरकालात् त्वं न मया परिज्ञातः । तेनाहं सलिलान्तं प्रविष्टः ।
उक्तं च । यस्य न ज्ञायते वीर्यं न कुलं न विचेष्टितं ।
न तेन संविदं कुर्यादित्युवाच बृहस्पतिः ॥६०॥

एवमुक्त्वा लघुपतनको वृक्षादवतीर्य तमालिङ्गितवान् । तथा साधु चेदमुच्यते ।

अमृतस्य प्रवाहैः किं कायक्षालनसङ्गतैः ।
चिरान्मित्रपरिष्वङ्गो यो ऽसौ मूल्यविवर्जितः ॥६१॥

एवं तौ द्वावपि विहितालिङ्गनौ पुलकितशरीरौ वृक्षादधः समुपवि

ष्टावात्मचरितवृत्तान्तं परस्परं प्रोचतुः। हिरण्यको ऽपि मन्थरकस्य प्रणामं कृत्वा वायसाभ्यासे समुपविष्टः। अथ तं समालोक्य मन्थरको लघुपतनकमुवाच। को ऽयं मूषकः। कस्माच्च त्वया भक्ष्यभूतो ऽपि पृष्ठमारोप्यात्र समानीतः। तन्नात्र स्वल्पकारणेन भाव्यं। तच्छ्रुत्वा लघुपतनक आह। भो हिरण्यको नाम मूषको ऽयं मम सुहृत्। द्वितीयमिव जीवितं। तत् किं बहुना।

पर्जन्यस्य यथा धारा यथा च दिवि तारकाः।
सिकतारेणवो यद्वत् संख्यया परिवर्जिताः।
गुणाः संख्यापरित्यक्तास्तद्वदस्य महात्मनः।
परं निर्वेदमापन्नः सम्प्राप्तो ऽयं तवान्तिकं ॥६२॥

मन्थरक आह। किमस्य वैराग्यस्य कारणं। वायस आह। पृष्टो मया तत्रैव। परमनेनाभिहितं। बहु वक्तव्यमस्ति। तत् तत्रैव गतः कथयिष्यामि। ममापि न निवेदितं। तद्भद्र हिरण्यक इदानीं निवेद्य तामुभयोरपि तदात्मनो वैराग्यकारणं।

कथा ॥१॥ हिरण्यकः कथयति। अस्ति दाक्षिणात्ये जनपदे मिहिलारोप्यं नाम नगरं। तस्य नातिदूरे मठायतनं भगवतो महेश्वरस्य। तत्र च ताम्रचूडो नाम परिव्राजकः प्रतिवसति स्म। स च नगरे भिक्षाटनं कृत्वा प्रभूतं सिद्धमन्नमुपादाय मठं गत्वा प्राणयात्रां समाचरति। भिक्षाशेषं च तत्रैव भिक्षापात्रे निधाय तद्भिक्षापात्रं नागदन्ते विलम्बयित्वा पश्चात् स्वपिति। प्रत्यूषे तदन्नं कर्मकाराणां दत्त्वा तत्रैव देवतायतने सन्मार्जनोपलेपनमण्डनादिकं कर्म समाज्ञापयति। अथान्यस्मिन्नहनि ममानुचरैर्निवेदितं। स्वामिन् ताम्रचूडमठे सिद्धमन्नं प्रभूतं नागदन्तावलम्बितं सदैव तिष्ठति। तद्वयं भक्षितुं न शक्नुमः। स्वामिनः पुनरगम्यं किमपि नास्ति। तत् किं व्रजनेनान्यत्र। अद्य तत्र गत्वा यथेच्छया भुंज्महे तव प्रसादात्। किमन्यत्र वृथाश्रमेण। तदाकर्ण्याहं

सकलयूथपरिवृतस्तत्क्षणादेव तत्र मठे गतः। उत्प्लुत्य च तस्मिन् भिक्षापात्रे समारूढः। तत्र पक्वान्नभक्ष्यविशेषाणि भृत्यानामाहारं दत्त्वा पश्चात् स्वयमेव भक्षयामि। सर्वेषां तृप्तौ जातायां भूयो ऽपि स्वस्थानं गच्छामः। एवं नित्यमेवाहं सपरिवारस्तदन्नं भक्षयामि। परिव्राजको ऽपि यथाशक्ति रक्षति। परं यदैव निद्रान्तरितो भवति। तदाहं तत्रारुह्यात्मकृत्यं करोमि। अथ कदाचित् तेन मम रक्षार्थं महान् जर्जरवंशः समानीतः। तेन सुप्तो ऽपि मम भयाद्भिक्षापात्रं ताडयति। अहमप्यभक्षिते ऽप्यन्ने प्रहारभयादपसर्पामि। एवं तेन सह सकलां रात्रिं यावद्विग्रहपरस्य कालो व्रजति। अथान्यस्मिन्नहनि तस्य मठे बृहत्स्फिग्नाम तत्सुहृत् परिव्राजकस्तीर्थयात्राप्रसङ्गेन पान्थः प्राघूर्णकः समायातः। तं दृष्ट्वा प्रत्युत्थानविधिना सम्भाव्यप्रतिपत्तिपूर्वकमभ्यागतक्रियया नियोजितः। ततश्च रात्रावेकत्र संस्तरे द्वावपि तौ प्रसुप्तौ धर्मकथां कर्तुमारब्धौ। अथ बृहत्स्फिक्सुभाषितगोष्ठीषु स ताम्रचूडो मम त्रासाद्व्याक्षिप्तमना जर्जरवंशेन भिक्षापात्रं ताडयन् तस्य शून्यं प्रतिवचनं प्रयच्छति। तं प्रति न किमप्युदाहरति। अथासावभ्यागतः परं कोपमुपागतस्तमुवाच। भो ताम्रचूड परिज्ञातस्त्वं मया सम्यग्न सुहृत्। तेन मया सह साह्लादं न जल्पसि। तदधुना रात्रावपि त्वदीयं मठं त्यक्त्वान्यत्र यास्यामि। उक्तं च यतः।

एह्यागच्छ समाविशासनमिदं कस्माच्चिराद्दृश्यसे।
का वार्त्ता ह्यतिदुर्बलो ऽसि कुशलं प्रीतो ऽस्मि ते दर्शनात्।
एवं ये समुपागतान् प्रणयिनः प्रह्लादयन्त्यादरात्।
तेषां युक्तमशङ्कितेन मनसा हर्म्याणि गन्तुं सदा ॥६३॥

तथा च। गृही यत्रागतं दृष्ट्वा दिशो वीक्षेत वाप्यधः।
तत्र ये सदनं यान्ति ते शृङ्गरहिता वृषाः ॥६४॥

अन्यच्च। नाभ्युत्थानक्रिया यत्र नालापा मधुराक्षराः।

गुणदोषकथा नैव तस्य कर्म्ये न गम्यते ॥६५॥

तदेकमठप्राप्त्यापि त्वं गर्वितः। तत्र क्व सुहृत्स्नेहः। नैतद्वेत्सि यन्मठाश्रयव्याजेन नरकोपार्जनं क्रियते। उक्तं च।

नरकाय मतिस्ते चेत् पौरोहित्यं समाचर।
वर्षं यावत् किमन्येन मठचित्या दिनत्रयं ॥६६॥

तन्मूढ शोचितव्ये ऽप्यर्थे त्वं गर्वितः। अथ तच्छ्रुत्वा भयत्रस्तमनास्ताम्रचूडस्तमुवाच। भगवन् मैवं वद। न त्वया समानो मम सुहृत् क्वचिदस्ति। तच्छ्रूयतां गोष्ठीशैथिल्यकारणं। एष दुरात्मा मूषकः प्रोन्नतस्थाने धृतमपि भिक्षापात्रमुत्प्लुत्यारोहति भिक्षाशेषं च तत्रस्थं भक्षयति। तदभावाद्देवगृहे सन्मार्जनादिक्रिया न भवति। तन्मूषकत्रासार्थमेतेन वंशेन मुहुर्मुहुर्भिक्षापात्रं ताडयामि। नान्यत् कारणमिति। अपरमेतत् कुतूहलं पश्यास्य दुरात्मनः। यन्मार्जारमर्कटादयो ऽपि तिरस्कृता अस्योत्पतनेन। वृहत्स्फिगाह। अथ ज्ञायते विलं तस्य क्वचित्प्रदेशे। ताम्रचूड आह। भगवन् न वेद्मि सम्यक्। स आह। नूनं निधानस्योपरि तस्य विलं। निधानोष्मणा प्रकूर्दति। उक्तं च यतः।

उष्मा हि वित्तजो वृद्धिं तेजो नयति देहिनां।
किं पुनस्तस्य सम्भोगात् त्यागः कर्मसमन्वितः ॥६७॥

तथा च। नाकस्माच्छाण्डिली माता विक्रीणाति तिलैस्तिलान्।
लुञ्चितानितरैर्येन हेतुरत्र भविष्यति ॥६८॥

कथा ॥२॥ ताम्रचूड आह। कथमेतत्। सो ऽब्रवीत्। अस्ति कस्मिंश्चित् स्थाने देवरतं नगरं सज्जतरं। तत्र कदाचिदहं प्रावृट्काले मेघपीडोपशमननिमित्तं कश्चिद्ब्राह्मणावासमुपेत्य मे ऽतिस्वल्पं स्थलं प्रार्थितवान्। ततश्चैतद्वचनात् तत्र शुश्रूषितः सुखेन देवतामर्चयन् तिष्ठामि। अथान्यस्मिन्नहनि प्रत्यूषे प्रबुद्धो ऽहं ब्राह्मणब्राह्मणीसंवादं दत्ताव

धानः शृणोमि। तत्र ब्राह्मण आह। ब्राह्मणि प्रभाते उत्तरायणसङ्क्रान्तिरनन्तदानफला भविष्यति। तदहं सत्वरं प्रतिग्रहार्थं ग्रामान्तरं यास्यामि। त्वया ब्राह्मणस्यैकस्य भगवतः सूर्यस्योद्देशेन तिला दातव्याः। अथ तच्छ्रुत्वा सा ब्राह्मणी परुषतरवचनैस्तं भर्त्सयमाना प्राह। कुतस्ते दारिद्र्योपहतस्य ब्राह्मणभोजनप्राप्तिः। तत् किमेवं ब्रुवाणो न लज्जसे। अपि च न मया तव हस्ताग्रलग्नया क्वचिदपि लब्धं सुखं। न मिष्टान्नस्यास्वादनं न च हस्तपादकर्णकण्ठादिभूषणं प्राप्तं। तच्छ्रुत्वा भयत्रस्तो ऽपि ब्राह्मणो मन्दं मन्दं प्राह। ब्राह्मणि नैतद्युज्यते वक्तुं। उक्तं च।

ग्रासादपि तदर्द्धं च कस्मान्नो दीयते ऽर्थिषु।
इच्छानुरूपो विभवः कदा कस्य भविष्यति ॥६९॥

तथा च। ईश्वरा भूरिद्रव्येण यल्लभन्ते फलं किल।
दरिद्रस्तच्च काकिण्या प्राप्नुयादिति नः श्रुतं ॥७०॥

तथा च।

दाता लघुरपि सेव्यो भवति न कृपणो महानपि समृद्ध्या।
कूपो ऽन्तःस्वादुजलः प्रीत्यै लोकस्य न समुद्रः ॥७१॥

तथा च। अकृतत्यागमहिम्नां मिथ्या किं राजराजशब्देन।
गोप्तारं न निधीनां महयन्ति महेश्वरं विबुधाः ॥७२॥

सदा दानपरिक्षीणः शस्त एव करीश्वरः।
अदानः पीनगात्रश्च निन्द्यत एव गर्दभः ॥७३॥

सुशीलो ऽपि सुवृत्तो ऽपि यात्यदानादधो घटः।
पुनः कुब्जापि काणापि दानादुपरि कर्कटी ॥७४॥

तथा च। यच्छन् जलमपि जलदो वल्लभतामेति सकललोकस्य।
नित्यं प्रसारितकरो मित्रो ऽपि न वीक्षितुं शक्यः ॥७५॥

एवं ज्ञात्वा दारिद्र्याभिभूतैरपि स्वल्पात् स्वल्पतरं देयं काले पात्रे च।

उक्तं च यतः।

सत्पात्रं महती श्रद्धा देशे काले यथोचिते।
यद्दीयते विवेकज्ञैस्तदनन्ताय कल्पते ॥७६॥

तथा च प्रोक्तं कैश्चित्।

अतितृष्णा न कर्तव्या तृष्णां नैव परित्यजेत्।
अतितृष्णाभिभूतस्य शिखा भवति मस्तके ॥७७॥

कथा ॥३॥ ब्राह्मणी प्राह। कथमेतत्। ब्राह्मणः कथयति। अस्ति कस्मिंश्चिद्वनोद्देशे कश्चित् पुलिन्दः। स च पापर्द्धिं कर्तुं वनं प्रति प्रस्थितः। अथ तेन प्रसर्पता महानञ्जनपर्वतशिखराकारः क्रोडः समासादितः। तं दृष्ट्वा कर्णाकृष्टनिशितसायकेन समाहतः। तेनापि कोपाविष्टचेतसा बालेन्दुद्युतिदंष्ट्राग्रेण पाटितोदरः पुलिन्दो गतासुर्भूतले प्रापतत्। अथ लुब्धकं व्यापाद्य सूकरोऽपि शरप्रहारमात्रवेदनया पञ्चत्वमुपागतः। एतस्मिन्नन्तरे कश्चिदासन्नमृत्युः सृगाल इतस्ततो निराहारतया पीडितः परिभ्रमंस्तं प्रदेशमाजगाम। यावद्वराहपुलिन्दौ पञ्चत्वमुपागतौ द्वावपि पश्यति। तावत् प्रहृष्टो व्यचिन्तयत्। भो अनुकूलो मे विधिः। तेनैतदचिन्तितं भोजनमुपस्थितं। अथवा साध्विदमुच्यते।

अकृतेऽप्युद्यमे पुंसामन्यजन्मकृतं फलं।
शुभाशुभं समभ्येति विधिना सन्नियोजितं ॥७८॥

तथा च। यस्मिन् देशे च काले च वयसा यादृशेन च।
कृतं शुभाशुभं कर्म तत् तथा तेन भुज्यते ॥७९॥

तदहं तथा भक्षयामि यथा बहून्यहानि मे प्राणयात्रा भविष्यतीति। तत् तावदेनं स्नायुपाशं धनुःकोटिगतं भक्षयामि। उक्तं च।

शनैः शनैश्च भोक्तव्यं स्वीयं वित्तमुपार्जितं।
रसायनमिव प्राज्ञैर्हेलया न कदाचन ॥८०॥

इत्येवं मनसा निश्चित्य चापचटितकोटिं मुखमध्ये क्षिप्वा स्नायुं भक्षयितुं प्रवृत्तः। ततश्च त्रुटिते पाशे तालुप्रदेशं निदार्य चापकोटिर्मस्तके शिखावन्निष्क्रान्ता। सो ऽपि तद्वेदनया तत्क्षणान्मृतः। अतो ऽहं ब्रवीमि।

अतितृष्णा न कर्तव्या तृष्णां नैव परित्यजेत्।
अतितृष्णाभिभूतस्य शिखा भवति मस्तके ॥८१॥

स पुनरप्याह। ब्राह्मणि न श्रुतं भवत्या।

आयुः कर्म च वित्तं च विद्या निधनमेव च।
पञ्चैतानि हि सृज्यन्ते गर्भस्थस्यैव देहिनः ॥८२॥

अथैवं सा तेन प्रबोधिता ब्राह्मणी प्राह। भो कान्त यद्येवं तदस्ति मे गृहे स्तोकतिलराशिः। ततस्तिलान् लुण्ठयित्वा तिलचूर्णेन ब्राह्मणं भोजयिष्यामीति। तस्यास्तद्वचनमाकर्ण्य ब्राह्मणो ग्रामान्तरं गतः। सापि तिलान् गृहस्थितानुष्णोदकेन सम्मर्द्य लुञ्चित्वा सूर्यतपे दत्तवती। अत्रान्तरे तस्या गृहकर्मव्यग्रायास्तेषां तिलानां मध्ये कश्चित् सारमेयो मूत्रोत्सर्गं चकार। ततस्तद्दृष्ट्वा सा व्यचिन्तयत्। अहो पश्य नैपुण्यं विधेः पराङ्मुखीभूतस्य। यदेतानपि तिलानभोज्यान् कृतवान्। तदहमेतान् समादाय कस्यचिद्गृहं गत्वा लुञ्चितैरलुञ्चितान् प्रार्थयामि। सर्वो ऽपि जनो ऽनेन विधिना दास्यतीति। अथ तांस्तिलान् सूर्पे निधाय गृहाद्गृहं प्रविशन्तीदमाह। भो गृह्णातु कश्चिदलुञ्चितैस्तिलैर्लुञ्चितांस्तिलान्। अथ यस्मिन् गृहे ऽहं भिक्षार्थं प्रविष्टः। तत्र गृहे सापि तिलानादाय विक्रयं कर्तुं प्रविष्टा पूर्वोक्तमेवाह। अथ तद्गृहगृहिण्या प्रहृष्टयालुञ्चितैर्लुञ्चितास्तिला गृहीताः। तथा च प्रवृत्ते तस्या भर्ता समायातः। तेन साभिहिता। भद्रे किमिदमिति। सा कथयति। समर्घा मया तिला लब्धा लुञ्चितालुञ्चितैरिति। ततः स वितर्क्याब्रवीत्। कस्य सम्बन्धिन इमे तिलाः। तत्र तत्सुतः

कामन्दकिराह। शाण्डिलीमातुः। सो ऽब्रवीत्। भद्रे सातीव निपुणा व्यवहारकुशला च। ततस्त्याज्या एते तिलाः। यतः।

नाकस्माच्छाण्डिलीमाता विक्रीणाति तिलैस्तिलान्।
लुञ्चितानितरैर्येन हेतुरत्र भविष्यति ॥८३॥

तन्निश्चितं। निधानोष्मजनितात्र कूर्दनशक्तिरस्य। एवमुक्त्वा स वृहत्स्फिग्भूयो ऽपि प्राह। अथ ज्ञायते तस्य गमनागमनमार्गः। ताम्रचूड आह। भगवन् ज्ञायते। यत एकाकी न समायाति। किं त्वसङ्ख्ययूथपरिवृतः पश्यतो मे भ्रम्यन्नितस्ततः सर्वजनेन सहागच्छति याति च। वृहत्स्फिगाह। अस्ति किञ्चित् खनित्रकं। स आह। बाढमस्त्येषा सर्वलोहमयी स्वहस्तिका। अभ्यागत आह। तर्हि प्रत्यूषे त्वया मया सह बोद्धव्यं। येन द्वावपि चरणमिलितायां भूमौ तत्पादानुसारिणौ गच्छावः। मयापि तस्य दुरात्मनस्तद्वज्रपातसदृशं वचनमाकर्ण्य चिन्तितं। अहो नष्टो ऽस्मीति। यतः साभिप्रायाण्यस्य वचांसि श्रूयन्ते। नूनं यथा निधानं ज्ञातं। तथा दुर्गमप्यस्माकं ज्ञास्यति दुष्टः। एतदभिप्रायादेव ज्ञायते। उक्तं च।

सकृदपि दृष्ट्वा पुरुषं विबुधा जानन्ति सारतां तस्य।
हस्ततुलयापि निपुणाः पलपरिमाणं विजानन्ति ॥८४॥

तथा च।

वाञ्छैव सूचयति पूर्वतरं भविष्यं पुंसां यदन्यतनुजं शुभमार्तिदं वा।
विज्ञायते शिशुरजातकलापचिह्नः प्रत्युत् पदैरपसरन् सरसः कलापी॥

ततो ऽहं भयत्रस्तमना दुर्गमार्गं परित्यज्य सपरिवारो ऽन्यमार्गेण गन्तुं प्रवृत्तो यावदग्रतो गच्छामि। तावत् सम्मुखो वृहत्कायो मार्जारः समायाति। स च मूषकवृन्दमवलोक्य तन्मध्ये सहसोत्पपात। अथ ते मूषका मां कुमार्गगामिनं गर्हयन्तो हतशेषा रुधिरप्लावितवसुन्धरास्तदेव दुर्गं प्रविष्टाः। अथवा साध्विदमुच्यते।

छित्वा पाशमपास्य कूटरचनां भङ्क्ता बलाद्वागुरां
पर्यन्ताग्निशिखाकलापजटिलान्निर्गत्य दूरं वनात् ।
व्याधानां शरगोचरादतिजवेनोत्प्लुत्य धावन् मृगः
कूपान्तं पतितः करोति विमुखे वामे विधौ पौरुषं ॥८६॥

तथा च । कैवर्तकर्कशकरग्रहणाच्युतो ऽपि
जाले पुनर्निपतितः शफरो वराकः ।
जालात् पुनर्विगलितो गलितो बकेन
वामे विधौ वत कुतो व्यसनान्निवृत्तः ॥८७॥

अन्यच्च । भग्नाशस्य करण्डपीडिततनोर्म्लानेन्द्रियस्य क्षुधा
कृत्वाखुर्विवरं स्वयं निपतितो नक्तं मुखे भोगिनः ।
तृप्तस्तत् पिशितेन सत्वरमसौ तेनैव यातः पथा
स्वस्थस्तिष्ठति दैवमेव हि नृणां वृद्धौ क्षये कारणं ॥८८॥

तथाहमेको ऽन्यत्र गतः । शेषा मूढतया तत्रैव दुर्गं प्रविष्टाः । एतस्मिन्नन्तरे स दुष्टपरिव्राजको रुधिरबिन्दुचर्चितां भूमिमवलोक्य तेनैव दुर्गमार्गेणागत्योपस्थितः । ततश्च स्वहस्तिकया खनितुमारब्धः । अथ तेन खनता प्राप्तं तन्निधानं । यस्योपरि सदैवाहं कृतवसतिः । यस्योष्मणा महादुर्गमपि गच्छामि । ततो हृष्टमनास्ताम्रचूडमिदमूचे परिव्राजकः । भो भगवन् स्वपिहीदानीं विर्विशङ्कः । तस्योष्मणा स मूषको जागरणं ते करोति । एवमुक्त्वा तन्निधानमादाय मठाभिमुखं प्रतस्थे । अहमपि यावत् तत्रागच्छामि तावदरमणीयमुद्वेगकारकं तत्स्थानं वीक्षितुमपि न शक्नोमि । कथं मे स्यान्मनसः प्रशान्तिः । एवं चिन्तयतो मे महता कष्टेन स दिवसो व्यतिक्रान्तः । अथास्तमिते ऽर्के सोद्वेगो ऽपि निरुत्साहस्तस्मिन् मठे सपरिवारः प्रविष्टः । अथास्मत्परिग्रहशब्दमाकर्ण्य ताम्रचूडो भूयो ऽपि भिक्षापात्रं जर्जरवंशेन ताडयितुमारब्धः । अथासौ वृहत्स्फिक् प्रोवाच । सखे किमद्यापि निःश

ङ्को न निद्रां गच्छसि। स आह। भगवन् भूयो ऽपि सपरिवारः समायातो नूनं दुष्टमूषकः। तस्य भयाज्जर्जरवंशेन भिक्षापात्रं ताडयामि। ततो विहस्याभ्यागतः प्राह। सखे मा भैषीः। वित्तेन सह गतो ऽस्य कूर्दनोत्साहः। सर्वेषामपि जन्तूनामेवेयं स्थितिः। उक्तं च।

यदुत्साही सदा मर्त्यः परा भवति यो जनान्।
यदुद्धतं वदेद्वाक्यं तत् सर्वं वित्तजं फलं ॥ ९॥

अथाहं तच्छ्रुत्वा कोपाविष्टो भिक्षापात्रमुद्दिश्य विशेषादुत्कूर्दितो ऽप्राप्त एव भूमौ निपपात। तद्दृष्ट्वासौ मे शत्रुर्विहस्य ताम्रचूडमुवाच। भो पश्य पश्य कुतूहलं। उक्तं च।

अर्थेन बलवान् सर्वो ह्यर्थयुक्तः स पण्डितः।
पश्यैनं मूषकं व्यर्थं स्वजातिसमतां गतं ॥ १०॥

तत् स्वपिहि त्वं निर्गतविशङ्कः। यदस्योत्पतनकारणं तदावयोर्हस्तगतं। अथवा साध्विदमुच्यते।

दंष्ट्राविरहितः सर्पो मदहीनो यथा गजः।
तथार्थेन विहीनो ऽत्र पुरुषो नाम धारकः ॥ ११॥

तच्छ्रुत्वा मनसा मया चिन्तितं। सत्यमस्य मदीयशत्रोर्वचनं। अङ्गुलमात्रमप्युत्कूर्दनशक्तिर्मम नास्ति। धिगर्थेन हीनं पुरुषस्य जीवितं। उक्तं च।

अर्थेन तु विहीनस्य पुरुषस्याल्पमेधसः।
उच्छिद्यन्ते क्रियाः सर्वा ग्रीष्मे कुसरितो यथा ॥ १२॥

यथा काकयवाः प्रोक्ता यथारण्यभवास्तिलाः।
नाममात्रा न सिद्धौ हि धनहीनास्तथा नराः ॥ १३॥

सन्तो ऽपि हि न राजन्ते दरिद्रस्येतरे गुणाः।
आदित्य इव भूतानां श्रीर्गुणानां प्रकाशिनी ॥ १४॥

न तथा बाध्यते लोके प्रकृत्या निर्धनो जनः।
यथा द्रव्याणि सम्प्राप्य तैर्विहीनः सुखे स्थितः ॥ १५॥

शुष्कस्य कीटखातस्य वह्निदग्धस्य सर्वतः ।
तरोरिव दरिद्रस्य न वरं जन्मिनः फलं ॥ ९६ ॥

शङ्कनीया हि सर्वत्र निःप्रतापा दरिद्रता ।
उपकर्तुमपि प्राप्तं निःस्वं मन्यन्ति कुर्कुरं ॥ ९७ ॥

उन्नम्योन्नम्य तत्रैव दरिद्राणां मनोरथाः ।
हृदयेषु विलीयन्ते विधवास्त्रीस्तनाविव ॥ ९८ ॥

व्यक्ते ऽपि वासरे नित्यं दौर्गत्यतमसावृतः ।
अग्रतो ऽपि स्थितो यत्नान्न केनापीह दृश्यते ॥ ९९ ॥

इत्येवमहं विलप्य भग्नोत्साहस्तत् स्वनिधानं गल्लोपधानीयकृतं विलोकयन् स्वदुर्गं प्रभातकाले गतः। ततश्च ते मद्भृत्या गच्छन्तो मिथो जल्पन्ति। अहो असमर्थो ऽयमुदरपूरणे ऽस्माकं। केवलमस्य पृष्ठलग्नानां विडालादिविपत्तयः। तत् किमनेनाराधितेन। उक्तं च यतः।

यत्सकाशान्न लाभः स्यात् केवलाः स्युर्विपत्तयः ।
स स्वामी दूरतस्त्याज्यो विशेषाच्छ्वजीविभिः ॥ १०० ॥

एवं तेषां वचांसि मार्गे श्रुत्वा स्वदुर्गे प्रविष्टो यावन्न कश्चिन्मम सम्मुखो ऽभ्येति। तावन्मया चिन्तितं। अहो धिगियं दरिद्रता। अथवा साधिदमुच्यते।

मृतो दरिद्रः पुरुषो मृतं मैथुनमप्रजं ।
मृतमश्रोत्रियं श्राद्धं मृतो यज्ञस्त्वदक्षिणः ॥ १०१ ॥

वृक्षं क्षीणफलं त्यजन्ति विहगाः शुष्कं सरः सारसाः ।
पुष्पं पर्युषितं त्यजन्ति मधुपा दग्धं वनान्तं मृगाः ।
निर्द्रव्यं पुरुषं त्यजन्ति गणिका भ्रष्टं नृपं सेवकाः ।
सर्वः स्वार्थवशाज्जनो हि रमते न कस्य को वल्लभः ॥ १०२ ॥

एवं मे विचिन्तयतस्ते भृत्या मम शत्रूणां सेवकाः संवृत्ताः। ते च मामेकाकिनमसमर्थं दृष्ट्वा विडम्बनां कुर्वन्ति। अथ मयैकाकिना योग

निद्रां गतेन भूयो ऽपि चिन्तितं। अद्य रात्रावेकाकी तस्य कृतपस्विनः समाश्रयं गत्वा। तत्र गण्डुपरायणकृतां वित्तपेटीं शनैः शनैर्विदार्य। तस्य निद्रावशमुपगतस्य स्वदुर्गे तद्वित्तमानयामि। येन भूयो ऽपि मे वित्तप्रभावेनाधिपत्यं पूर्ववद्भवति। उक्तं च।

व्यथयन्ति परं चेतो मनोरथशतैर्जनाः।
नानुष्ठानैर्विहीनाः स्युः कुलजा विधवा इव ॥१०३॥
दौर्गत्यं देहिनां दुःखमपमानकरं परं।
येन स्वैरपि मन्यन्ते जीवन्तो ऽपि मृता इव ॥१०४॥
दैन्यस्य पात्रतामेति परिभूतेः परं पदं।
विपदामाश्रयः शश्वद्दौर्गत्यकलुषीकृतः ॥१०५॥
लज्जन्ते बान्धवास्तेन सम्बन्धं गोपयन्ति च।
मित्राण्यमित्रतां यान्ति यस्य न स्युः कपर्दिकाः ॥१०६॥
मूर्तेर्लाघवमेवैतदपायानामिदं गृहं।
पर्यायो मरणस्यायं निर्धनत्वं शरीरिणां ॥१०७॥
अजाखरखुरोत्सर्गमार्जनीरेणुवज्जनैः।
दीपखट्वापछायेव त्यज्यते निर्धनो जनः ॥१०८॥
शौचविशिष्टयाप्यस्ति किञ्चित् कार्यं क्वचिन्मृदा।
निर्धनेन धवेनेह न तु किञ्चित् प्रयोजनं ॥१०९॥
अधनो दातुकामो ऽपि सम्प्राप्तो धनिनां गृहं।
मन्यते याचको ऽयं धिग्दारिद्र्यं खलु देहिनां ॥११०॥

ततो वित्तापहारं विदधतो यदि मम मृत्युः स्यात्। तथापि शोभनं।
उक्तं च। स्ववित्तहरणं दृष्ट्वा यो हि रक्षत्यसून्नरः।
पितरो ऽपि न गृह्णन्ति तद्दत्तं सलिलाञ्जलिं ॥१११॥
तथा च। गवार्थे ब्राह्मणार्थे च स्त्रीवित्तहरणे तथा।
प्राणांस्त्यजति यो युद्धे तस्य लोकाः सनातनाः ॥११२॥

इत्येवं निश्चित्य रात्रौ तत्र गत्वा निद्रावशमुपगतस्य परिव्राजकस्य पेटायां मया महच्छिद्रं कृतं यावत्। तावत् स दुष्टतापसः प्रबुद्धः। ततश्च जर्जरवंशप्रहारेण तेनाहं शिरसि ताडितः कथञ्चिदायुशेषतया न मृतः। उक्तं च।

प्राप्तव्यमर्थं लभते मनुष्यो देवो ऽपि तं लङ्घयितुं न शक्तः।
तस्मान्न शोचामि न विस्मयो मे यदस्मदीयं नहि तत् परेषां॥

काककूर्मौ पृच्छतः। कथमेतत्। हिरण्यकः कथयति। कथा ॥४॥ अस्ति कस्मिंश्चिन्नगरे सागरदत्तो नाम वणिक्। तत्सूनुना रूपकशतेन विक्रीयमाणं पुस्तकं गृहीतं। तस्मिंश्च लिखितमस्ति।

प्राप्तव्यमर्थं लभते मनुष्यो देवो ऽपि तं लङ्घयितुं न शक्तः।
तस्मान्न शोचामि न विस्मयो मे यदस्मदीयं न हि तत् परेषां॥

तद्दृष्ट्वा सागरदत्तेन सूनुः पृष्टः। पुत्र कियता मूल्येनैतत् पुस्तकं गृहीतं। सो ऽब्रवीत्। तात रूपकशतेन। तच्छ्रुत्वा सागरदत्तो ऽब्रवीत्। धिग्मूर्खत्वं लिखितैकश्लोकपादं पुस्तकं रूपकशतेन यद्गृह्णासि। एतया बुद्ध्या कथं द्रव्योपार्जनं करिष्यसि। तदद्य प्रभृति त्वया मम गृहे न प्रवेष्टव्यं। एवं निर्भर्त्स्य गृहान्निःकाशितः। स च तेन निर्वेदेन विप्रकृष्टं देशान्तरं गत्वा किमपि नगरमासाद्यावस्थितः। अथ कतिपयैर्दिवसैस्तन्नगरनिवासिना केनचिदसौ पृष्टः। कुतो भवानागतः। किन्नामधेयो वेति। असाववदत्। प्राप्तव्यमर्थं लभते मनुष्य इति। अथान्येनापि पृष्टस्तथैवाब्रवीत्। एवं यः कश्चित् पृच्छति। तस्येदमेवोत्तरं वितरति। एवं च तस्य नगरस्य मध्ये प्राप्तव्यमर्थमिति तस्य प्रसिद्धं नाम सञ्जातं। अथ राजकन्या चन्द्रवती नामाभिनवरूपसम्पन्ना सखीद्वितीयैकस्मिन् महोत्सवदिवसे नगरं निरीक्षमाणा तिष्ठति। तत्रैव च कश्चिद्राजपुत्रो ऽतीव रूपसम्पन्नः मनोरमश्च तस्याः कथमपि दैववशाद्दृष्टिगोचरे गतः। तद्दर्शनसमकालमेव मकरध्वजकुसु

मबाणैरभिहतया तया निजा सख्यभिहिता। हे सखि व्यर्थतां यान्ति तावद्यौवनदिनानि। पितापि मां न कस्मैचित् प्रयच्छति। तद्यथा ममानेन सह समागमो भवति। तथा त्वया प्रतिपत्तव्यं। एवं च श्रुत्वा सा सखी शीघ्रं तत्सकाशं गत्वाब्रवीत्। अहो अहं चन्द्रवत्या त्वदन्तिकं प्रेषिता। भणितं च त्वां प्रति तया। यन्मम त्वद्दर्शनान्मनोभवेन पश्चिमावस्था कृता। तद्यदि शीघ्रं मदन्तिकं न समेष्यसि। तदा मे मरणमेव। इति श्रुत्वा तेनाभिहितं। यद्यवश्यं मया तत्रागन्तव्यं। तत् कथय केनोपायेन प्रवेष्टव्यं। अथ सख्याभिहितं। रात्रौ सौधोत्सङ्गावलम्बितया दृढवरत्रया त्वया तत्रारोढव्यं। सो ऽब्रवीत्। यद्येवं निश्चयो भवत्यास्तदहमेवं करिष्यामि। इति निश्चित्य सखी चन्द्रवतीसकाशं गता। अथागतायां रजन्यां स राजपुत्रः स्वचेतसा व्यचिन्तयत्। अहो महदकृत्यमेतत्। उक्तं च।

गुरोः सुतां मित्रभार्यां स्वामिसेवकगेहिनीं।
यो गच्छति पुमान् लोके तमाहुर्ब्रह्मघातकं ॥११५॥

अपरं च। अयशः प्राप्यते येन येन चाधोगतिर्भवेत्।
स्वर्गाच्च भ्रश्यते येन तत् कर्म न समाचरेत् ॥११६॥

इति सम्यग्विचार्य स तत्सकाशं न जगाम। अथ प्राप्तव्यमर्थः पर्यटन् धवलगृहपार्श्वे रात्रावलम्बितवरत्रां दृष्ट्वा। कौतुकाविष्टहृदयस्तामालम्ब्याधिरूढः। तया च राजपुत्र्या स एवायमिति स्वस्थचित्तया स्नानभोजनपानाच्छादनादिना सम्मान्य तेन सह शयनतलमाश्रितया तदङ्गस्पर्शसञ्जातहर्षरोमाञ्चितगात्रयोक्तं। भद्र युष्मद्दर्शनमात्रानुरक्तया मया तुभ्यमात्मा प्रदत्तो ऽयं त्वद्वर्ज्यमन्यो भर्ता मनस्यपि मे न भविष्यतीति। तत् कस्मान्मया सह न ब्रवीषि। अथ स अवदत्। प्राप्तव्यमर्थं लभते मनुष्यः। इत्युक्ते तयान्यो ऽयमिति मत्वा धवलगृहादुत्तार्य मुक्तः। स तु दण्डदेवकुले गत्वा प्रसुप्तः। अथ तत्र कयाचित्

स्वैरिण्या दत्तसङ्केतको यावद्दण्डपाशकः प्राप्तः। तावदसौ पूर्वसुप्तस्तेन दृष्टः। रहस्यसंरक्षणार्थमभिहितश्च। को भवान्। सोऽब्रवीत्। प्राप्तव्यमर्थं लभते मनुष्यः। इति श्रुत्वा दण्डपाशकेनाभिहितं। शून्यं देवगृहमिदं। मम गृहे गत्वा मदीयशयने स्वपिहि। तथा प्रतिपद्य स मतिविपर्यासादन्यशयने सुप्तः। अथ तस्यारक्षकस्य बृहत्कन्यका विनयवती नाम रूपयौवनसम्पन्ना कस्यापि पुरुषस्यानुरक्ता तस्य सङ्केतकं दत्वा तत्र शयने सुप्तासीत्। अथ सा तमायान्तं दृष्ट्वा स एवायमस्मद्वल्लभ इति रात्रौ घनतरान्धकारव्यामोहितोत्थाय भोजनाच्छादनादिक्रियां कारयित्वा गान्धर्वविवाहेनात्मानं विवाहयित्वा। तेन समं शयने स्थिता विकसितवदनकमला तमाह। किमद्यापि मया सह विश्रब्धं भवान्न ब्रवीति। सोऽब्रवीत्। प्राप्तव्यमर्थं लभते मनुष्य इति। तच्छ्रुत्वा तया चिन्तितं। यत् कार्यमसमीक्षितं क्रियते तस्येदृक् फलपाको भवति। एवं विमृश्य सविषादया तया निर्भर्त्स्य निःसारितोऽसौ। स च यावद्वीथीमार्गेण गच्छति। तावदन्यविषयवासी वरकीर्तिर्नाम वरो महता वाद्यशब्देनागच्छति। प्राप्तव्यमर्थो ऽपि तैः सह गन्तुमारब्धः। अथ यावत् प्रत्यासन्ने लग्नसमये राजमार्गासन्नश्रेष्ठिगृहद्वारि रचितमण्डपवेदिकायां कृतकौतुकमङ्गलवेषा वणिक्कन्या तिष्ठति। तावन्मदमत्तो हस्त्यारोहकं हत्वा प्रणश्यज्जनकोलाहलेन लोकमाकुलयंस्तमेवोद्देशं सम्प्राप्तः। तं च दृष्ट्वा सर्वे वरानुयायिनो भयत्रस्तवरेण सह प्रणश्य दिशो दिशो जग्मुः। अथास्मिन्नवसरे भयतरललोचनामेकाकिनीं कन्यामवलोक्य मा भैषीरहं ते परित्रातेति स्वधारतया तां स्थिरीकृत्य दक्षिणपाणौ सङ्गृह्य महासाहसिकतया प्राप्तव्यमर्थः परुषवाक्यैर्हस्तिनं निर्भर्त्सितवान्। ततः कथमपि दैवयोगादपयाते हस्तिनि ससुहृद्बान्धवो वरकीर्तिरतिक्रान्ते लग्नसमये समागच्छति। तावद्वधूरन्येन हस्ते गृहीता तिष्ठति। तद्दृष्ट्वा वरकी

र्तिनाभिहितं। भो श्वसुरक विरुद्धमिदं त्वयानुष्ठितं। यन्मह्यं प्रदाय कन्यान्यस्मै प्रदत्तेति। सो ऽब्रवीत्। भो ग्रहमपि हस्तिभयपलायितो भवद्भिः सहायातो न जाने किमिदं वृत्तं। इत्यभिधाय दुहितरं प्रष्टुमारब्धः। वत्से न त्वया सुन्दरं कृतं। तत् कथ्यतां को ऽयं वृत्तान्तः। साब्रवीत्। यदहमनेन प्राणसंशयाद्रक्षिता। तदेनं मुक्त्वा मम जीवन्त्या नान्यः पाणिं ग्रहीष्यतीति। ग्रनेन व्यतिकरेण रजनी व्युष्टा। ग्रथ प्रातः सञ्जातमहाजनसमवाये तं वार्ताव्यतिकरं श्रुत्वा राजदुहिता तमुद्देशमागता। कर्णपरम्परया ज्ञात्वा दण्डपाशकसुतापि तत्रैवाजगाम। ग्रथ तं महाजनसमवायं श्रुत्वा राजापि स्वयं तत्रायातः। प्राप्तव्यमर्थं प्राह। भो विश्रब्धं कथय कीदृशो ऽसौ वृत्तान्तः। सो ऽब्रवीत्। प्राप्तव्यमर्थं लभते मनुष्य इति। ग्रथ राजकन्या स्मृत्वा प्राह। देवो ऽपि तं लङ्घयितुं न शक्तः। ततो दण्डपाशकसुताब्रवीत्। तस्मान्न शोचामि। न विस्मयो म इति। तमखिललोकवृत्तान्तमाकर्ण्य वणिक्सुताब्रवीत्। यदस्मदीयं न हि तत् परेषामिति। ग्रथ राजा तेषां सर्वेषामप्यभयप्रदानं दत्त्वा पृथक् पृथक् तं वृत्तान्तं ज्ञात्वावगततत्त्वस्तस्मै प्राप्तव्यमर्थाय स्वदुहितरं सबहुमानं ग्रामसहस्रेण समं सबलिं करणपरिवारयुतां दत्त्वा। त्वं मे पुत्रो ऽसीति। नगरविदितं तं युवराज्ये ऽभिषिक्तवान्। दण्डपाशकेनापि निजदुहिता शक्त्या वस्त्रदानादिना सम्भाव्य प्राप्तव्यमर्थाय प्रदत्ता। ग्रथ प्राप्तव्यमर्थेनापि स्वीयपितृमातरौ समस्तकुटुम्बावृतौ तस्मिन्नगरे सम्मानपुरःसरं समानीतौ। सो ऽपि स्वगोत्रेण सह विविधभोगानुपभुञ्जानः सुखेनावस्थितः। ग्रतो ऽहं ब्रवीमि।

प्राप्तव्यमर्थं लभते मनुष्यो देवो ऽपि तं लङ्घयितुं न शक्तः।
तस्मान्न शोचामि न विस्मयो मे यदस्मदीयं न हि तत् परेषां॥

पुनरपि हिरण्यको ऽब्रवीत्। तदेतत् सकलं सुखदुःखमनुभूय परं

विषादमुपगतो ऽनेन सुहृदा त्वत्सकाशमानीतः। तदेतन्मे वैराग्यकारणं। मन्थरक आह। भद्र भवति सुहृदयमसन्दिग्धं यः क्षुत्क्षामो ऽपि शत्रुभूतं त्वां भक्ष्यस्थाने स्थितमप्येवं स्वपृष्ठमारोप्यात्रनीतवान्। न मार्गे ऽपि भक्षितवान्। उक्तं च।

विकारं याति नो चित्तं वित्ते यस्य कदाचन।
मित्रं स्यात् सर्वकाले च कारयेन्मित्रमुत्तमं॥११८॥
विद्वद्भिः सुहृदामत्र चिह्नैरेतैर्विसंशयं।
परीक्षाकारणं प्रोक्तं होमाग्नेरिव भूतले॥११९॥
आपत्काले तु सम्प्राप्ते यन्मित्रं मित्रमेव तत्।
वृद्धिकाले तु सम्प्राप्ते दुर्जनो ऽपि सुहृद्भवेत्॥१२०॥

तन्मयाप्यस्य मित्रविषये विश्वासः समुत्पन्नः। यतो नीतिविरुद्धेयं मैत्री विहिता वायसेन सह सलिलस्थलचराणां। अथवा साध्विदमुच्यते।

न मित्रं कस्यचित् को ऽपि नितान्तं न च वैरकृत्।
दृश्यते मित्रविध्वस्तात् कार्याद्वैरी परीक्षितः॥१२१॥

तत् स्वागतं भवतु ते। स्वगृहवदास्यतामत्र सरोपान्ते। यच्च वित्तनाशो विदेशवासश्च ते सञ्जातः। तदत्रविषये सन्तापो न कार्यः। उक्तं च।

अभ्रच्छाया खलप्रीतिः सिद्धमन्नं च योषितः।
किञ्चित् कालोपभोग्यानि यौवनानि धनानि च॥१२२॥

अत एव विवेकिनो जितात्मानो धनस्पृहां न कुर्वन्ति। उक्तं च।

सुसञ्चितैर्जीवितवत् सुरक्षितैर्निजे ऽपि देहे न वियोजितैः क्वचित्।
पुंसो ऽवसानं व्रजतो ऽपि निष्ठुरैरिष्टैर्धनैः पञ्चपदी न मुच्यते॥

अन्यच्च। यथामिषं जले मत्स्यैर्भक्ष्यते श्वापदैर्भुवि।
आकाशे पक्षिभिश्चैव तथा सर्वत्र वित्तवान्॥१२४॥

तथा च। निर्दोषमपि वित्ताढ्यं दोषैर्योजयते नृपः।
निर्धनः प्राप्तदोषो ऽपि सर्वत्र निरुपद्रवः॥१२५॥

अर्थानामर्जने दुःखमर्जितानां च रक्षणे ।
आये दुःखं व्यये दुःखं धिगर्थाः कष्टसंश्रयाः ॥१२६॥
अर्थार्थी याति कष्टानि मूढो ऽयं कुरुते जनः ।
शतांशेनापि मोक्षार्थी याति चेन्मोक्षमाप्नुयात् ॥१२७॥

अपरं विदेशवासे त्वया वैराग्यं न कार्यं । उक्तं च ।

को धीरस्य मनस्विनः स्वविषयः को वा विदेशः स्मृतो ।
यं देशं श्रयते तमेव कुरुते बाहुप्रतापार्जितं ।
यद्दंष्ट्रानखलाङ्गूलप्रहरणः सिंहो वनं गाहते ।
तस्मिन्नेव हतद्विपेन्द्ररुधिरैस्तृष्णां छिनत्त्यात्मनः ॥१२८॥

अर्थहीनो ऽपि परदेशगतो ऽपि यः प्रज्ञावान् भवति स कथञ्चिन्नैव सीदति । उक्तं च ।

विद्वत्त्वं च नृपत्वं च नैव तुल्यं कदाचन ।
स्वदेशे पूज्यते राजा विद्वान् सर्वत्र पूज्यते ॥१२९॥

तत् प्रज्ञानिधिर्भवान् । न प्राकृतपुरुषतुल्यः । अथवा ।

उत्साहसम्पन्नमदीर्घसूत्रं क्रियाविधिज्ञं व्यसनेष्वसक्तं ।
शूरं कृतज्ञं दृढसौहृदं च लक्ष्मीः स्वयं मार्गति वासहेतोः ॥१३०॥

अपरं प्राप्तो ऽप्यर्थो ऽकर्मप्राप्त्या विनश्यति । तदेतावन्ति दिनानि त्वदीयं तदासीत् । मुहूर्तमप्यनात्मीयं भोक्तुं न लभ्यते । स्वयमागतमपि विधिनापह्रियते । उक्तं च यतः ।

अर्थस्योपार्जनं कृत्वा नैव भोगं समश्नुते ।
अरण्यं महदासाद्य मूढः सोमिलको यथा ॥१३१॥

कथा ॥५॥ हिरण्यक आह । कथमेतत् । मन्थरकः कथयति । अस्ति कस्मिंश्चिदधिष्ठाने सोमिलको नाम कौलिकः प्रतिवसति स्म । स चानेकविधपटरचनारञ्जितानि पार्थिवोचितानि वस्त्राणि सदैवोत्पादयति । परं भोजनाच्छादनाभ्यधिकं स्वल्पमप्यर्थमात्रं न सम्पद्यते । ये चान्ये

तत्र सामान्यतरकौलिकाः स्थूलवस्त्रसम्पादनपटवस्ते तु महर्द्धिसम्पन्नाः। अथ तानालोक्य सोमिलकः स्वभार्यामाह। प्रिये पश्यैतान् स्थूलपटकारकान् धनकनकसमृद्धान्। तदधारणकं ममैतत् स्थानं। अन्यत्रोपार्जनाय तस्माद्गच्छामः। सा प्राह। भो प्रियतम मिथ्या प्रजल्पितमेतत्। यदन्यत्रगतानां धनं भवति स्वस्थाने न भवति। उक्तं च यतः।

उत्पतन्ति यदाकाशे निपतन्ति महीतले।
पक्षिणस्तदपि प्राप्त्या नादत्तमुपतिष्ठति ॥१३२॥

तथा च। न हि भवति यन्न भाव्यं भवति हि भाव्यं विनापि यत्नेन।
करतलगतमपि नश्यति यस्य तु भवितव्यता नास्ति॥१३३॥
यथा धेनुसहस्रेषु वत्सो विन्दति मातरं।
यथा पुराकृतं कर्म कर्तारमनुविन्दति॥१३४॥

अन्यच्च। शतसहस्रयानेन गच्छन्तमनुगच्छति।
नराणां प्राकृतं कर्म तद्वत् कर्म महात्मनः॥१३५॥

पुनश्च। यथा छायातपौ नित्यं सुसम्बद्धौ परस्परं।
एवं कर्म च कर्ता च संश्लिष्टावितरेतरं॥१३६॥

तस्मादत्रैव व्यवसायपरो भव। कौलिक आह। प्रिये न सम्यगभिहितं भवत्या। व्यवसायं विना कर्म न फलति। उक्तं च।

यथैकेन न हस्तेन तालिकः सम्प्रपद्यते।
तथोद्यमपरित्यक्तं न फलं कर्मणः स्मृतं॥१३७॥

तथा च। पश्य कर्मवशात् प्राप्तं भोज्यकाले तु भोजनं।
हस्तोद्यमं विना वक्त्रे प्रविशेन्न कथञ्चन॥१३८॥

भूयश्च। उद्यमेन हि सिध्यन्ति कार्याणि न मनोरथैः।
न हि सिंहस्य सुप्तस्य प्रविशन्ति मुखे मृगाः॥१३९॥

पुनश्च। स्वशक्त्या कुर्वतः कर्म न चेत् सिद्धिं प्रयच्छति।

नोपालभ्यः पुमांस्तत्र दैवान्तरितपौरुषः ॥१४०॥

तन्मयावश्यं देशान्तरं गन्तव्यमिति निश्चित्य वर्धमानपुरं गतः। तत्र च वर्षत्रयं स्थित्वा सुवर्णशतत्रयोपार्जनं कृत्वा भूयो ऽपि स्वगृहं प्रति प्रस्थितः। अथार्धमार्गे महाटव्यां गच्छतो ऽस्य भगवानादित्यो ऽस्तमुपागतः। तदसौ व्यालभयात् स्थूलतरवटवृक्षस्कन्धमारुह्य यावत् प्रसुप्तः। तावन्निशीथे स्वप्ने द्वौ पुरुषौ रौद्राकारौ परस्परं प्रजल्पन्तावशृणोत्। तत्रैकः प्राह। भो कर्तस्त्वं सम्यग्वेत्सि यदस्य सोमिलकस्य भोजनाच्छादाभ्यधिका समृद्धिर्नास्ति। अतो भवता कदाचिदपि नाधेया। तत् किं त्वयास्य सुवर्णशतत्रयं प्रदत्तं। स आह। भो कर्मन् मयावश्यं व्यवसायिनां व्यवसायानुरूपं फलं देयं। तस्य च परिणतिस्त्वदायत्ता। इत्यतस्त्वमेवापहरेति। तच्छ्रुत्वा यावदसौ कौलिकः प्रबुद्धः सुवर्णग्रन्थिमवलोकयति तावद्रिक्तां पश्यति। ततः साक्षेपं चिन्तयामास। अहो किमेतत्। कष्टेनोपार्जितमपि वित्तं हेलया क्वापि गतं। तद्व्यर्थश्रमो मे न किञ्चन। कथं स्वपत्न्या मित्राणामग्रे च मुखं दर्शयिष्यामि। इति निश्चित्य तदेव पत्तनं गतः। तत्र च वर्षमात्रेणापि सुवर्णशतपञ्चकमुपार्ज्य भूयो ऽपि स्वस्थानं प्रति प्रस्थितः। यावदर्धपथि प्राप्तस्तावद्भूयो ऽप्यटवीमध्यगतस्य भगवान् भानुरस्तं जगाम। अथ सुवर्णनाशभयात् सुश्रान्तो ऽपि न विश्राम्यति। केवलं कृतगृहोत्कण्ठः सत्वरं व्रजति। एतस्मिन्नन्तरे द्वौ पुरुषाकारौ तादृशाविव पृष्ठप्रदेशे समागच्छन्तौ परस्परं जल्पन्तौ चाशृणोत्। तत्रैकः प्राह। भो कर्तः किं त्वयैतस्य सोमिलकस्य सुवर्णशतपञ्चकं प्रदत्तं। तत् किं न वेत्सि यद्भोजनाच्छादनाभ्यधिका काचित् प्राप्तिर्नास्ति। सो ऽब्रवीत्। भो कर्मन्। मयावश्यं देयं व्यवसायिनां नृणां। तस्य परिणामस्त्वदायत्ता। तत् किं मामुपालम्भयसि। तच्छ्रुत्वा यावदसौ सोमिलको ग्रन्थिमन्वेष्यति। तावत् सुवर्णं नास्ति। ततः परं दुः

खमापन्नो हा हतो ऽस्मीति सोमिलकः परं वैराग्यं गतो व्यचिन्तयत्। अहो किं मम धनरहितस्य जीवितेन। तदत्र वटवृक्ष आत्मानमुद्बध्य प्राणत्यागं करोमि। एवं निश्चित्य दर्भमयीं रज्जुं विधाय। स्वकण्ठे पाशं नियोज्य। शाखामासाद्य। तया सह यावदात्मकण्ठं निबध्यात्मानं निक्षिपति। तावदेकः पुमानाकाशस्थ इदमाह। भो भो सोमिलक मैवं साहसं कार्षीः। अहं तव वित्तापहारको न ते भोजनाच्छादनाभ्यधिकां वराटिकामपि सहामि। तद्गच्छ स्वगृहं प्रति। अन्यच्च भवदीयसाहसेनाहं तुष्टः। तत् प्रार्थ्यतामभीष्टो वरः कश्चिदिति। सोमिलक आह। यद्येवं तद्देहि मे प्रभूतं धनं। स आह। भो किं करिष्यसि धनेनोपभोगरहितेन। यतो भोजनाच्छादनाभ्यधिको नास्ति ते भोगः। उक्तं च।

किं तया क्रियते लक्ष्म्या या वधूरिव केवला।
या न वेश्येव सामान्या पथिकैरुपभुज्यते ॥१४१॥

सोमिलक आह। भो यद्यपि तस्य धनस्य भोगो नास्ति तथापि तद्भवतु। उक्तं च यतः।

कृपणो ऽप्यकुलीनो ऽपि सज्जनैर्वर्जितः सदा।
सेव्यते स नरो लोकैर्यस्य स्याद्वित्तसञ्चयः ॥१४२॥

तथा च। शिथिलौ च सुबद्धौ च पततः पततो न वा।
निरीक्षितौ मया भद्रे वर्षाणि दश पञ्च च ॥१४३॥

कथा ॥६॥

पुरुष आह। कथमेतत्। सो ऽब्रवीत्। कस्मिंश्चिदधिष्ठाने तीक्ष्णवृषणो नाम महावृषभः प्रतिवसति स्म। स च मदातिरेकः परित्यक्तनिजयूथः शृङ्गाभ्यां नदीतटान् विदारयन् स्वेच्छया मरकतसदृशानि शष्पाग्राणि भक्षयन्नरण्यचरो बभूव। अथ तत्रैव वने प्रलोभको नाम शृगालः प्रतिवसति स्म। स कदाचित् स्वभार्यया सह नदीपुलिने सुखोपविष्टस्तिष्ठति। अत्रान्तरे स तीक्ष्णवृषणो जलपानार्थं

तदेव पुलिनमवतीर्णः। ततश्च तस्य लम्बमानौ वृषणाववलोक्य शृगाल्या शृगालो ऽभिहितः। स्वामिन् पश्यास्य वृषभस्य मांसपिण्डौ लम्बमानौ यथा स्थितौ। तदेतौ क्षणेन प्रहरेण वा पतिष्यतः। एवं ज्ञात्वा भवानस्य पृष्ठे यातुमर्हति। शृगाल आह। प्रिये न ज्ञायते कदाचिदेव तयोः पतनं भविष्यति वा न वा। तत् किं मां वृथा श्रमाय नियोजयसि। अत्रस्थस्तावज्जलार्थमायातान् मूषकान् त्वत्समेतो भक्षयिष्यामि। मार्गो ऽयं यतस्तेषां। अपरं यदि त्वां मुक्त्वास्य वृषभस्य पृष्ठे गमिष्यामि। तदागत्यान्यः कश्चिदेतत् स्थानं समाश्रयिष्यति। तन्नैतद्युज्यते कर्तुं। उक्तं च।

यो ध्रुवाणि परित्यज्य अध्रुवाणि निषेवते।
ध्रुवाणि तस्य नश्यन्ति अध्रुवं नष्टमेव च ॥१४४॥

शृगाल्याह। भो कापुरुषस्त्वं यत् किञ्चिदवाप्य तेनापि सन्तोषं करोषि। उक्तं च।

सुपूरा स्यात् कुनादीका सुपूरो मूषकाञ्जलिः।
सुसन्तुष्टः कापुरुषः स्वल्पकेनापि तुष्यति ॥१४५॥

तस्मात् सत्पुरुषेण सदैवोत्साहवता भाव्यं। उक्तं च।

यत्रोत्साहसमारम्भो यत्रालस्यविहीनता।
नयविक्रमसंयोगात् तत्र श्रीरखिला ध्रुवं ॥१४६॥
न दैवमिति सञ्चिन्त्य त्यजेदुद्योगमात्मनः।
अनुद्योगेन नो तैलं तिलेभ्यो ऽपि हि जायते ॥१४७॥

अन्यच्च। स्तोकेनापि यदि स्यात् सन्तोषपरो ऽत्र मानवो मन्दः।
तस्य गणनासु चित्तं दत्त्वा रेखापि मार्जयति ॥१४८॥

यच्च त्वं वदसि। एतौ पतिष्यतो वा न वेति। तदप्ययुक्तं। उक्तं च।

कृतनिश्चयिनो वन्द्यास्तुङ्गिमानः प्रशस्यते।
चातकः को वराको ऽयं यस्येन्द्रो वारिवाहकः ॥१४९॥

अपरं तावदहं मूषकमांसस्यातीव निर्विण्णा। एतौ च मांसपिण्डौ प्रत्यासन्नपतनौ दृश्येते। तत् सर्वथा नान्यथा कर्तव्यमिति। अथासौ तदाकर्ण्य मूषकप्राप्तिस्थानं परित्यज्य तीक्ष्णवृषणस्य पृष्ठमन्वगच्छत्। अथवा साध्विदमुच्यते।

तावत् स्यात् सर्वकृत्येषु पुरुषो ऽत्र स्वयं प्रभुः।
स्त्रीवाक्याङ्कुशप्रक्षुण्णो यावन्नो ध्रियते बलात् ॥१५०॥

तथा च। अकृत्यं मन्यते कृत्यमगम्यं मन्यते सुगं।
अभक्ष्यं मन्यते भक्ष्यं स्त्रीवाक्यप्रेरितो नरः ॥१५१॥

एवं स तस्य पृष्ठतः सभार्यः परिभ्रमन् चिरकालमनयत्। न च तयोः पतनमभूत्। ततश्च निर्वेदात् पञ्चदशे वर्षे शृगालः स्वभार्यामाह।

शिथिलौ च सुबद्धौ च पततः पततो न वा।
निरीक्षितौ मया भद्रे वर्षाणि दश पञ्च च ॥१५२॥

तत् पश्चादपि न तयोः पतनं भविष्यति। तमेव मूषकमार्गमनुसरावः। अतो ऽहं ब्रवीमि।

शिथिलौ च सुबद्धौ च पततः पततो न वा।
निरीक्षितौ मया भद्रे वर्षाणि दश पञ्च च ॥१५३॥

तदेवं धनवान् सर्वो ऽपि स्पृहणीयो भवति। अतो देहि मे प्रभूतं धनं। पुरुष आह। यद्येवं तद्गच्छ त्वं भूयो ऽपि वर्द्धमानपुरं। तत्र द्वौ वणिक्पुत्रौ वसतः। एको धनगुप्तः। अन्य उपभुक्तधनः। तत स्तयोः स्वरूपं बुद्ध्वा। एकस्य वरः प्रार्थनीयः। यदि ते गुप्तधनेन प्र योजनमभक्षितेन। ततस्त्वामपि गुप्तधनं करोमि। अथवा दत्तभोग्येन धनेन ते प्रयोजनं। तदुपभुक्तधनं करोमि। इत्येवमुक्त्वादर्शनं जगाम। सोमिलको ऽपि विस्मितमना भूयो ऽपि वर्धमानपुरं गतः। अथ सन्ध्यासमये परिश्रान्तः कथमपि तत् पुरं प्राप्तो धनगुप्तगृहं पृच्छन् कृच्छ्रेण लब्धास्तमिते सूर्ये प्रविष्टः। अथासौ भार्यापुत्रसहितेन धन

गुप्तेन निर्भर्त्स्यमानो हठादेव गृहाजिरं प्राप्योपविष्टः। ततश्च भोजनवेलायां तस्यापि भुक्तिवर्जितमपि भोजनं प्रदत्तं। ततः स भुक्त्वा तत्रैव यावत् सुप्तो निशीथे पश्यति। तावत् तावपि पुरुषौ परस्परं मन्त्रयतः। तत्रैकः प्राह। भो कर्तः किं त्वयास्य धनगुप्तस्याधिको व्ययो निर्मितः। यत् सोमिलकस्याप्यनेन भोजनं दत्तं। तदयुक्तं त्वयानुष्ठितं। स आह। भो कर्म न ममात्र दोषः। मया हि लाभप्राप्तिर्दातव्या व्यवसायिनः। तत्परिणतिः पुनस्त्वदायत्तेति। अथासौ यावदुत्तिष्ठति तावद्धनगुप्तो विसूचिकादोषेण खिद्यमानो रोगाभिभूतः क्षणं तिष्ठति। ततो द्वितीये ऽह्नि तद्दोषेण कृतोपवासः सञ्जातः। सोमिलको ऽपि प्रभाते तद्गृहान्निष्क्रम्योपभुक्तधनगृहं गतः। तेनापि चाभ्युत्थानादिभिः सत्कृतो विहितभोजनाच्छादनसम्मानस्तस्यैव गृहे भव्यशय्यायामारूढः सुष्वाप। ततश्च निशीथे यावत् पश्यति। तावत् तावेव द्वौ पुरुषौ मिथो मन्त्रयेते। तत्रैको ऽब्रवीत्। भो कर्तरनेनोपभुक्तधनेन सोमिलकस्योपचारं कुर्वता प्रभूतो व्ययः कृतः। तत् कथमस्योद्धारणविधिर्भविष्यति। यतः सर्वमेतदनेन व्यवहारकगृहात् समानीतमस्ति। स आह। भो कर्म मम कृत्यमेतत्। परिणतिश्च त्वदायत्तेति। अथ प्रभाते को ऽपि राजपुरुषो राजप्रसादजं बाहुवित्तमादाय समायात उपभुक्तधनाय सर्वं समर्पयामास। तद्दृष्ट्वा सोमिलकश्चिन्तयामास। अहो सञ्चयविरहितो ऽपि वरमेष उपभुक्तधनो न पुनरसौ कदर्यो धनगुप्तः। उक्तं च यतः।

अग्निहोत्रफला वेदाः शीलवृत्तिफलं श्रुतं।
रतिपुत्रफला दारा दत्तभुक्तफलं धनं ॥१५४॥

तद्भगवान् विधाता मां दत्तभुक्तधनं करोतु। न कार्यं मे धनगुप्ततया। तच्छ्रुत्वा तं तादृशं कृत्वा कर्मकर्तारौ जग्मतुरदर्शनीयं। अतो ऽहं ब्रवीमि।

अर्थस्योपार्जनं कृत्वा नैव भोगं समश्नुते ।
अरण्यं महदासाद्य मूढः सोमिलको यथा ॥१५५॥

तद्भद्र हिरण्यकैवं ज्ञात्वा धनविषये त्वया सन्तापो न कार्यः । यतो विद्यमानमप्यभोग्यं धनमविद्यमानमेव मन्तव्यं । उक्तं च ।

गृहमध्यनिखातेन धनेन धनिनो यदि ।
भवामः किं न तेनैव विधने धनिनो वयं ॥१५६॥

तथा च । उपार्जितानामर्थानां त्याग एव हि कारणं ।
तडागोदरसंस्थानां परीवाह इवाम्भसां ॥१५७॥

अन्यच्च । दातव्यं भोक्तव्यं धनविषये सञ्चयो न कर्तव्यः ।
पश्येह मधुकरीणां सञ्चितमर्थं हरन्त्यन्ये ॥१५८॥

तथा च । दानं भोगो नाशस्तिस्रो गतयो भवन्ति वित्तस्य ।
यो न ददाति न भुङ्क्ते तस्य तृतीया गतिर्भवति ॥१५९॥

एवं ज्ञात्वा विवेकिना न सुखार्थं वित्तोपार्जनं कर्तव्यं । यतो दुःखाय तत् । उक्तं च ।

धनादिकेषु विद्यन्ते येऽत्र मूर्खाः सुखाशयाः ।
तप्तग्रीष्मेण सेवन्ते शैत्यार्थं ते हुताशनं ॥१६०॥

तस्मात् सदैव सत्पुरुषेण सन्तोषः कार्यः । उक्तं च ।

सर्पाः पिबन्ति पवनं न च दुर्बलास्ते ।
शुष्कैस्तृणैर्वनगजा बलिनो भवन्ति ।
कन्दैः फलैर्मुनिवरा गमयन्ति कालं ।
सन्तोष एव पुरुषस्य परं निधानं ॥१६१॥

सन्तोषामृततृप्तानां यत् सुखं शान्तचेतसां ।
कुतस्तद्धनलुब्धानामितश्चेतश्च धावतां ॥१६२॥

पीयूषमिव सन्तोषं पिबतां निर्वृतिः परा ।
दुःखं निरन्तरं पुंसामसन्तोषवतां पुनः ॥१६३॥

निरुद्धचेतसो ऽक्षाणि निरुद्धान्यखिलान्यपि ।
आच्छादिते रवौ मेघैराच्छन्नाः स्युर्गभस्तयः ॥१६४॥
वाञ्छाविच्छेदनं प्राहुः स्वास्थ्यं शान्ता महर्षयः ।
वाञ्छा निवर्तते नार्थैः पिपासेवाग्निसेचनैः ॥१६५॥
अनिन्द्यमपि निन्दन्ति स्तुवन्त्यस्तुत्यमुच्चकैः ।
स्वापतेयकृते मर्त्याः किं किं नाम न कुर्वते ॥१६६॥
धर्मार्थं यस्य वित्तेहा तस्यापि न शुभावहा ।
प्रक्षालनाद्धि पङ्कस्य दूरादस्पर्शनं वरं ॥१६७॥
दानेन तुल्यो निधिरस्ति नान्यो लोभान्न चान्यो ऽस्ति रिपुः पृथिव्यां ।
विभूषणं शीलसमं न चान्यत् सन्तोषतुल्यं धनमस्ति नान्यत् ॥१६८॥
दारिद्र्यस्य परा मूर्तिर्या ज्ञानद्रविणाल्पता ।
जरद्गवधनः शर्वस्तथापि परमेश्वरः ॥१६९॥

तत् किमुद्विग्नमात्मानं मन्यसे ।

सकृत् कन्दुकपातेन पतत्यार्यः पतन्नपि ।
तथा पतति मूर्खस्तु मृत्पिण्डपतनं यथा ॥१७०॥

एवं ज्ञात्वा भद्र त्वया सन्तोषः कार्य इति । मन्थरकवचनमाकर्ण्य वायस आह । भद्र मन्थरको यदेवं वदति तत् त्वया चित्ते कर्तव्यं । अथवा साधिदमुच्यते ।

सुलभाः पुरुषा राजन् सततं प्रियवादिनः ।
अप्रियस्य हि पथ्यस्य वक्ता श्रोता च दुर्लभाः ॥१७१॥
अप्रियाण्यपि पथ्यानि ये वदन्ति नृणामिह ।
त एव सुहृदः प्रोक्ता अन्ये स्युर्नाम धारकाः ॥१७२॥

अथैवं प्रजल्पतां तेषां चित्राङ्गो नाम हरिणो लुब्धकत्रासितस्तस्मिन् सरसि प्रविष्टः । अथ तमायान्तं ससम्भ्रममवलोक्य लघुपतनको वृक्षमारूढः । हिरण्यको निकटवर्तिनं शरस्तम्बं । मन्थरकः सलिल आ

शयमास्थितः। अथ लघुपतनको मृगं सम्यक् परिज्ञाय मन्थरकमुवाच। एह्येहि सखे मन्थरक मृगो ऽयं तृषार्तो ऽत्र समागतः सरसि प्रविष्टः। तस्य शब्दो ऽयं न मानुषसम्भवः। तच्छ्रुत्वा मन्थरको देशकालोचितमिदमाह। भो लघुपतनक यथायं मृगो दृश्यते प्रभूतमुद्वहन्नुद्भ्रान्तदृष्टिः। पृष्ठमवलोकयति। तन्न तृषार्त एष। नूनं लुब्धकत्रासितः। ततो ज्ञायतामस्य पृष्ठे लुब्धका आगच्छन्ति न चेति। उक्तं च।

भयत्रस्तो नरः श्वासं प्रभूतं कुरुते मुहुः।
दिशो विलोकयत्येव न स्वास्थ्यं व्रजति क्वचित् ॥१७३॥

तच्छ्रुत्वा चित्राङ्गः प्राह। भो मन्थरक ज्ञातं त्वया सम्यङ् मे त्रासकारणं। अहं लुब्धकशरप्रहारादुद्धरितः कृच्छ्रेणात्र समायातः। मम यूथं पुनस्तैर्लुब्धकैर्व्यापादितं भविष्यति। तच्छरणागतस्य मम किञ्चिद्दर्शयागम्यं स्थानं दुष्टलुब्धकानां। तदाकर्ण्य मन्थरक आह। भो चित्राङ्ग श्रूयतां नीतिशास्त्रं। उक्तं च।

द्वावुपायाविह प्रोक्तौ विमुक्तौ शत्रुदर्शने।
हस्तयोश्चलनादेको द्वितीयः पादवेगजः ॥१७४॥

तद्गम्यतां शीघ्रं सघनं वनं। यावदद्यापि नागच्छन्ति ते दुरात्मानो लुब्धकाः। अत्रान्तरे लघुपतनकः सत्वरमभ्युपेत्य प्रोवाच। भो मन्थरक गतास्ते लुब्धका स्वगृहोन्मुखाः प्रचुरमृगमांसपिण्डधारिणः। तच्चित्राङ्ग विश्रब्धो जलाद्बहिर्भव। ततस्ते चत्वारो ऽपि मित्रभावमाश्रित्य तस्मिन् सरसि मध्याह्नवेलायां वृक्षच्छायाधस्तात् सुभाषितकथागोष्ठीमनुभवन्तः सुखेन कालं नयन्ति स्म। अथवा युक्तमेतदुच्यते।

सुभाषितरसास्वादजातरोमाञ्चकञ्चुकाः।
विनापि कामिनीसङ्गं सुधियः सुखमाप्नुयुः ॥१७५॥
सुभाषितमयैर्द्रव्यैः सङ्ग्रहं न करोति यः।
स तु प्रस्तावयज्ञेषु किं प्रदास्यति दक्षिणां ॥१७६॥

कारणात्। यतो यदि स पापात्मा लुब्धकः समागमिष्यति। तदहं तावत् खमुत्पतिष्यामि। त्वं पुनर्बिलं प्रविश्यात्मानं रक्षिष्यसि। चित्राङ्गो ऽपि वेगेन वनान्तरं यास्यति। एष पुनर्जलचरो ऽत्र स्थले किं करिष्यति। इति व्याकुलो ऽस्मि। अत्रान्तरे सम्प्राप्तो मन्थरकः। हिरण्यकः प्राह। भद्र न युक्तमनुष्ठितं भवता यदत्रायातस्त्वं। तद्भूयो ऽपि द्रुततरं गम्यतामिति यावदसौ लुब्धको न समायाति। मन्थरक आह। भद्र किं करोमि। न शक्नोमि तत्रस्थो मित्रव्यसनहुताशनदाहं सोढुं। तेनाहमत्रागतः। अथवा साध्विदमुच्यते।

दयितजनविप्रयोगो वित्तवियोगश्च केन सह्याः स्युः।
यदि सुमहौषधकल्पो वयस्यजनसङ्गमो न स्यात् ॥१८४॥

अपि च। वरं प्राणपरित्यागो न वियोगो भवादृशैः।
प्राणा जन्मान्तरे भूयो न भवन्ति भवद्विधाः ॥१८५॥

एवं तस्य प्रवदतः शरासन्नपाणिर्लुब्धको ऽप्युपागतः। तं दृष्ट्वा मूषकेण तत्क्षणात् तस्य स्नायुमयः पाशः खण्डितः। एतस्मिन्नन्तरे चित्राङ्गः सत्वरं प्रधावितुमारब्धः। लघुपतनको वृक्षं समारूढः। हिरण्यकः समीपवर्तिनं बिलं प्रविष्टः। अथासौ लुब्धको मृगगमनाद्विषण्णमना व्यर्थश्रमस्तं मन्थरकं मन्दं मन्दं स्थलमध्ये गच्छन्तं दृष्टवान् व्यचिन्तयत्। स यद्यपि कुरङ्गो मे धात्रापहृतः। तथाप्ययं कूर्म आहारार्थं सम्पादितः। तदद्यास्यामिषेण कुटुम्बस्याहारनिर्वृत्तिर्भविष्यति। उक्तं च यतः।

उत्पतन्तो ऽन्तरीक्षं वै गच्छन्तो ऽपि महीतलं।
धावतः पृथिवीं सर्वां नादत्तमुपतिष्ठति ॥१८६॥

एवं विचिन्त्य तं दर्भैः परिच्छाद्य धनुषि समालम्ब्य स्कन्धे कृत्वा गृहं प्रति प्रस्थितः। अत्रान्तरे तं नीयमानमवलोक्य हिरण्यको दुःखाकुलः पर्यदेवयत्। कष्टं भो कष्टं।

एकस्य कष्टस्य न यावदन्तं गच्छाम्यहं पारमिवार्णवस्य।
तावद्द्वितीयं समुपस्थितं मे छिद्रेष्वनर्था बहुलीभवन्ति॥१८७॥

यावदस्खलितं तावत् सुखं याति समे पथि।
स्खलिते च समुत्पन्ने विषमं च पदे पदे॥१८८॥

किं च। यन्नम्रं सरलं चापि तच्चापत्सु न सीदति।
धनुर्मित्रं कलत्रं च दुर्लभं शुद्धवंशजं॥१८९॥

न मातरि न दारेषु न सोदर्ये न चात्मजे।
विश्रम्भस्तादृशः पुंसां यादृग्मित्रे निरन्तरे॥१९०॥

यदि तावत् कृतान्तेनात्र धननाशो मे कृतः। मम मार्गश्रान्तस्य विश्रामस्तत् कथं मित्रो ऽप्यपहृतः। अपरमपि मित्रं भविष्यति। परं मन्थरकसमं न स्यात्। उक्तं च यतः।

असुखैश्च विनालापो गुह्यस्य कथनं तथा।
विपद्विमोक्षणं चैव मित्रतायाः फलत्रयं॥१९१॥

तदस्य पश्चान्नान्यत् सुहृन्मे। तत् किं ममोपर्यनवरतं व्यसनशरैर्वर्षति विधाता। कथमादौ तावद्वित्तविनाशः। ततः परिवारभ्रंशः। ततो देशत्यागः। ततो मित्रवियोग इति। अथवा स्वरूपमेवैतत् सर्वेषामपि जन्तूनां जीवितधर्मस्य। उक्तं च यतः।

कायः सन्निहितापायः सम्पदः क्षणभङ्गुराः।
समागमाः सापगमाः सर्वेषामेव देहिनां॥१९२॥

तथा च। क्षते प्रहारा निपतन्त्यभीक्ष्णं धनक्षये दीप्यति जाठराग्निः।
आपत्सु वैराणि समुल्लसन्ति छिद्रेष्वनर्था बहुलीभवन्ति॥१९३॥

अहो साधूक्तं केनापि।

प्राप्ते भये परित्राणं प्रीतिविश्रम्भभाजनं।
केन रत्नमिदं सृष्टं मित्रमित्यक्षरद्वयं॥१९४॥

एतस्मिन्नन्तरे आक्रन्दनपरौ चित्राङ्गलघुपतनकौ तत्रैव समागतौ।

अथ हिरण्यक आह। अहो किं वृथाप्रलपितेन। तद्यावदेष मन्थरको दृष्टिगोचरान्न नीयते। तावदस्य मोक्षस्योपायश्चिन्त्यतामिति। उक्तं च यतः।

व्यसनं प्राप्य यो मोहात् केवलं परिदेवयेत्।
व्यसनं वर्धयत्येव तस्यान्तं नाधिगच्छति ॥११५॥
केवलं व्यसनस्योक्तं भेषजं नयपण्डितैः।
तस्योच्छेदसमारम्भो विषादपरिवर्जनं ॥११६॥

अन्यच्च।

अतीतलाभस्य सुरक्षणार्थं भविष्यलाभस्य च सङ्गमार्थं।
आपत्प्रपन्नस्य च मोक्षणार्थं यन्मन्त्र्यते ऽसौ परमो हि मन्त्रः ॥११७॥

तच्छ्रुत्वा वायस आह। भो यद्येवं तत् क्रियतां मद्वचः। एष चित्राङ्गो ऽस्य मार्गे गत्वा किञ्चित् पल्वलमासाद्य तस्य तीरे निश्चेतनो भूत्वा पततु। अहमप्यस्य शिरसि समारुह्य मन्दैश्चञ्चुप्रहारैः शिर उल्लिखयिष्यामि। येनासौ दुष्टलुब्धको ऽमुं मृतं मत्वा मम चञ्चुप्रहरणप्रत्ययेन मन्थरकं भूमौ क्षिप्त्वा मृगार्थं परिधाविष्यति। अत्रान्तरे त्वया दर्भमयानि पाशानि खण्डनीयानि। येनासौ मन्थरको द्रुततरं पल्वलं प्रविशति। चित्राङ्ग आह। भो भद्रो ऽयं त्वया दृष्टो मन्त्रः। नूनं मन्थरको ऽयं मुक्तो मन्तव्य इति। उक्तं च।

सिद्धं वा यदि वासिद्धं चित्तोत्साहो निवेदयेत्।
प्रथमं सर्वजन्तूनां तत् प्राज्ञो वेत्ति नेतरः ॥११८॥

तदेवं क्रियतामिति। तथानुष्ठिते न लुब्धकस्तथैव मार्गासन्नपल्वलतीरस्थं चित्राङ्गं वायससनाथमपश्यत्। तं दृष्ट्वा हर्षितमना व्यचिन्तयत्। नूनं पाशबन्धनवेदनया वराको ऽयं मृगः सावशेषजीवितः पाशं त्रोटयित्वा कथमप्येतद्वनान्तरं यावत् प्रविष्टस्तावन्मृतः। तद्वश्यो ऽयं मे कच्छपः सुयन्त्रितत्वात्। तदेनमपि तावद्गृह्णामीति। इत्यवधार्य

कच्छपं भूतले प्रक्षिप्य मृगमुपाद्रवत्। एतस्मिन्नन्तरे हिरण्यकेन वज्रोपमदंष्ट्राप्रहरणेन तद्दर्भवेष्टनं खण्डशः कृतं। मन्थरको ऽपि तृणमध्यान्निष्क्रम्य समीपवर्तिनं पल्वलं प्रविष्टः। चित्राङ्गो ऽप्यप्राप्तस्यापि तस्य तत उत्थाय वायसेन सह पलायितः। एतस्मिन्नन्तरे विलक्षो विषादपरो लुब्धको निवृत्तो यावत् पश्यति। तावत् कच्छपो ऽपि गतः। ततश्च तत्रोपविश्येमं श्लोकमपठत्।

प्राप्तो बन्धनमप्ययं गुरुमृगस्तावत् त्वया मे हृतः।
सम्प्राप्तः कमठः स चापि नियतं नष्टस्त्वदादेशतः॥१९९॥
क्षुत्क्षामो ऽत्र वने भ्रमामि शिशुकैस्त्यक्तः समं भार्यया।
यच्चान्यन्न कृतं कृतान्त कुरुते तच्चापि सह्या वयं॥२००॥

एवं बहुविधं विलप्य स्वगृहं गतः। अथ तस्मिन् व्याधे दूरतरं गते सर्वे ऽपि ते काककूर्ममृगमूषकाः परमानन्दभाजः परस्परमालिङ्ग्य पुनर्जातमिवात्मानं मन्यमानास्तदेव सरः सम्प्राप्य महासुखेन सुभाषितकथागोष्ठीविनोदेन कालं नयन्ति स्म। एवं ज्ञात्वा विवेकिना मित्रसङ्ग्रहः कार्यः। न च मित्रेण सह व्याजेन वर्तितव्यमिति। उक्तं च यतः।

यो मित्राणि करोत्यत्र न कौटिल्येन वर्तते।
तैः समं न पराभूतिं सम्प्राप्नोति कथञ्चन॥२०१॥

इति श्रीविष्णुशर्मविरचिते पञ्चतन्त्रके मित्रसम्प्राप्तिर्नाम द्वितीयं तन्त्रं समाप्तं

अथेदमारभ्यते काकोलूकीयं नाम तृतीयं तन्त्रं। तस्यायमाद्यः श्लोकः।

न विश्वसेत् पूर्वविरोधितस्य शत्रोश्च मित्रत्वमुपागतस्य।
दग्धां गुहां पश्य उलूकपूर्णां काकप्रणीतेन हुताशनेन ॥१॥

तद्यथानुश्रूयते। अस्ति दाक्षिणात्ये जनपदे मिहिलारोप्यं नाम नगरं। तस्य समीपस्थो ऽनेकशाखासनाथो ऽतिघनतरपत्रच्छन्नो न्यग्रोधपादपो ऽस्ति। तत्र च मेघवर्णो नाम वायसराजो ऽनेककाकपरिवारः प्रतिवसति स्म। स तत्र विहितदुर्गरचनः सपरिजनः कालं नयति स्म। तथान्यो ऽरिमर्दनो नामोलूकराजो ऽसङ्ख्योलूकपरिवारो गिरिगुहादुर्गाश्रयः प्रतिवसति स्म। स च रात्रावभ्येत्य सदैव तस्य न्यग्रोधस्य समन्तात् परिभ्रमति। अथोलूकराजः पूर्वविरोधवशाद्यं कञ्चिद्वायसं समासादयति। तं व्यापाद्य गच्छति। एवं नित्याभिगमनाच्छनैः शनैस्तन्न्यग्रोधपादपदुर्गं तेन समन्तान्निर्वायसं कृतं। अथवा भवत्येवं। उक्तं च यतः।

य उपेक्षेत शत्रुं स्वं प्रसरन्तं यदृच्छया।
रोगं चालस्यसंयुक्तः स शनैस्तेन हन्यते ॥२॥

तथा च। जातमात्रं न यः शत्रुं व्याधिं च प्रशमं नयेत्।
अतिपुष्टाङ्गयुक्तो ऽपि स पश्चात् तेन हन्यते ॥३॥

अथान्येद्युः स वायसराजा सर्वान् वायससचिवानाहूय प्रोवाच। भो उत्कटस्तावदस्माकं शत्रुरुद्यमसम्पन्नश्च कालवन्नित्यमेव निशागमे समेत्यास्मत्पक्षकदनं करोति। तत् कथमस्य प्रतिविधानं। वयं तावद्रात्रौ

न पश्यामः। न च तस्य दिवादुर्गं विजानीमः। येन गत्वा प्रहरामः। तदत्रविषये किं युज्यते सन्धिविग्रहयानासनसंश्रयद्वैधीभावानामेकतमस्य क्रियमाणस्य। तद्विचार्य शीघ्रं कथयन्तु भवन्तः। अथ ते प्रोचुः। युक्तमभिहितं देवेन यदेष प्रश्नः कृतः। उक्तं च।

अपृष्टेनापि वक्तव्यं सचिवेनात्र किञ्चन।
पृष्टेन तु ऋतं पथ्यं वाच्यं च प्रियमप्रियं ॥४॥
यो न पृष्टो हितं ब्रूते परिणामे सुखावहं।
सुमन्त्री प्रियवक्ता च केवलं स रिपुः स्मृतः ॥५॥
तस्मादेकान्तमासाद्य कार्यो मन्त्रो महीपते।
येन तस्य वयं कुर्मो निर्णयं कारणं तथा ॥६॥

अथ स मेघवर्णो ऽन्वयागतानुज्जीविसञ्जीव्यनुजीविप्रजीविचिरजीविनाम्नः पञ्चसचिवान् प्रत्येकं प्रष्टुमारब्धः। तदेतेषामादौ तावदुज्जीविनं पृष्टवान्। भद्र एवं स्थिते किं मन्यते भवान्। स आह। राजन् बलवता सह विग्रहो न कार्यः। यथा स बलवान् कालप्रहर्ता च। उक्तं च यतः।

बलीयसे प्रणमतां काले प्रहरतामपि।
सम्पदो नापगच्छन्ति प्रतीपमिव निम्नगाः ॥७॥

तथा च। सत्याढ्यो धार्मिकश्चार्यो भ्रातृसङ्घातवान् बली।
अनेकविजयी चैव सन्धेयः स रिपुर्भवेत् ॥८॥
सन्धिः कार्यो ऽप्यनार्येण विज्ञाय प्राणसंशयं।
प्राणैः संरक्षितैः सर्वं यतो भवति रक्षितं ॥९॥

येनानेकयुद्धविजयी स तेन विशेषात् सन्धनीयः। उक्तं च।

अनेकयुद्धविजयी सन्धानं यस्य गच्छति।
तत्प्रभावेन तस्याशु वशं गच्छन्त्यरातयः ॥१०॥
सन्धिमिच्छेत् समेनापि सन्दिग्धो विजयो युधि।

न हि सांशयिकं कुर्यादित्युवाच बृहस्पतिः ॥११॥
सन्दिग्धो विजयो युद्धे जनानामिह युध्यतां ।
उपायत्रितयादूर्ध्वं तस्माद्युद्धं समाचरेत् ॥१२॥
असन्दधानो मानान्धः समेनापि हतो भृशं ।
आमकुम्भ इवान्येन करोत्युभयसङ्क्षयं ॥१३॥
समं शक्तिमता युद्धमशक्तस्य हि मृत्यवे ।
दृषत् कुम्भमिवाभित्त्वा तावत् तिष्ठति शक्तिमान् ॥१४॥
अन्यच्च। भूमिर्मित्रं हिरण्यं वा विग्रहस्य फलत्रयं ।
नास्त्येकमपि यद्येषां विग्रहं न समाचरेत् ॥१५॥
खनन्नाखुबिलं सिंहः पाषाणसकलाकुलं ।
प्राप्नोति नखभङ्गं वा फलं वा मूषको भवेत् ॥१६॥
तस्मान्न स्यात् फलं यत्र पुष्टं युद्धं तु केवलं ।
न तत् स्वयं समुत्पाद्यं कर्तव्यं न कथञ्चन ॥१७॥
बलीयसा समाक्रान्तो वैतसीं वृत्तिमाचरेत् ।
वाञ्छन् न भ्रंसिनीं लक्ष्मीं न भौजङ्गीं कदाचन ॥१८॥
कुर्वन् हि वैतसीं वृत्तिं प्राप्नोति महतीं श्रियं ।
भुजङ्गवृत्तिमापन्नो वधमर्हति केवलं ॥१९॥
कौर्मं सङ्कोचमास्थाय प्रहारानपि मर्षयेत् ।
काले काले च मतिमानुत्तिष्ठेत् कृष्णसर्पवत् ॥२०॥
आगतं विग्रहं गत्वा समाम्ना प्रशमं नयेत् ।
विजयस्य ह्यनित्यत्वाद्रभसाच्च समुत्पतेत् ॥२१॥
तथा च। बलिना सह योद्धव्यमिति नास्ति निदर्शनं ।
प्रतिवातं न हि घनः कदाचिदुपसर्पति ॥२२॥

एवमुज्जीवी साममन्त्रं सन्धिकारं ज्ञातवान्। अथ तच्छ्रुत्वा सञ्जीविनमाह। भद्र तवाभिप्रायमपि श्रोतुमिच्छामि। स आह। देव न

ममैतत् प्रतिभाति यच्छत्रुणा सह सन्धिः क्रियते। उक्तं च यतः।

शत्रुणा न हि सन्दध्यात् सुश्लिष्टेनापि सन्धिना।
सुतप्तमपि पानीयं शमयत्येव पावकं ॥२३॥

अपरं च स क्रूरो ऽत्यन्तलुब्धो धर्मरहितः। तत् त्वया विशेषान्न सन्धेयः। उक्तं च यतः।

सत्यधर्मविहीनेन न सन्दध्यात् कथञ्चन।
सुसन्धितो ऽप्यसाधुत्वादचिराद्याति विक्रियां ॥२४॥

तस्मात् तेन सह योद्धव्यमिति मे मतिः। उक्तं च यत।

क्रूरो लुब्धो ऽलसो ऽसत्यः प्रमादी भीरुरस्थिरः।
मूढो युद्धावमन्ता च सुखोच्छेद्यो भवेद्रिपुः ॥२५॥

अपरं तेन पराभूता वयं। तद्यदि सन्धानकीर्त्तनं करिष्यामः। स भूयो ऽत्यन्तं कोपं करिष्यति। उक्तं च।

चतुर्थोपायसाध्ये तु रिपौ सान्त्वमपक्रिया।
स्वेद्यमानज्वरं प्राज्ञः को ऽम्भसा परिषिञ्चति ॥२६॥
सामवादाः सकोपस्य शत्रोः प्रत्युत दीपकाः।
प्रतप्तस्येव सहसा सर्पिषस्तोयविन्दवः ॥२७॥

यदेवैतद्वदति रिपुर्बलवान्। तदप्यकारणं। उक्तं च यतः।

सोत्साहशक्तिसम्पन्नो हन्याच्छत्रुं लघुर्गुरुं।
यथा कण्ठीरवो नागे सुसाम्राज्यं प्रपद्यते ॥२८॥
मायया शत्रवो बध्या अबध्याः स्युर्बलेन ये।
यथा स्त्रीरूपमास्थाय हता भीमेन कीचकाः ॥२९॥

तथा च। मृत्योरिवोग्रदण्डस्य राज्ञो यान्ति वशं द्विषः।
शष्पतुल्यं हि मन्यन्ते दयालुं रिपवो नृपं ॥३०॥
न याति शामनं यस्य तेजस्तेजस्वि तेजसा।
वृथाजातेन किं तेन मातुर्यौवनहारिणा ॥३१॥

या लक्ष्मीर्नानुलिप्ताङ्गी वैरिशोणितकुङ्कुमैः ।
कान्तापि मनसः प्रीतिं न सा धत्ते मनस्विनां ॥३२॥
रिपुरक्तेन संसिक्तारिस्त्रीनेत्राम्बुभिस्तथा ।
न भूमिर्यस्य भूपस्य का श्लाघा तस्य जीविते ॥३३॥

एवं सञ्जीवी विग्रहमल्लं विज्ञापयामास। अथ तच्छ्रुत्वानुजीविनमपृच्छत्। भद्र त्वमपि स्वाभिप्रायं निवेदय। सो ऽब्रवीत्। देव दुष्टः स बलाधिको निर्मर्यादश्च। तत्र तेन सह सन्धिविग्रहौ न युक्तौ। केवलं यानमर्हं स्यात्। उक्तं च यतः।

बलोत्कटेन दुष्टेन मर्यादारहितेन च ।
न सन्धिविग्रहौ नैव यानं विना प्रशस्यते ॥३४॥
द्विधाकारं भवेद्यानं भयत्रस्तप्ररक्षणं ।
एकमन्यज्जिगीषोश्च यात्रा लक्षणमुच्यते ॥३५॥
कार्तिके वाथ चैत्रे वा विजिगीषोः प्रशस्यते ।
यानमुत्कृष्टवीर्यस्य शत्रुदेशे न चान्यदा ॥३६॥
अवस्कन्दप्रदानस्य सर्वे कालाः प्रकीर्तिताः ।
व्यसने वर्तमानस्य शत्रोश्छिद्रान्वितस्य च ॥३७॥
स्वस्थानं सुदृढं कृत्वा शूरैश्चाप्तैर्महाबलैः ।
परदेशं ततो गच्छेत् प्रणिधिव्याप्तमग्रतः ॥३८॥
अज्ञातविवधासारतोयशस्यो व्रजेत् तु यः ।
परराष्ट्रं स नो भूयः स्वराष्ट्रमधिगच्छति ॥३९॥

तत् ते युक्तं कर्तुमपसरणं। अन्यच्च न विग्रहं न सन्धानं बलिना तेन पापिना। अपरं कार्यकारणापेक्षयापसरणं क्रियते बुधैः। उक्तं च यतः।

यदपसरति मेषः कारणं तत् प्रहर्तुं ।
मृगपतिरपि कोपात् सङ्कुचत्युत्पतिष्णुः ।
हृदयविहितवैरा गूढमन्त्रोपचाराः ।

किमपि विगणयन्तो बुद्धिमन्तः सहन्ते ॥४०॥

अन्यच्च। बलवन्तं रिपुं दृष्ट्वा देशत्यागं करोति यः।
युधिष्टिर इवाप्नोति पुनर्जीविन् स मेदिनीं ॥४१॥
युध्यते ऽहङ्कृतिं कृत्वा दुर्बलो यो बलीयसा।
स तस्य वाञ्छितं कुर्यादात्मनश्च कुलक्षयं ॥४२॥

तद्बलवताभियुक्तस्यापसरणसमयो ऽयं न सन्धेर्विग्रहस्य च। एवमनुजीविमन्त्रो ऽपसरणस्य। अथ तस्य वाक्यं समाकर्ण्य प्रजीविनमाह। भद्र त्वमप्यात्मनो ऽभिप्रायं वद। सो ऽब्रवीत्। देव मम सन्धिविग्रहयानानि त्रीण्यपि न प्रतिभान्ति। विशेषतश्चासनं प्रतिभाति। उक्तं च यतः।

नक्रः स्वस्थानमासाद्य गजेन्द्रमपि कर्षति।
स एव प्रच्युतः स्थानाच्छुनापि परिभूयते ॥४३॥

अन्यच्च। अभियुक्तो बलवता दुर्गे तिष्ठेत् प्रयत्नवान्।
तत्रस्थः सुहृदाह्वानं प्रकुर्वीतात्ममुक्तये ॥४४॥
यो रिपोरागमं श्रुत्वा भयसन्त्रस्तमानसः।
स्वस्थानं सन्त्यजेत् तत्र न स भूयो वसेन्नरः ॥४५॥
दंष्ट्राविरहितः सर्पो मदहीनो यथा गजः।
स्थानहीनस्तथा राजा गम्यः स्यात् सर्वजन्तुषु ॥४६॥
निजस्थानस्थितो ऽप्येकः शतं योद्धुं सहेन्नरः।
शक्तानामपि शत्रूणां तस्मात् स्थानं न सन्त्यजेत् ॥४७॥
तस्माद्दुर्गं दृढं कृत्वा सुभटासारसंयुतं।
प्राकारपरिखायुक्तं शस्त्रादिभिरलङ्कृतं ॥४८॥
तिष्ठ मध्यगतो नित्यं युद्धाय कृतनिश्चयः।
जीवन् सम्प्राप्स्यसि क्ष्मान्तं मृतो वा स्वर्गमेष्यसि ॥४९॥

अन्यच्च। बलिनापि न बध्यन्ते लघवो ऽप्येकसंश्रयाः।

विपक्षेणापि मरुता यथैकस्थानवीरुधः ॥५०॥
महानप्येकको वृक्षः सर्वतः सुप्रतिष्ठितः ।
प्रसह्यैव हि वातेन शक्यो धर्षयितुं यतः ॥५१॥
अथ ये संहता वृक्षाः सर्वतः सुप्रतिष्ठिताः ।
न ते शीघ्रेण वातेन हन्यन्ते ह्येकसंश्रयात् ॥५२॥
एवं मनुष्यमेकं च शौर्येणापि समन्वितं ।
शक्यं द्विषन्तो मन्यन्ते हिंसन्ति च ततः परं ॥५३॥

एवं प्रजीविमन्त्र इदमासनसञ्ज्ञकं। एतत् समाकर्ण्य चिरञ्जीविनं प्राह। भद्र त्वमपि स्वाभिप्रायं वद। सो ऽब्रवीत्। देव षाड्गुण्यमध्ये मम संश्रयः प्रतिभाति। तत् तस्यानुष्ठानं कार्यं। उक्तं च यतः।

असहायः समर्थो ऽपि तेजस्वी किं करिष्यति ।
निर्वाते ज्वलितो वह्निः स्वयमेव प्रशाम्यति ॥५४॥
सङ्गतिः श्रेयसी पुंसां स्वपक्षे च विशेषतः ।
तुषैरपि परिभ्रष्टा न प्ररोहन्ति तण्डुलाः ॥५५॥

तदत्रैव स्थितेन त्वया कश्चित् समर्थः समाश्रयणीयः। यो विपत्प्रतीकारं करोति। यदि पुनस्त्वं स्वस्थानं त्यक्त्वान्यत्र यास्यसि। तत् को ऽपि ते वाङ्मात्रेणापि सहायत्वं न करिष्यति। उक्तं च यतः।

वनानि दहतो वह्नेः सखा भवति मारुतः ।
स एव दीपनाशाय कृशे कस्यास्ति सौहृदं ॥५६॥

अथवा नैतदेकान्तं यद्बलिनमेकं समाश्रयेत्। लघूनामपि संश्रयो रक्षायैव भवति। उक्तं च यतः।

सङ्घातवान् यथा वेणुर्निबिडो वेणुभिर्वृतः ।
न शक्यः स समुच्छेत्तुं दुर्बलो ऽपि तथा नृपः ॥५७॥

यदि पुनरुत्तमसंश्रयो भवति। तत् किमुच्यते। उक्तं च।

महाजनस्य सम्पर्कः कस्य नोन्नतिकारकः ।

पद्मपत्रस्थितं तोयं धत्ते मुक्ताफलश्रियं ॥५८॥

तदेवं संश्रयं विना न कश्चित् प्रतीकारो भवति। तस्मात् संश्रयः कार्यः। इत्येवं मे ऽभिप्रायः। एवं चिरञ्जीविमतः। अथैवमभिहिते स मेघवर्णश्चिरन्तनं पितृसचिवं दीर्घायुषं सकलनीतिशास्त्रपारगं स्थिरजीव्यभिधानं प्रणम्य प्रोवाच। तात यदेते मया पृष्टास्तावदत्र स्थितस्यापि तव तत् परीक्षार्थं। येन त्वं सकलं श्रुत्वा यदुचितं तद्वदसि। तद्युक्तं भवति तन्ममादेश्यमिति। सो ऽब्रवीत्। वत्स सर्वैरप्येतै नीतिशास्त्राश्रयमभिहितं सचिवैः। तदुपयुज्यते स्वकालोचितं सर्वमेव। परमेष द्वैधीभावस्य कालः। उक्तं च यतः।

अविश्वासं सदा तिष्ठेत् सन्धिना विग्रहेण च।
द्वैधीभावं समाश्रित्य पापे शत्रौ बलीयसि ॥५९॥

तच्छत्रुर्विश्वास्याविश्वस्तैर्लोभं दर्शयद्भिः सुखेनोच्छिद्यते। उक्तं च।

उच्छेद्यमपि विद्वांसो वर्धयन्त्यरिमेकदा।
गुडेन वर्धितः श्लेष्मा सुखंवृद्ध्या निपात्यते ॥६०॥

तथा च। स्त्रीणां शत्रोः कुमित्रस्य पण्यस्त्रीणां विशेषतः।
यो भवेदेकभावेन न स जीवति मानवः ॥६१॥
कृत्यं देवद्विजातीनामात्मनश्च गुरोस्तथा।
एकभावेन कर्तव्यं शेषं द्वैधं समाश्रितं ॥६२॥
एको भावः सदा शस्तो यतीनां भावितात्मनां।
श्रीलुब्धानां न लोकानां विशेषेण महीभृतां ॥६३॥

तद्द्वैधीभावं संश्रितस्य तव स्थाने शोभनं भविष्यति। लोभाश्रयस्त्वां न शत्रुरुच्चाटयिष्यति। अपरं यदि किञ्चिच्छिद्रं तस्य पश्यसि। तद्गत्वा व्यापादयिष्यसीति। मेघवर्ण आह। तात मया सो ऽविदितसंश्रयः। तत् कथं तस्य छिद्रं ज्ञास्यामि। स्थिरजीवी प्राह। वत्स न केवलं स्थानं छिद्रमपि तस्य प्रकटीकरिष्यामि प्रणिधिभिः। उक्तं च।

गावो गन्धेन पश्यन्ति वेदैः पश्यन्ति वै द्विजाः ।
चरैः पश्यन्ति राजानश्चक्षुर्भ्यामितरे जनाः ॥ ६४ ॥

तथोक्तं चात्रविषये ।

यस्तीर्थानि निजे पक्षे परपक्षे विशेषतः ।
गुप्तैश्चरैर्नृपो वेत्ति न स दुर्गतिमाप्नुयात् ॥ ६५ ॥

मेघवर्ण आह । तात कानि तीर्थान्युच्यन्ते कतिसङ्ख्यायुतानि च । कीदृशाश्च गुप्तचराः । तत् सर्वं त्वन्निवेद्यतामिति । सो ऽब्रवीत् । अत्रविषये भगवता नारदेन युधिष्ठिरो राजा प्रोक्तः । शत्रुपक्षे ऽष्टादश तीर्थानि स्वपक्षे पञ्चदश । त्रिभिस्त्रिभिर्गुप्तचरैस्तानि ज्ञेयानि । तैर्ज्ञातैः स्वपक्षः परपक्षश्च वश्यो भवति । उक्तं चात्रविषये मुनिना नारदेन युधिष्ठिरं प्रति ।

कच्चिदष्टादशान्येषु स्वपक्षे दश पञ्च च ।
त्रिभिस्त्रिभिरविज्ञातैर्वेत्सि तीर्थानि चारकैः ॥ ६६ ॥

तीर्थशब्देनात्र युक्तकर्माभिधीयते । तद्यदि तेषां कुत्सितं भवति । तत् स्वामिनोपघाताय भवति । तच्च प्रधानं चेद्भवति । तन्नृपस्याभ्युदयाय स्यात् । तद्यथा मन्त्री । पुरोहितः । सेनापतिः । युवराजः । दौवारिकः । अन्तर्वंशिकः । प्रशास्ता । समाहर्ता । सन्निधाता । उपदेष्टा । नायकः । पारिषदः । अश्वाध्यक्षः । गजाध्यक्षः । कोशाध्यक्षः । दुर्गपालः । प्रोत्कटभृत्यः । आटविकश्च परपक्षे । एतेषां भेदेन द्राग्रिपुः साध्यते । स्वपक्षे च यथा जननी । देवी । कञ्चुकी । मालिकः । शय्यापालकः । स्पशाध्यक्षः । सांवत्सरिकः । भिषक् । जलवाहकः । ताम्बूलवाहकः । आचार्यः । अङ्गरक्षकः । स्थानचिन्तकः । छत्रधारः । विलासिनी च । एतेषां वैरद्वारेण स्वपक्षे विघातं । ततश्च ।

वैद्यसांवत्सराचार्याः स्वपक्षे ऽधिकृताश्चराः ।
यथा हि तुण्डकोन्मत्ताः सर्वं जानन्ति शत्रुषु ॥ ६७ ॥

मेघवर्ण आह। तात किं निमित्तमेवम्विधं प्राणान्तिककरणं वैरं सर्ववायसोलूकानां। स आह। वत्स कदाचित् पूर्वं हंससारसशुककोकिलमयूरचातकोलूककपोतपारावततित्तिरिचाषभासभारद्वाजकरायिकाश्यामाकाष्ठकुट्टपुष्करप्रभृतयः सर्वे पक्षिणः समभ्येत्य सोद्वेगं मन्त्रयितुमारब्धाः। अहो ऽस्माकं तावद्वैनतेयो राजा। स च वासुदेवभक्तो न कामपि चिन्तामस्माकं करोति। तत् किं तेन वृथास्वामिना यो ऽस्माकं लुब्धकपाशबन्धनादिव्यसनव्याकुलितानां रक्षां न विधत्ते। उक्तं च यतः।

एको ऽपि को ऽपि सेव्यो यः क्षीणं क्षीणं पुनर्नवं।
अनुद्विग्नः करोत्येव सूर्यश्चन्द्रमसं यथा ॥६८॥

अन्यस्तु स्वामी नाममात्रेणैव। उक्तं च।

शरलैरपि चातुङ्गैः सुरतुल्यनिभेक्षणैः।
मत्स्यैरिव लघुहेच्यः क्रियते पार्थिवो जडः ॥६९॥
यो न रक्षति वित्रस्तान् पीड्यमानान् पुरैः सदा।
जन्तून् पार्थिवरूपेण स कृतान्तो न संशयः ॥७०॥
बुद्धिमान् पुरुषो जह्याद्भिन्नां नावमिवाम्भसि।
अप्रवक्तारमाचार्यमनधीयानमृत्विजं ॥७१॥
अरक्षितारं राजानं भार्यां चाप्रियवादिनीं।
ग्रामकामं च गोपालं वनकामं च नापितं ॥७२॥

तत् सञ्चिन्त्यान्यः कश्चिद्राजा विहङ्गानां क्रियतामिति। अथ तैर्भद्राकारमुलूकमवलोक्य सर्वैरभिहितं। एष कौशिको ऽस्माकं राजा भवत्विति। तदानीयतां नृपाभिषेकोचितः समस्तवस्तुसम्भारसार इति। अथानीतेषु विविधतीर्थोदकेषु। प्रगुणीकृते च चक्राङ्कितासहदेवीप्रभृत्यष्टोत्तरशतमूलिकासङ्घाते। स्थिरीकृते च सिंहासने। वर्तिते च सप्तद्वीपसमुद्रभूधरविचित्रे धरणीमण्डले। प्रसारिते च व्याघ्रचर्मणि।

पञ्चपल्लवकुसुमाक्षतपूरितेषु कनककलशेषु। सज्जीकृतेषु दर्पणादिषु मङ्गल्यवस्तुषु। धृतं पठत्सु वेदोपचारपरेषु वन्दिमुख्येषु विप्रेषु। गीयमानमङ्गलगीतप्रधाने युवतीजने। सितसिद्धार्थलाजगोरोचनाग्रथितकुसुमशङ्खादिविचित्रे पुरःसज्जीकृते ऽक्षतपात्रे। उपढौकिते नीराजनादिविधौ। निनदत्सु मङ्गलतूर्येषु। उलूको ऽभिषेकार्थं यावत् पत्राद्यालङ्कृतदेविकामध्याधिष्ठितसिंहासनमुपविशति। तावत् कुतो ऽपि क्रूरकोङ्कारसंसूचितनिजप्रवेशो वायसस्तं समाजं समायातः। सो ऽचिन्तयत्। अहो किमेष सकलपक्षिसमागमो महोत्सवः। अथ ते पक्षिणस्तं दृष्ट्वा मिथः प्रोचुः। अहो पक्षिणां मध्ये चतुरो ऽयं वायसः श्रूयते। उक्तं च।

नराणां नापितो धूर्तः पक्षिणां चैव वायसः।
दंष्ट्रिणां च शृगालस्तु श्वेतभिक्षुस्तपस्विनां ॥७३॥

तदस्यापि वचनं सङ्ग्राह्यं। उक्तं च।

बहुधा बहुभिः सार्धं चिन्तिताः सुनिरूपिताः।
न कथंचिद्विलीयन्ते विद्वद्भिश्चिन्तिता नयाः ॥७४॥

अथ वायसः समभ्येत्य तानाह। भो किं महाजनसमागमो ऽयं परममहोत्सवश्च। पक्षिण ऊचुः। भो नास्ति कश्चिद्विहङ्गानां राजा। तदस्यैवोलूकस्य सकलविहङ्गराज्याभिषेकः समस्तपक्षिभिर्निरूपित आस्ते। तत् त्वमपि स्वमतं देहि। प्रस्तावे समागतो ऽसि। अथासौ काको विहस्य प्रोवाच। अहो न युक्तमेतत्। यन्मयूरहंसकोकिलचक्रवाकशुककारण्डवहारीतकसारसादिषु पक्षिप्रधानेषु विद्यमानेषु तस्य दिवान्धस्य करालवक्त्रस्याभिषेकः क्रियते। तन्नैतन्मम मतं। यतः।

वक्रनासं सुजिह्माक्षं क्रूरमप्रियदर्शनं।
अक्रुद्धस्येदृशं वक्त्रं भवेत् क्रुद्धस्य कीदृशं ॥७५॥
स्वभावरौद्रमत्युग्रं क्रूरमप्रियवादिनं।

उलूकं नृपतिं कृत्वा का नः सिद्धिर्भविष्यति ॥७६॥

अपरं वैनतेये स्वामिनि सति किमेष दिवान्धः क्रियते राजा। तद्यद्यपि गुणवान् भवति। तथाप्येकस्मिन् स्वामिनि स्थिते। नान्यो भूयः प्रशस्यते। उक्तं च यतः।

एक एव हितार्थाय तेजस्वी पार्थिवो भुवः।
युगान्त इव भास्वन्तो बहवो ऽत्र विपत्तये ॥७७॥

ततस्तस्य नाम्नापि यूयं परेषामगम्या भविष्यथ। उक्तं च।

गुरूणां नाममात्रे ऽपि गृहीते स्वामिसम्भवे।
दुष्टानां पुरतः क्षेमं तत्क्षणादेव जायते ॥७८॥

तथा च। व्यपदेशेन महतां सिद्धिः सञ्जायते परा।
शशिनो व्यपदेशेन वसन्ति शशकाः सुखं ॥७९॥

पक्षिणः पृच्छन्ति। कथमेतत्। वायसः कथयति। कस्मिंश्चिद्वनोद्देशे चतुर्दन्तो नाम महागजो यूथाधिपः प्रतिवसति स्म। तत्र कदाचिन्महत्यनावृष्टिः सञ्जाता प्रभूतवर्षाणि। यया तडागह्रदपल्वलसरांसि सर्वाण्यपि शोषमुपागतानि। अथ तैः समस्तगजैः स गजराजः प्रोक्तः। देव पिपासाकुलाः कलभाः केचिन्मृताश्चापरे। तदन्विष्यतां कश्चिज्जलाशयः। यत्र जलपानेन स्वस्थतां व्रजन्ति। ततस्तेनाष्टास्वपि दिक्षूदकान्वेषणाय वेगचण्डा अनुचराः प्रेषिताः। अथ ये पूर्वदिग्भागे गतास्तैः हंसकारण्डवादिजलपक्षिभिरुपालङ्कृतो ऽनेककुसुमफलावनतपादपैरुपशोभितश्चन्द्रसरो नामको ह्रदो दृष्टः। दृष्ट्वा मुदान्वितैस्तैः परिवृत्य स्वामिने प्रणम्योक्तं। अस्ति महान् ह्रदो विविक्ते प्रदेशे स्थलमध्यगतः पातालगङ्गाजलेन सदैव परिपूर्णः। तत् तत्र गम्यतामिति। तथानुष्ठिते पञ्चरात्रमुपसर्पद्भिः समासादितस्तैः स ह्रदः। तत्र स्वेच्छया तज्जलमवगाह्यास्तमनवेलायां निष्क्रान्ताः। तस्य ह्रदस्य समन्ताच्छशकविलान्यसङ्ख्यानि सुकुमलभूम्यां तिष्ठन्ति। तानि च

सर्वाणि तैर्गजैरितश्चेतश्च भ्राम्यद्भिर्भग्नानि। तत्र च बहवः शशका भग्नपादशिरोग्रीवा विहिताः। केचिन्मृताः केचिच्च जीवशेषा जाताः। अथ गते तस्मिन् गजयूथे सर्वे ते शशकाः सोद्वेगं गजपादहतसमावासाः केचिद्भग्नपादा अन्ये जर्जितकलेवरा रुधिराप्लुता अन्ये हतशिशवो बाष्पपिहितलोचनाः समेत्य मिथो मन्त्रं चक्रुः। अहो विनष्टा वयं। नित्यमेवैतद्गजयूथमागमिष्यति। यतो नान्यत्र जलमस्ति। तत् सर्वेषां नाशो भविष्यति। उक्तं च यतः।

स्पृशन्नपि गजो हन्ति जिघ्रन्नपि भुजङ्गमः।
हसन्नपि नृपो हन्ति मानयन्नपि दुर्जनः ॥८०॥

तच्चिन्त्यतां कश्चिन्निवारणोपायः। तत्रैके प्रोचुः। गम्यतां देशत्यागेन। उक्तं च यतः।

त्यजेदेकं कुलस्यार्थे ग्रामस्यार्थे कुलं त्यजेत्।
ग्रामं जनपदस्यार्थे आत्मार्थे पृथिवीं त्यजेत् ॥८१॥
क्षेम्यां सस्यप्रदां नित्यं पशुवृद्धिकरीमपि।
परित्यजेन्नृपो भूमिमात्मार्थमविचारयन् ॥८२॥

ततश्चान्यैरुक्तं। भो पितृपैतामहं स्थानमेतन्न शक्यते सहसा त्यक्तुं। तत् क्रियतां तेषां काचिद्विभीषिका। यत् कथमपि दैववशान्न समागच्छन्ति। उक्तं च यतः।

निर्विषेणापि सर्पेण कर्तव्या महती फटा।
विषं भवतु मा वास्तु फटाटोपो भयङ्करः ॥८३॥

अथान्ये प्रोचुः। यद्येवं तदस्ति तेषां महद्विभीषिकास्थानं येन नागमिष्यन्ति चतुरद्दूतो यत्तः सा च बिभीषिका यतो ऽस्मत्स्वामी विजयदत्तो नाम शशकश्चन्द्रमण्डले निवसति। तत् प्रेष्यतां कश्चिन्मिथ्याद्दूतो यूथाधिपसकाशं। वक्तव्यं च यच्चन्द्रस्त्वामत्र ह्रद आगच्छन्तं निषेधयति। यतो ऽस्मत्परिग्रहो ऽस्य ह्रदस्य समन्तात् प्रतिवसति।

एवमभिहिते श्रद्धेयवचनात् कदाचिद्विरमति। अथान्ये प्रोचुः। यद्येवं तदस्त्यत्र लम्बकर्णो नाम शशकः। स च वचनरचनाचतुरो दूतकर्मज्ञः। स तत्र ह्रदे प्रेष्यतामिति। उक्तं च यतः।

साकारो निःस्पृहो वाग्मी नानाशास्त्रविचक्षणः।
परचित्तावगन्ता च राजपुरुष इष्यते ॥ ८४ ॥

अन्यच्च। यो मूर्खं लौल्यसम्पन्नं राजद्वारिकमाचरेत्।
मिथ्यावादं विशेषेण तस्य कार्यं न सिध्यति ॥ ८५ ॥

तदन्विष्यतां यद्यस्मद्वचनात् स यास्यति। अथान्ये प्रोचुः। अहो युक्तमुक्तं। नान्यो ऽस्ति कश्चिदुपायो ऽस्माकं जीवितस्य। तत् क्रियतां। लम्बकर्णो ऽन्विष्यन् नियुज्यतामिति। तथानुष्ठिते लम्बकर्णो ऽपि गजमार्गमासाद्य यूथपतिसहस्रैः परिवृतं गजेन्द्रं तस्यैव सरसो ऽभिमुखमायान्तं दृष्ट्वा चिन्तयामास। अशक्यो ऽनेनास्मद्विधानां समागमः। यत्कारणं स्पृशन्नपि गजो हन्तीत्युक्तमेवास्ति। तत् सर्वथाप्रधृष्यायां भूमौ सन्दर्शनमस्य प्रयच्छामि। इति विचिन्त्योच्चैस्तरमगम्यं स्थलमारुह्य तं यूथाधिपमुवाच। भो भो दुष्टगज किमेवं लीलया निःशङ्कितया परह्रदे ऽत्रागच्छसि। तन्निवर्त्यतामिति। तदाकर्ण्य विस्मितमना गज आह। भो कस्त्वं। स आह। अहं विजयदत्तो नाम शशकश्चन्द्रमण्डले निवासी। साम्प्रतं भगवता चन्द्रमसा तव पार्श्वे प्रहितो दूतः। जानात्येवं भवान् यथार्थवादिनो दूतस्य न दोषः करणीयः। दूतमुखा हि राजानः सर्व एव। उक्तं च।

उद्धृतेष्वपि शस्त्रेषु बन्धुवर्गबधेष्वपि।
परुषाण्यपि जल्पन्तो बध्या दूता न भूभुजा ॥ ८६ ॥

सो ऽहं भवन्तं चन्द्राज्ञया ब्रवीमि। कथं नाम प्राणिन आत्मानं परं चापरिच्छिद्य शक्तितः परापकारैर्वर्तन्त इति। उक्तं च यतः।

परेषामात्मनश्चैव यो ऽविचार्य बलाबलं।

कार्यायोत्तिष्ठते मोहादापदः स समीहते ॥ ८७ ॥

तच्छ्रुत्वा श्रद्धेयत्वात् तस्य वचनस्य गज आह। भो शशक तत् कथय भगवतश्चन्द्रस्य सन्देशं येन सत्वरं क्रियत इति। सो ऽब्रवीत्। भवतातीतदिवसे यूथेन सहागच्छता प्रभूताः शशका निपातिताः। तत् किं न वेत्ति भवान् यन्मम परिग्रहो ऽयं भयाल्लोके प्रख्यातनामास्मि शशाङ्क इति। तद्यदि जीवितेन प्रयोजनं तदा प्रयोजनेनापि त्वयात्र ह्रदे भूयो नागन्तव्यं। इति सन्देशः। तत् किं बहुना प्रलपितेन। यदि त्वमस्माद्व्यापारान्न निवर्तसे। ततो ऽस्मत्सकाशान्महान्तमनर्थं प्राप्स्यसीति। यदि त्वमद्यदिवसादारभ्य निवर्तसे तत् ते महान् विशेषो भविष्यति। यत्कारणमस्मदीयज्योत्स्नयाप्यायितशरीरः सपरिवारः सुखेनास्मिन् वने यथेष्टचेष्टं विहरिष्यसि। अन्यथास्मत्कृतरश्मिसंरोधाद्घर्मेण परितापितशरीरः सपरिवारो विनाशमेष्यसीति। तच्छ्रुत्वा हस्तिराजो ऽतीवक्षुभितहृदयश्चिरं विचिन्त्याब्रवीत्। भद्र सत्यं मयापकृतं भगवतश्चन्द्रमसः। सो ऽहमधुना तेन सह विरोधं न करिष्यामि। तदाशु दर्शय पन्थानं येनाहं गत्वा भगवन्तं क्षमयामि। शशको ऽब्रवीत्। आगच्छतु भवानेकको येनाहं तं दर्शयामि। गजः प्राह। अथ क्व वर्तते भगवान् स्वामी चन्द्रः साम्प्रतं। स त्वाह। नन्वत्र ह्रदे साम्प्रतं शशकानां युष्मद्यूथमथितानां हतशेषाणां समाश्वासनाय समायातस्तिष्ठति। अहं तवान्तिके पुनः प्रेषितः। गज आह। भो यद्येवं तद्दर्शय मे स्वामिनं येन प्रणम्यान्यत्र गच्छामि। शशक आह। भो समागच्छ मया सह त्वमेकाकी येन तेन सह दर्शनं करोषि। तथानुष्ठिते शशको निशागमे तं नीत्वा ह्रदतटे निधाय जलमध्ये चन्द्रबिम्बमदर्शयत्। आह च। एष नः स्वामी जलमध्ये समाधिस्थस्तिष्ठति। तं निभृतं प्रणम्य सत्वरं व्रज। नो चेत् समाधिभङ्गाद्भूयो ऽपि प्रभूतं तवोपरि कोपं करिष्यति। ततो गजो ऽपि हुङ्कारपूर्वं

जले शुण्डादण्डं प्रसारितवान्। अथ सङ्क्षुभितोदकवशादितश्चेतश्च चक्रारूढ इव भ्रमति चन्द्रमण्डले चन्द्रसहस्रमपश्यत्। अथ विजयदत्तः सुतरामुद्विग्नहृदयः प्रतिनिवृत्य हस्तिराजमब्रवीत्। देव कष्टं कष्टं भवता यद्द्विगुणं रोषितश्चन्द्रः। स आह। केन हेतुना भगवांश्चन्द्रो मयि प्रकुपितः। विजयदत्तो ऽब्रवीत्। स्पर्शनादस्य पानीयस्य। अथ तच्छ्रुत्वा संलीनकर्णो गजपतिरवनितलनतशिरसा प्रणम्य भगवन्तं चन्द्रमसं क्षमयामास। भूयश्च विजयदत्तं प्रत्याह। भद्र अशेषकार्येष्वपि मद्वचनाद्भगवांश्चन्द्रो ममोपरि प्रसादयितव्यः। न चाहं पुनरिहागमिष्यामि। अथ गजो ऽपि भयत्रस्तमनास्तं प्रणम्य पुनर्गमनाय प्रस्थितः। शशकाश्च तद्दिनादारभ्य सपरिवाराः सुखेन स्वेषु स्थानेषु तिष्ठन्ति। अतो ऽहं ब्रवीमि।

व्यपदेशेन महतां सिद्धिः सञ्जायते परा।
शशिनो व्यपदेशेन वसन्ति शशकाः सुखं ॥८८॥

अपि च क्षुद्रमलशङ्कापुरुषं व्यसनिनमकृतज्ञं पृष्ठप्रलपनशीलं स्वामित्वेन नाभियोजयेज्जीवितकामः। उक्तं च।

क्षुद्रमर्थपतिं प्राप्य न्यायान्वेषणतत्परौ।
उभावपि क्षयं प्राप्तौ पुरा शशकपिञ्जलौ ॥८९॥

ते पक्षिण ऊचुः। कथमेतत्। वायस आह। अस्ति कस्मिंश्चि कथा
द्वनोद्देशे महान्यग्रोधवृक्षे पुरा स्वयमहमवसं। तत्राधस्तात् कोटरे ॥२॥
कपिञ्जलो नाम चटकः प्रतिवसति स्म। अथ सदैवास्तमनवेलायामागतयोरनेकसुभाषितगोष्ठ्या देवर्षिराजर्षिब्रह्मर्षिपुराणचरितकीर्तनेन च पर्यटनदृष्टानेककुतूहलकथनेन च परमसुखमनुभवतोः कालो व्रजति। अथ कदाचित् कपिञ्जलः प्राणयात्रार्थमन्यैश्चटकैः सह पक्वशालिप्रायं देशं गतः। ततो यावन्निशासमये ऽपि नायातः। तावदहं सोद्वेगमनास्तद्वियोगदुःखितश्चिन्तितवान्। अहो किमद्य स कपिञ्जलो नायातः।

किं पाशेन केनापि बद्धः। उताहोस्वित् केनापि च व्यापादितः। सर्वथैव यदि कुशली भवति। तन्मां विना नो तिष्ठति। एवं मे चिन्तयतो बहूनि दिनान्यतिक्रान्तानि। ततश्च कदाचिच्छीघ्रगो नाम शशको ऽस्तमनवेलायामागत्य तस्मिन् कोटरे प्रविष्टः। मयापि कपिञ्जलनिराशित्वेन न निवारितः। अथान्यस्मिन्नहनि कपिञ्जलः शालिभक्षणादतीवपीवरतनुः स्वमाश्रयं स्मृत्वा भूयो ऽपि तत्रैव समायातः। अथवा साध्विदमुच्यते।

न तादृग्जायते सौख्यमपि स्वर्गे शरीरिणां।
दारिद्र्ये ऽपि हि यादृक् स्यात् स्वदेशे स्वपुरे गृहे॥१०॥

अथासौ वटकोटरान्तर्गतं शशकं दृष्ट्वा साक्षेपमिदमाह। भो शशक न त्वया सुन्दरं कृतं यन्ममावसथे प्रविष्टो ऽसि। तच्छीघ्रमपगम्यतां। शशक आह। मूर्ख न तवेदं गृहं किंतु ममैवं। तत् किं मिथ्या परुषाणि वचनानि प्रजल्पसि। तच्छीघ्रं व्रज। नो चेत् त्वं न भविष्यसि। चटको ऽब्रवीत्। यद्येवं तर्हि प्रातिवेश्यकाः पृच्छ्यन्तां। उक्तं च यतः।

वापीकूपतडागानां गृहस्योपवनस्य च।
सामन्तप्रत्ययात् सिद्धिरित्येवं मनुरब्रवीत्॥११॥

तथा च। गृहक्षेत्रविवादेषु कूपोपवनभूमिषु।
समुत्पन्ने विवादे तु सामन्तात् प्रत्ययो भवेत्॥१२॥

अथ शशक आह। मूर्ख किं न श्रुतं त्वया स्मृतिवचनं यदाह।

प्रत्यक्षं यस्य यद्भुक्तं क्षेत्राद्यं दश वत्सरान्।
तत्र भुक्तिः प्रमाणं स्यान्न साक्षी नाक्षराणि वा॥१३॥

तथा मूर्ख त्वया न श्रुतं नारदस्य मतं।

मानुषाणां प्रमाणं स्याद्भुक्तिर्वै दशवार्षिकी।
विहङ्गानां तिरश्चां च यावदेव समाश्रयः॥१४॥

तन्ममैतद्गृहं धर्मतो न तवेति। अथ। अथ कपिञ्जल आह। भो यदि स्मृतिं प्रमाणं करोषि। तदागच्छ मया सह येन स्मृतिपाठकं पृच्छावः। धर्मतो यस्य दास्यति गृहं स गृह्णातु। तथानुष्ठिते व्यवहारप्रत्ययार्थमभिप्रस्थितौ। मया च चिन्तितं। किमत्र भविष्यति। मयापि द्रष्टव्यो ऽयं न्यायः। ततः कौतुकादहमपि तावनु प्रस्थितः। अथ नातिदूरं गत्वा शशकः कपिञ्जलमपृच्छत्। भद्र को नामावयोर्व्यवहारं द्रक्ष्यति। सो ऽब्रवीत्। नन्वयं प्रबलमारुतोद्धूतसलिलचलतरङ्गसङ्घजनितकलकलारावाया भगवत्या गङ्गायाः पुलिनगतस्तपोनियमव्रतयोगसंस्थितः सर्वसत्त्वजातानुकम्पो दधिकर्णो नाम मार्जार इति। अथ दृष्ट्वा तं भयप्रणोदितान्तरात्मा शशकः पुनरब्रवीत्। अलमनेन क्षुद्रेण। उक्तं च।

न हि विश्वसनीयं स्यात् तपश्छद्मस्थिते ऽधमे।
दृश्यन्ते चैव तीर्थेषु गलवार्तास्तपस्विनः ॥ १५॥

एतस्मिन्नन्तरे दधिकर्णो नामारण्यमार्जारः स ताभ्यां कृतं विवादं श्रुत्वा तयोर्विश्वासनार्थं मार्गासन्ननदीतटमासाद्य कृतकुशपरिग्रहो द्वादशतिलकयुक्तो निमीलितैकनयन ऊर्ध्वबाहुरधःपादस्पृष्टभूमिः सूर्याभिमुख इमां धर्मोपदेशनामकरोत्। अहो असारो ऽयं संसारः। क्षणभङ्गुराः प्राणाः। स्वप्नसदृशाः+ प्रियसमागमाः। इन्द्रजालवत् कुटुम्बपरिग्रहः। तद्धर्मं मुक्त्वा नान्या गतिरस्ति। उक्तं च यतः।

अनित्यानि शरीराणि विभवो नैव च स्वतः।
नित्यं सन्निहितो मृत्युः कर्तव्यो धर्मसङ्ग्रहः ॥ १६॥
यस्य धर्मविहीनानि दिनान्यायान्ति यान्ति च।
स लोहकारभस्त्रेव श्वसन्नपि न जीवति ॥ १७॥

तथा च। नाच्छादयति कौपीनं न दंशमशकापहं।
शुनः पुच्छमिव व्यर्थं पाण्डित्यं धर्मवर्जितं ॥ १८॥

पुलका इव धान्येषु पूतिका इव पक्षिषु ।
मशका इव मर्त्येषु येषां धर्मो न कारणं ॥ ९९ ॥
श्रेयः पुष्पफलं वृक्षाद्दध्नः श्रेयो घृतं स्मृतं ।
श्रेयस्तैलं च पिण्याकाच्छ्रेयो धर्मश्च मानुषात् ॥ १०० ॥
सृष्टा मूत्रपुरीषार्थमाहाराय च केवलं ।
धर्महीनाः परार्थाय पुरुषाः पशवो यथा ॥ १०१ ॥
स्थैर्यं कृत्येषु सर्वेषु शंसन्ति नयपण्डिताः ।
बह्वन्तराययुक्तस्य धर्मस्य त्वरिता गतिः ॥ १०२ ॥
संक्षेपात् कथ्यते धर्मो जनाः किं विस्तरेण तु ।
परोपकारः पुण्याय पापाय परपीडनं ॥ १०३ ॥
श्रूयतां धर्मसर्वस्वं श्रुत्वा चैवावधार्यतां ।
आत्मनः प्रतिकूलानि परेषां न समाचरेत् ॥ १०४ ॥

अथ तस्य तां धर्मोपदेशनां श्रुत्वा शशक आह । भो भो कपिञ्जल एष नदीतीरे तपस्वी धर्मवादी तिष्ठति । तदेनं पृच्छावः । कपिञ्जल आह । ननु स्वभावतो ऽस्माकं शत्रुभूतो ऽस्ति । तद्दूरे स्थितौ पृच्छावः । कदाचिदस्य व्रतवैकल्यं सम्पद्यते । ततो दूरस्थितावूचतुः । भो भो तपस्विन् धर्मदेशक आवयोर्विवादो वर्तते । तद्धर्मशास्त्रद्वारेणास्माकं निर्णयं देहि । यो हीनवादी स ते भक्ष्य इति । सो ऽब्रवीत् । भद्रौ मा मैवं वदतं । निवृत्तो ऽहं नरकपातमार्गात् । अहिंसैव धर्ममार्गः । उक्तं च यतः ।

अहिंसा पूर्वको धर्मो यस्मात् सद्भिरुदाहृतः ।
यूकमत्कुणदंशादींस्तस्मात् तानपि रक्षयेत् ॥ १०५ ॥
हिंसकान्यपि भूतानि यो हिंसति स निर्घृणः ।
स याति नरकं घोरं किं पुनर्यः शुभानि च ॥ १०६ ॥

एते ऽपि ये यज्ञकर्मणि पशून् व्यापादयन्ति । ते ऽपि मुग्धाः । परमार्थं

च श्रुतेर्न जानन्ति। तत्र किलैतदुक्तं। अजैर्यष्टव्यमिति। तत्राजा व्रीहयस्त्रिवार्षिकाः सप्तवार्षिका वा कथ्यन्ते। ये तु पुनर्न जायन्त इति। उक्तं च। वृक्षांश्छित्वा पशून् हत्वा कृत्वा रुधिरकर्दमं।

यद्येवं गम्यते स्वर्गे नरके केन गम्यते ॥१०७॥

तन्नाहं भक्षयिष्यामि। परं जयपराजयनिर्णयं करिष्यामि। किन्त्वहं वृद्धो दूराद्युवयोर्भाषान्तरं सम्यङ्न शृणोमि। एवं ज्ञात्वा मम समीपवर्तिनौ भूत्वा ममाग्रे न्यायं वदतं। येन विज्ञाय विवादपरमार्थं वचो वदतो मे परलोकबाधो न भवति। उक्तं च यतः।

मानाद्वा यदि वा लोभात् क्रोधाद्वा यदि वा भयात्।
यो न्यायमन्यथा ब्रूते स याति नरकं नरः ॥१०८॥
पञ्च पश्वनृते हन्ति दश हन्ति गवानृते।
शतं कन्यानृते हन्ति सहस्रं पुरुषानृते ॥१०९॥
उपविष्टः सभामध्ये यो न वक्ति स्फुटं वचः।
तस्माद्दूरेण स त्याज्यो न्यायो वा कीर्तयेदृतं ॥११०॥

तस्माद्विश्रब्धौ मम कर्णोपान्तिके स्फुटं निवेदयतं। किं बहुना। तेन क्षुद्रेण तथा तौ तूर्णं विश्वासितौ। यथा तस्योत्सङ्गवर्तिनौ सञ्जातौ। ततश्च तेनापि समकालमेवैकः पादान्तेनाक्रान्तः। अन्यो दंष्ट्राक्रकचेन च। ततो गतप्राणौ भक्षिताविति। अतो ऽहं ब्रवीमि।

क्षुद्रमर्थपतिं प्राप्य न्यायान्वेषणतत्परौ।
उभावपि क्षयं प्राप्तौ पुरा शशकपिञ्जलौ ॥१११॥

भवन्तो ऽप्येनं दिवान्धं क्षुद्रमर्थपतिमासाद्य रात्र्यन्धाः सन्तः शशकपिञ्जलमार्गेण यास्यन्ति। एवं ज्ञात्वा यदुचितं तद्विधेयमतः परं। अथ तस्य तद्वचनमाकर्ण्य साधनेनाभिहितमित्युक्त्वा। भूयो ऽपि पार्थिवार्थं समेत्य मन्त्रयिष्यामह इति ब्रुवाणाः सर्वे पक्षिणो यथाभिमतं जग्मुः। केवलमवशिष्टो भद्रासनोपविष्टो ऽभिषेकाभिमुखो दिवान्धः कृकालि

कया सहास्ते। आह च। कः को ऽत्र। भो भो किमद्यापि न क्रियते ममाभिषेकः। इति श्रुत्वा कृकालियाभिहितं। भद्र तवाभिषेके कृतो ऽयं विघ्नो वायसेन। गताश्च सर्वे ऽपि विहगा यथेप्सितासु दिक्षु। केवलमेको ऽयं वायसो ऽवशिष्टः केनापि हेतुना तिष्ठति। तत् त्वरितमुत्तिष्ठ येन त्वां स्वाश्रयं प्रापयामि। तच्छ्रुत्वा सविषादमुलूको वायसं प्राह। भो भो दुष्टात्मन् किं मया ते ऽपकृतं। यद्राज्याभिषेको मे विघ्नितः। तदद्य प्रभृति सान्वयमावयोर्वैरं सञ्जातं। उक्तं च।

रोहति सायकैर्विद्धं छिन्नं रोहति चासिना।
वचो दुरुक्तं बीभत्सं न प्ररोहति वाक्क्षतं ॥११२॥

इत्येवमभिधाय कृकालिकया सह स्वाश्रयं गतः। अथ भयव्याकुलो वायसो व्यचिन्तयत्। अहो अकारणं वैरमासादितं मया। किमिदं व्याहृतं। उक्तं च यतः।

अदेशकालज्ञमनायतिक्षमं यदप्रियं लाघवकारि चात्मनः।
यो ऽत्राब्रवीत् कारणवर्जितं वचो न तद्वचः स्याद्विषमेव तद्वचः॥

तथा च।

बलोपपन्नो ऽपि हि बुद्धिमान् नरः परं नयेन्न स्वयमेव वैरितां।
भिषङ्ममास्तीति विचिन्त्य भक्षयेदकारणात् को हि विचक्षणो विषं॥
परपरिवादः परिषदि न कथञ्चित् पण्डितेन वक्तव्यः।
सत्यमपि तन्न वाच्यं यदुक्तमसुखावहं भवति ॥११५॥
सुहृद्भिराप्तैरसकृद्विचारितं स्वयं च बुद्ध्या प्रविचारिताश्रयं।
करोति कार्यं खलु यः स बुद्धिमान् स एव लक्ष्म्या यशसां च भाजनं॥

एवं विचिन्त्य काको ऽपि प्रयातः। तदा प्रभृत्यस्माभिः सह कौशिकानामन्वयगतं वैरमस्ति। मेघवर्ण आह। तात एवं गते ऽस्माभिः किं कृत्यमस्ति। स आह। वत्स एवं गते ऽपि षाड्गुण्यादपरः स्थूलो ऽभि प्रायो ऽस्ति। तमङ्गीकृत्य स्वयमेवाहं तद्विजयाय यास्यामि।

रिपून् वञ्चयित्वा बधिष्यामि। उक्तं च यतः।

बहुबुद्धिसमायुक्ताः सुविज्ञाना बलोत्कटान्।
शक्ता वञ्चयितुं धूर्ता ब्राह्मणं छागलादिव ॥११७॥

मेघवर्ण आह। कथमेतत्। सो ऽब्रवीत्।

कथा ॥३॥

अस्ति कस्मिंश्चिदधिष्ठाने मित्रशर्मा नाम ब्राह्मणः कृताग्निहोत्रपरिग्रहः प्रतिवसति स्म। स कदाचिन्माघमासे सौम्यानिले प्रवाति मेघाच्छादिते गगणे मन्दं मन्दं प्रवर्षति पर्जन्ये पशुप्रार्थनाय किंचिद्ग्रामान्तरं गतः। कंचिद्यजमानो याचितः। भो यजमान आगामिन्याममावास्यायामहं यक्ष्यामि यज्ञं। तद्देहि मे पशुमेकं। अथ तेन तस्य शास्त्रोक्तः पीवरतनुः पशुः प्रदत्तः। सो ऽपि तं समर्थमितश्चेतश्च गच्छन्तं विज्ञाय स्कन्धे कृत्वा सत्वरं स्वपुराभिमुखः प्रतस्थे। अथ तस्य गच्छतो मार्गे त्रयो धूर्ताः क्षुत्क्षामकण्ठाः सम्मुखा बभूवुः। तैश्च तादृशं पीवरतनुं पशुं स्कन्धआरूढमवलोक्य मिथो ऽभिहितं। अहो अस्य पशोर्भक्षणादद्यतनीयो हिमपातो व्यर्थतां नीयते। तदेनं वञ्चयित्वा पशुमादाय शीतत्राणं कुर्मः। अथ तेषामेकतमो वेषपरिवर्तनं विधाय सम्मुखो भूत्वापमार्गेण तमाहिताग्निमूचे। भो भो बालाग्निहोत्रिन् किमेवं जनविरुद्धं हास्यकार्यमनुष्ठीयते। यदेष सारमेयो ऽपवित्रः स्कन्धाधिरूढो नीयते। उक्तं च यतः।

श्वानकुर्कुटचाण्डालाः समस्पर्शाः प्रकीर्तिताः।
रासभोष्ट्रौ विशेषेण तस्मात् तान्नैव संस्पृशेत् ॥११८॥

ततश्च तेन कोपाभिभूतेनाभिहितं। अहो किमन्धो भवान्। यत् पशुं सारमेयं प्रतिपादयसि। सो ऽब्रवीत्। ब्रह्मन् कोपस्त्वया न कार्यः। यथेच्छया गम्यतामिति। अथ यावत् किंचिदध्वनो ऽन्तरं गच्छति। तावद्द्वितीयो धूर्तः सम्मुखः समुपेत्य तमुवाच। भो ब्रह्मन् कष्टं कष्टं। यद्यपि वल्लभो ऽयं ते मृतवत्सः। तथापि स्कन्धमारोपयितुम्

युक्तं। उक्तं च यतः।

तिर्यञ्चं मानुषं वापि यो मृतं संस्पृशेत् कुधीः।
पञ्चगव्येन शुद्धिः स्यात् तस्य चन्द्रायणेन च ॥११९॥

अथासौ सकोपमिदमाह। भोः किमन्धो भवान्। यत् पशुं मृतवत्सं वदसि। सो ऽब्रवीत्। भगवन् मा कोपं कुरु। अज्ञानान्मयाभिहितं। तत् त्वमात्मरुचिरं समाचरेति। अथ यावत् स्तोकं वनान्तरं गच्छति। तावत् तृतीयो ऽन्यवेषधारी धूर्तः सम्मुखः समुपेत्य तमुवाच। भो अयुक्तमेतत्। यत् त्वं रासभं स्कन्धाधिरूढं नयसि। तत् त्यज्यतामेषः। उक्तं च। यः स्पृशेद्रासभं मर्त्यो ज्ञानादज्ञानतो ऽपि वा।

सचैलं स्नानमुद्दिष्टं तस्य पापप्रशान्तये ॥१२०॥

तत् त्यजैनं यावदन्यः कश्चिन्न पश्यति। अथासौ तं पशुं रासभं मन्यमानो भयाद्भूमौ प्रक्षिप्य स्वगृहमुद्दिश्य प्रपलायितः। ततस्ते त्रयो मिलित्वा तं पशुमादाय यथेच्छया भक्षितुमारब्धाः। अतो ऽहं ब्रवीमि।

बहुबुद्धिसमायुक्ताः सुविज्ञाना बलोत्कटान्।
शक्ता वञ्चयितुं धूर्ता ब्राह्मणं छागलादिव ॥१२१॥

अथवा साध्विदमुच्यते।

अभिनवसेवकविनयैः प्राघुणकोक्तैर्विलासिनीरुदितैः।
धूर्तजनवचननिकरैरिह कश्चिदवञ्चितो नास्ति ॥१२२॥

किञ्च दुर्बलैरपि बहुभिः सह विरोधो न युक्तः। उक्तं च।

बहवो न विरोद्धव्या दुर्जया हि महाजनाः।
स्फुरन्तमपि नागेन्द्रं भक्षयन्ति पिपीलिकाः ॥१२३॥

कथा ॥४॥ मेघवर्ण आह। कथमेतत्। स्थिरजीवी कथयति। अस्ति कस्मिंश्चिद्वल्मीके महाकायः कृष्णसर्पो ऽतिदर्पो नाम। स कदाचिद्बिलानुसारमार्गमुत्सृज्यान्येन लघुद्वारेण निष्क्रमितुमारब्धः। निष्क्रामतश्च तस्य महाकायत्वाद्दैववशतया लघुविवरत्वाच्च शरीरे व्रणः समुत्पन्नः।

अथ व्रणशोणितगन्धानुसारिणीभिः पिपीलिकाभिः सर्वतो व्याप्तो व्याकुलीकृतश्च। कति व्यापादयति कति वा ताडयति। अथ प्रभूतत्वाद्विस्तारितबहुव्रणाभिः क्षतसर्वाङ्गो ऽतिदर्पः पञ्चत्वमुपागतः। अतो ऽहं ब्रवीमि।

बहवो न विरोद्धव्या दुर्जया हि महाजनाः।
स्फुरन्तमपि नागेन्द्रं भक्षयन्ति पिपीलिकाः ॥१२४॥

तदत्रास्ति किंचिन्मे वक्तव्यमेव। तदवधार्य यथोक्तमनुष्ठीयतां। मेघवर्ण आह। तत् समादेशय। त्वदादेशो नान्यथा कर्तव्यः। स्थिरजीवी प्राह। वत्स समाकर्णय तर्हि सामादीनतिक्रम्य यो मया पञ्चम उपायो निरूपितः। तन्मां विपक्षभूतं कृत्वा। अतिनिष्ठुरवचनैर्निर्भर्त्स्य। यथा विपक्षप्रणिधीनां प्रत्ययो भवति। तथा समाहृतरुधिरैरालिप्य। अस्यैव न्यग्रोधस्याधस्तात् प्रक्षिप्य मां। गम्यतां पर्वतं ऋष्यमूकं प्रति। तत्र सपरिवारस्तिष्ठ। यावदहं समस्तान् सपत्नान् सुप्रणीतेन विधिना विश्वास्याभिमुखान् कृत्वा। कृतार्थो ज्ञातदुर्गमध्यः दिवसे तानन्धतां प्राप्तान् ज्ञात्वा व्यापादयामि। ज्ञातं मया सम्यक्। नान्यथास्माकं सिद्धिरिति। यतो दुर्गमेतदपसाररहितं केवलं बधाय भविष्यति। उक्तं च यतः।

अपसारसमायुक्तं नयज्ञैर्दुर्गमुच्यते।
अपसारपरित्यक्तं दुर्गव्याजेन बन्धनं ॥१२५॥

न च त्वया मदर्थे कृपा कार्या। उक्तं च।

अपि प्राणसमानिष्टान् पालितान् लालितानपि।
भृत्यान् युद्धे समुत्पन्ने पश्येच्छुष्कमिवेन्धनं ॥१२६॥

तथा च। प्राणवद्रक्षयेद्भृत्यान् स्वकायमिव पोषयेत्।
सदैकदिवसस्यार्थे यत्र स्याद्रिपुसङ्गमः ॥१२७॥

तत् त्वयाहं नात्रविषये प्रतिषेधनीयः। इत्युक्त्वा तेन सह शुष्ककलहं

कर्तुमारब्धः। अथान्ये तस्य भृत्याः स्थिरजीविनमुच्छृङ्खलवचनैर्जल्पन्तमवलोक्य तस्य बधायोद्यता मेघवर्णेनाभिहिताः। अहो निवर्तध्वं यूयं। अहमेवास्य शत्रुपक्षपातिनो दुरात्मनः स्वयं निग्रहं करिष्यामि। इत्यभिधाय तस्योपरि समारुह्य। लघुभिश्चञ्चुप्रहारैस्तं प्रहृत्य। आह तद्रुधिरेण प्लावयित्वा। तदुपदिष्टं ऋष्यमूकपर्वतं सपरिवारो गतः। एतस्मिन्नन्तरे कृकालिकया द्विषत्प्रणिधीभूतया तत् सर्वं मेघवर्णस्यामात्यस्य व्यसनमुलूकराज्ञो निवेदितं। यत् तवारिः सम्प्रति भीतः क्वचित् प्रचलितः सपरिवार इति। अथोलूकाधिपस्तदाकर्ण्यास्तमनवेलायां सामात्यः सपरिजनो वायसबधार्थं प्रचलितः। प्राह च। त्वर्यतां त्वर्यतां। भीतः शत्रुः पलायनपरः पुण्यैर्लभ्यते। उक्तं च।

शत्रोः प्रचलने छिद्रमेकमन्यच्च संश्रयं।
कुर्वाणो जायते वश्यो व्यग्रत्वे राजसेविनां॥१२८॥

एवं ब्रुवाणः समन्तान्न्यग्रोधपादपमधः परिवेष्ट्य व्यवस्थितः। यावन्न कश्चिद्वायसो दृश्यते। तावच्छाखाग्रमधिरूढो हृष्टमना वन्दिभिरभिष्टूयमानो ऽरिमर्दनस्तान् परिजनां प्रोवाच। अहो ज्ञायतां तेषां मार्गः। कतमेन मार्गेण प्रनष्टाः काकाः। तद्यावन्न दुर्गं समाश्रयन्ति। तावदेव पृष्ठतो गत्वा व्यापादयामि। उक्तं च।

वृतिमप्याश्रितः शत्रुर्बध्यः स्याज्जिगीषुणा।
किं पुनः संश्रितो दुर्गं सामग्र्या परया युतं॥१२९॥

अथैतस्मिन् प्रस्तावे स्थिरजीवी चिन्तयामास। यद्येते ऽस्मच्छत्रवो ऽनुपलब्धास्मद्वृत्तान्ता यथागतमेव यान्ति। ततो मया न किञ्चित् कृतं भवति। उक्तं च।

अनारम्भो हि कार्याणां प्रथमं बुद्धिलक्षणं।
प्रारब्धस्यान्तगमनं द्वितीयं बुद्धिलक्षणं॥१३०॥

तद्वरमनारम्भो न चारम्भविघातः। तदहमेतान् शब्दं संश्राव्यात्मानं

दर्शयामीति विचार्य मन्दं मन्दं शब्दमकरोत्। तच्छ्रुत्वा ते सकला उलूकास्तद्वधाय प्रजग्मुः। अथ तेनोक्तं। अहो अहं स्थिरजीवी नाम मेघवर्णस्य मन्त्री। मेघवर्णेनैवेदृशीमवस्थां नीतः। तन्निवेदयतात्मस्वाम्यग्रे। तेन सह बहु वक्तव्यमस्ति। अथ तैर्निवेदिते स उलूकराजो विस्मयाविष्टस्तत्क्षणात् तस्य सकाशं गत्वा प्रोवाच। भो भो किमेतां दशां गतस्त्वं। तत् कथ्यतां। स्थिरजीवी प्राह। देव श्रूयतां तदवस्थाकारणं। अतीतदिने स दुरात्मा मेघवर्णो युष्मद्व्यापादितप्रभूतवायसानां पीडया युष्माकमुपरि कोपशोकग्रस्तो युद्धार्थं प्रचलित आसीत्। ततो मयाभिहितं। स्वामिन् न युक्तं भवतस्तदुपरि गन्तुं। बलवन्त एते बलहीनाश्च वयं। उक्तं च।

बलीयसा हीनबलो विरोधं न भूतिकामो मनसापि वाञ्छेत्।
न बध्यते ऽत्यन्तबलो हि यस्माद्व्यक्तं प्रणाशो ऽस्ति पतङ्गवृत्तेः ॥

तत् तस्योपप्रदानेन सन्धिरेव युक्तः। उक्तं च।

बलवन्तं रिपुं दृष्ट्वा सर्वस्वमपि बुद्धिमान्।
दत्त्वा हि रक्षयेत् प्राणान् रक्षितैस्तैर्धनं पुनः ॥१३२॥

तच्छ्रुत्वा तेन दुर्जनप्रकोपितेन त्वत्पक्षपातिनं मामाशङ्कमानेनेमां दशां नीतः। तत् तव पादौ साम्प्रतं मे शरणं। किं बहुना विज्ञप्तेन। यावदहं प्रचलितुं शक्नोमि। तावत् त्वां तस्यावासे नीत्वा सर्ववायसक्षयं विधास्यामीति। अथारिमर्दनस्तदाकर्ण्य पितृपितामहक्रमागतमन्त्रिभिः सार्धं मन्त्रयां चक्रे। तस्य च पञ्च मन्त्रिणः। तद्यथा रक्ताक्षः क्रूराक्षो दीप्ताक्षो वक्रनासः प्राकारकर्णश्चेति। तत्रादौ रक्ताक्षमपृच्छत्। भद्र एष तावत् तस्य रिपोर्मन्त्री मम हस्तगतः। तत् किं क्रियतामिति। रक्ताक्ष आह। देव किमत्र चिन्त्यते। अविचारितमयं हन्तव्यः। यतः

हीनः शत्रुर्निहन्तव्यो यावन्न बलवान् भवेत्।
प्राप्तस्वपौरुषबलः पश्चाद्भवति दुर्जयः ॥१३३॥

किञ्च स्वयमुपागता श्रीस्त्यज्यमाना शपतीति लोके प्रवादः। उक्तं च।

कालो हि सकृदभ्येति यन्नरं कालकाङ्क्षिणं।
दुर्लभः स पुनस्तेन कालकर्मचिकीर्षता ॥१३४॥

श्रूयते च यथा।

चितिकां दीपितां पश्य स्फुटां भग्नां ममैव च।
भिन्नश्लिष्टा तु या प्रीतिर्न सा स्नेहेन वर्धते ॥१३५॥

कथा अरिमर्दनः प्राह। कथमेतत्। रक्ताक्षः कथयति। अस्ति कस्मिं
॥५॥ श्चिदधिष्ठाने हरिदत्तो नाम ब्राह्मणः। तस्य च कृषिं कुर्वतः सदैव
निष्फलः कालो ऽतिवर्तते। अथैकस्मिन् दिवसे स ब्राह्मण उष्णकालावसाने घर्मार्त्तः स्वक्षेत्रमध्ये वृक्षच्छायायां प्रसुप्तः। अनतिदूरे वल्मीको परिप्रसारितं बृहत्फुटाटोपं भीषणं भुजङ्गमं दृष्ट्वा चिन्तयामास। नूनमेषा क्षेत्रदेवता मया कदाचिदपि न पूजिता। तेनेदं मे कृषिकर्म विफलीभवति। तदस्या अहं पूजामद्य करिष्यामीत्यवधार्य कुतो ऽपि क्षीरं याचित्वा। शरावे निक्षिप्य। वल्मीकान्तिकमुपागम्योवाच। भो क्षेत्रपाल मयैतावन्तं कालं न ज्ञातं यत् त्वमत्र वससि। तेन पूजा न कृता। तत् साम्प्रतं क्षमस्वेत्येवमुक्त्वा। दुग्धं च निवेद्य। गृहाभिमुखं प्रायात्। अथ प्रातर्यावदागत्य पश्यति। तावद्दीनारमेकं शरावे दृष्टवान्। एवं च प्रतिदिनमेकाकी समागत्य तस्मै क्षीरं ददाति। एकैकं च दीनारं गृह्णाति। अथैकस्मिन् दिवसे वल्मीके क्षीरनयनाय पुत्रं निरूप्य ब्राह्मणो ग्रामं जगाम। पुत्रो ऽपि क्षीरं तत्र नीत्वा संस्थाप्य च पुनर्गृहं समायातः। दिनान्तरे तत्र गत्वा दीनारमेकं च दृष्ट्वा गृहीत्वा च चिन्तितवान्। नूनं सौवर्णदीनारपूर्णो ऽयं वल्मीकः। तदेनं हत्वा सर्वमेकवारं ग्रहीष्यामीत्येवं सम्प्रधार्यान्येद्युः क्षीरं ददता ब्राह्मणपुत्रेण सर्पो लगुडेन शिरसि ताडितः। ततः कथमपि दैववशादमुक्तजीवित एव रोषात् तमेव तीव्रविषदशनैस्तथादशत्।

यथा सद्यः पञ्चत्वमुपागतः। स्वजनैश्च नातिदूरे क्षेत्रस्य काष्ठसञ्चयैः संस्कृतः। अथ द्वितीयदिने तस्य पिता समायातः। स्वजनेभ्यः सुत विनाशकारणं श्रुत्वा तथैव समर्थितवान्। अब्रवीच्च।

भूतान् यो नानुगृह्णाति ह्यात्मनः शरणागतान्।
भूतार्थास्तस्य नश्यन्ति हंसाः पद्मवने यथा ॥१३६॥

पुरुषैरुक्तं। कथमेतत्। ब्राह्मणः कथयति। अस्ति कस्मिंश्चिद् कथा
धिष्ठाने चित्ररथो नाम राजा। तस्य योधैः सुरक्ष्यमानं पद्मसरो नाम ॥६॥
सरस्तिष्ठति। तत्र च प्रभूता जाम्बूनदमया हंसास्तिष्ठन्ति। षण्मासे षण्मासे पिच्छमेकैकं परित्यजन्ति। अथ तत्र सरसि सौवर्णो वृहत्पक्षी समायातः। तैश्चोक्तः। अस्माकं मध्ये त्वया न वर्तव्यं। येन कारणे नास्माभिः षन्मासान्ते पिच्छैकैकदानं कृत्वा गृहीतमेतत् सरः। एवं च किं बहुना परस्परं द्वैधमुत्पन्नं। स च राज्ञः शरणं गतो ऽब्रवीत्। देव एते पक्षिण एवं वदन्ति। यदस्माकं राजा किं करिष्यति। न कस्याप्यावासं दद्मः। मया चोक्तं। न शोभनं युष्माभिरभिहितं। अहं गत्वा राज्ञे निवेदयिष्यामि। एवं स्थिते देवः प्रमाणं। ततो राजा भृत्यानब्रवीत्। भो भो गच्छत। सर्वान् पक्षिणो गतासून् कृत्वा शीघ्रमानयत। राजादेशानन्तरमेव प्रचेतुस्ते। अथ लगुडहस्तान् राज पुरुषान् दृष्ट्वा तत्रैकेन पक्षिणा वृद्धेनोक्तं। भो स्वजना न शोभनमा पतितं। ततः सर्वैरेकमतीभूय शीघ्रमुत्पतितव्यं। तैश्च तथानुष्ठितं। अतो ऽहं ब्रवीमि।

भूतान् यो नानुगृह्णाति ह्यात्मनः शरणागतान्।
भूतार्थास्तस्य नश्यन्ति हंसाः पद्मवने यथा ॥१३७॥

इत्युक्त्वा पुनरपि ब्राह्मणः प्रत्यूषे क्षीरं गृहीत्वा। तत्र गत्वा तारस्व रेण सर्पमस्तौत्। तदा सर्पश्चिरं वल्मीकद्वारान्तर्लीन एव ब्राह्मणं प्रत्युवाच। त्वं लोभादत्रागतः पुत्रशोकमपि विहाय। इतः परं तव

मम च प्रीतिर्नोचिता। तव पुत्रेण यौवनोन्मदेनाहं ताडितः। मया स दष्टः। कथं मया लगुडप्रहारो विस्मर्तव्यः। त्वया च पुत्रशोकदुःखं कथं विस्मर्तव्यं। इत्युक्त्वा बहुमूल्यं हारकमणिं तस्मै दत्त्वा सूतः। परं पुनस्त्वया नागन्तव्यमिति पुनरुक्त्वा विवरान्तर्गतः। ब्राह्मणश्च मणिं गृहीत्वा पुत्रबुद्धिं निन्दन् स्वगृहमागतः। अतो ऽहं ब्रवीमि।

चितिकां दीपितां पश्य स्फुटां भग्नां ममैव च।
भिन्नश्लिष्टा तु या प्रीतिर्न सा स्नेहेन वर्धते ॥१३८॥

तदस्मिन् हते यत्नादेव राज्यमकण्टकं भवतो भवति। तस्यैतद्वचनं श्रुत्वा क्रूराक्षं पप्रच्छ। भद्र त्वं तु किं मन्यसे। सो ऽब्रवीत्। देव निर्दयमेतत्। यदनेनाभिहितं। यत्कारणं शरणागतो न बध्यते। सुष्ठु खल्विदमाख्यातं।

श्रूयते हि कपोतेन शत्रुः शरणमागतः।
पूजितश्च यथान्यायं स्वैश्च मांसैर्निमन्त्रितः ॥१३९॥

अरिमर्दनो ऽब्रवीत्। कथमेतत्। क्रूराक्षः कथयति।

कथा ॥७॥

कश्चित् क्षुद्रसमाचारः प्राणिनां कालसन्निभः।
विचचार महारण्ये घोरः शकुनिलुब्धकः ॥१४०॥
नैव कश्चित् सुहृत् तस्य न सम्बन्धी न बान्धवः।
स तैः सर्वैः परित्यक्तस्तेन रौद्रेण कर्मणा ॥१४१॥

अथवा। ये नृशंसा दुरात्मानः प्राणिनां प्राणनाशकाः।
उद्वेजनीया भूतानां व्याला इव भवन्ति ते ॥१४२॥
स पञ्जरकमादाय पाशं च लगुडं तथा।
नित्यमेव वनं याति सर्वप्राणिविहिंसकः ॥१४३॥
अन्येद्युर्भ्रमतस्तस्य वने क्वापि कपोतिका।
ज्ञाता हस्तगता तां स प्राक्षिपत् पञ्जरान्तरे ॥१४४॥
अथ कृष्णा दिशः सर्वा वनस्थस्याभवन् घनैः।

वातवृष्टिश्च महती क्षयकाल इवाभवत् ॥ १४५ ॥
ततः सन्त्रस्तहृदयः कम्पमानो मुहुर्मुहुः ।
अन्वेषयन् परित्राणमाससाद वनस्पतिं ॥ १४६ ॥
मुहूर्तं पश्यते यावद्वियद्विमलतारकं ।
प्राप्य वृक्षं वदत्येव यो ऽत्र तिष्ठति कश्चन ॥ १४७ ॥
तस्याहं शरणं प्राप्तः स परित्रातु मामिति ।
शीतेन भिद्यमानं च क्षुधया गतचेतसं ॥ १४८ ॥
अथ तस्य तरोः स्कन्धे कपोतः सुचिरोषितः ।
भार्याविरहितस्तिष्ठन् विललाप सुदुःखितः ॥ १४९ ॥
वातवर्षो महानासीन्न चागच्छति मे प्रिया ।
तया विरहितं ह्येतच्छून्यमद्य गृहं मम ॥ १५० ॥
पतिव्रता पतिप्राणा पत्युः प्रियहिते रता ।
यस्य स्यादीदृशी भार्या धन्यः स पुरुषो भुवि ॥ १५१ ॥
न गृहं गृहमित्याहुर्गृहिणी गृहमुच्यते ।
गृहं हि गृहिणीहीनमरण्यसदृशं मतं ॥ १५२ ॥
पञ्जरस्था ततः श्रुत्वा भर्तुर्दुःखान्वितं वचः ।
कपोतिका सुसन्तुष्टा वाक्यं चेदमथाह सा ॥ १५३ ॥
न सा स्त्रीत्यभिमन्तव्या यस्यां भर्ता न तुष्यति ।
तुष्टे भर्तरि नारीणां तुष्टाः स्युः सर्वा देवताः ॥ १५४ ॥
दावाग्निनेव विदग्धा सपुष्पस्तवकालता ।
भस्मीभवतु सा नारी यस्यां भर्ता न तुष्यति ॥ १५५ ॥
मितं ददाति हि पिता मितं भ्राता मितं सुतः ।
अमितस्य हि दातारं भर्तारं का न पूजयेत् ॥ १५६ ॥

पुनश्चाब्रवीत् ।

शृणुष्वावहित कान्त यत् ते वक्ष्याम्यहं हितं ।

प्राणैरपि त्वया नित्यं संरक्ष्यः शरणागतः ॥१५७॥
एष शाकुनिकः शेते तवावासं समाश्रितः ।
शीतार्तश्च क्षुधार्तश्च पूजामस्मै समाचर ॥१५८॥
श्रूयते च। यः सायमतिथिं प्राप्तं यथाशक्ति न पूजयेत् ।
तस्यासौ दुःकृतं दत्वा सुकृतं चापकर्षति ॥१५९॥
मा चास्मै त्वं कृथा द्वेषं बद्धानेनेति मत्प्रिया ।
स्वकृतैरेव बद्धाहं प्राक्तनकर्मबन्धनैः ॥१६०॥
यतः। दारिद्र्यरोगदुःखानि बन्धनव्यसनानि च ।
आत्मापराधवृक्षस्य फलान्येतानि देहिनां ॥१६१॥
तस्मात् त्वं द्वेषमुत्सृज्य मद्बन्धनसमुद्भवं ।
धर्मे मनः समाधाय पूजयैनं यथाविधि ॥१६२॥
तस्य तद्वचनं श्रुत्वा धर्मयुक्तिसमन्वितं ।
उपगम्य ततो ऽधृष्टः कपोतः प्राह लुब्धकं ॥१६३॥
भद्र सुखागतं ते ऽस्तु ब्रूहि किं करवाणि ते ।
सन्तापश्च न कर्तव्यः स्वगृहे वर्तते भवान् ॥१६४॥
तस्य तद्वचनं श्रुत्वा प्रत्युवाच विहङ्गमं ।
कपोत खलु शीतं मे हिमत्राणं विधीयतां ॥१६५॥
स गत्वाङ्गारकं नीत्वा पातयामास पावकं ।
ततः शुष्केषु पर्णेषु तमाशु समदीपयत् ॥१६६॥
सुसन्दीप्तं ततः कृत्वा तमाह शरणागतं ।
प्रतापयस्व विश्रब्धं स्वगात्राण्यत्र निर्भयः ।
न चास्ति विभवः कश्चिन्नाशये येन ते क्षुधं ॥१६७॥
सहस्रं भरते कश्चिच्छतमन्यो दशापरः ।
मम त्वकृतपुण्यस्य क्षुद्रस्यात्मापि दुर्भरः ॥१६८॥
एकस्याप्यतिथेरन्नं यः प्रदातुं न शक्तिमान् ।

तस्यानेकपरिक्लेशे गृहे किं वसतः फलं ॥१६९॥
तत् तथा साधयाम्येतच्छरीरं दुःखजीवितं ।
यथा भूयो न वक्ष्यामि नास्तीत्यर्थिसमागमे ॥१७०॥
स निनिन्द किलात्मानं न तु तं लुब्धकं पुनः ।
उवाच तर्पयिष्ये त्वां मुहूर्तं प्रतिपालय ॥१७१॥
एवमुक्त्वा स धर्मात्मा प्रहृष्टेनान्तरात्मना ।
तमग्निं सम्परिक्रम्य प्रविवेश स्ववेश्मवत् ॥१७२॥
ततस्तं लुब्धको दृष्ट्वा कृपया पीडितो भृशं ।
कपोतमग्नौ पतितं वाक्यमेतदभाषत ॥१७३॥
यः करोति नरः पापं न तस्यात्मा ध्रुवं प्रियः ।
आत्मना हि कृतं पापमात्मनैव हि भुज्यते ॥१७४॥
सो ऽहं पापमतिश्चैव पापकर्मरतः सदा ।
पतिष्यामि महाघोरे नरके नात्र संशयः ॥१७५॥
नूनं मम नृशंसस्य प्रत्यादर्शः सुदर्शितः ।
प्रयच्छता स्वांसानि कपोतेन महात्मना ॥१७६॥
अद्य प्रभृति देहं स्वं सर्वभोगविवर्जितं ।
तोयं स्वल्पमिव ग्रीष्मे शोषयिष्याम्यहं ॥१७७॥
शीतवातातपसहः कृशाङ्गो मलिनस्तथा ।
उपवासैर्बहुविधैश्चरिष्ये धर्ममुत्तमं ॥१७८॥
ततो यष्टिं शलाकां च जालकं पञ्जरं तथा ।
बभञ्ज लुब्धको दीनां कपोतीं च मुमोच तां ॥१७९॥
लुब्धकेन ततो मुक्ता दृष्ट्वाग्नौ पतितं पतिं ।
कपोती विललापार्ता शोकसन्तप्तमानसा ॥१८०॥
न कार्यमद्य मे नाथ जीवितेन त्वया विना ।
दीनायाः परिहीणायाः किं नार्या जीविते फलं ॥१८१॥

मनोदर्पस्त्वहङ्कारः कुलपूजा च बन्धुषु ।
दासभृत्यजनेष्वाज्ञा वैधव्येन प्रणश्यति ॥ १८२ ॥
एवं विलप्य बहुशः कृपणं भृशदुःखिता ।
पतिव्रता सुसन्दीप्तं तमेवाग्निं विवेश सा ॥ १८३ ॥
ततो दिव्याम्बरधरा दिव्याभरणभूषिता ।
भर्तारं सा विमानस्थं ददर्श स्वं कपोतिका ॥ १८४ ॥
सो ऽपि दिव्यतनुर्भूत्वा यथार्थमिदमब्रवीत् ।
अहो मामनुगच्छन्त्या कृतं साधु शुभे त्वया ॥ १८५ ॥
तिस्रः कोट्यो ऽर्धकोटी च यानि रोमाणि मानुषे ।
तावत् कालं वसेत् स्वर्गे भर्तारं यानुगच्छति ॥ १८६ ॥
कपोतदेवः सूर्यास्तंप्रत्यहं सुखमन्वभूत् ।
सा खं सौरं कपोतस्य प्राक्पुण्यप्रभवं हि तत् ॥ १८७ ॥
हर्षाविष्टस्ततो व्याधो विवेश स वनं घनं ।
प्राणिहिंसां परित्यज्य बहुनिर्वेदवान् भृशं ॥ १८८ ॥
तत्र दावानलं दृष्ट्वा विवेश विरताशयः ।
निर्दग्धकल्मषो भूत्वा स्वर्गसौख्यमवाप्तवान् ॥ १८९ ॥

अतो ऽहं ब्रवीमि ।

श्रूयते हि कपोतेन शत्रुः शरणागतः ।
पूजितश्च यथान्यायं स्वैश्च मांसैर्निमन्त्रितः ॥ १९० ॥

तच्छ्रुत्वारिमर्दनो दीप्ताक्षं पृष्टवान् । एवमवस्थिते किं भवान् मन्यते । सो ऽब्रवीत् । देव न हन्तव्य एवायं । यतः ।

या ममोद्विजते नित्यं सा मामद्यावगूहते ।
प्रियकारक भद्रं ते यन्ममास्ति हरस्व तत् ॥ १९१ ॥

चौरेण चाप्युक्तं ।

हर्तव्यं ते न पश्यामि हर्तव्यं चेद्भविष्यति ।

पुनरप्यागमिष्यामि यदीयं नावगूहते ॥ ११२ ॥

अरिमर्दनः पृष्टवान्। का च नावगूहते। कश्चायं चौर इति विस्तरतः श्रोतुमिच्छामि। दीप्ताक्षः कथयति। अस्ति कस्मिंश्चिदधिष्ठाने कामा कथा ॥ ८ ॥ तुरो नाम वृद्धबणिक्। तेन च कामोपहतचेतसा मृतभार्येण काचिन्निर्धनबणिक्सुता प्रभूतं धनं दत्वोद्वाहिता। अथ सा दुःखाभिभूता तं वृद्धबणिजं द्रष्टुमपि न शशाक। युक्तं चैतत्।

श्वेतं पदं शिरसि यत्तु शिरोरुहाणां।
स्थानं परं परिभवस्य तदेव पुंसां ॥ ११३ ॥
आरोपितास्थिशकलं परिहृत्य यान्ति।
चाण्डालकूपमिव दूरतरं तरुण्यः ॥ ११४ ॥

तथा च। गात्रं सङ्कुचितं गतिर्विगलिता दन्ताश्च नाशं गताः।
दृष्टिर्भ्रश्यति रूपमप्युपहतं वक्त्रं च लालायते।
वाक्यं नैव करोति बान्धवजनः पत्नी न शुश्रूषते।
धिक् कष्टं जरयाभिभूतपुरुषं पुत्रो ऽप्यवज्ञायते ॥ ११५ ॥

अथ कदाचित् सा तेन सहैकशयने पराङ्मुखी यावत् तिष्ठति। तावद्गृहे चौरः प्रविष्टः। सापि तं चौरं दृष्ट्वा भयव्याकुलिता वृद्धमपि तं पतिं गाढं समालिलिङ्ग। सो ऽपि विस्मयात् पुलकाङ्कितसर्वगात्रश्चिन्तयामास। अहो किमेषा मामद्यावगूहते। यावन्निपुणतया पश्यति। तावद्गृहकोणैकदेशे चौरं दृष्ट्वा व्यचिन्तयत्। नूनमेषास्य भयान्मामालिङ्गतीति ज्ञात्वा तं चौरमाह।

या ममोद्विजते नित्यं सा मामद्यावगूहते।
प्रियकारक भद्रं ते यन्ममास्ति हरस्व तत् ॥ ११६ ॥

तच्छ्रुत्वा चौरो ऽप्याह।

हर्तव्यं ते न पश्यामि हर्तव्यं चेद्भविष्यति।
पुनरप्यागमिष्यामि यदीयं नावगूहते ॥ ११७ ॥

तस्माच्चौरस्याप्युपकारिणः श्रेयश्चिन्त्यते। किं पुनर्न शरणागतस्य। अपि चायं तैर्विप्रकृतो ऽस्माकमेव पुष्टये भविष्यति तदीयरन्ध्रदर्शनाय चेति। अनेन कारणेनायमबध्य इति। एतदाकर्ण्यारिमर्दनो ऽन्यं सचिवं वक्रनासं पप्रच्छ। भद्र साम्प्रतमेवं स्थिते किं कर्तव्यं। सो ऽब्रवीत्। देव अबध्यो ऽयं। यतः।

शत्रवो ऽपि हितायैव विवदन्तः परस्परं।
चौरेण जीवितं दत्तं राक्षसेण तु गोयुगं ॥११८॥

अरिमर्दनः प्राह। कथमेतत्। वक्रनासः कथयति। अस्ति कस्मिंश्चिदधिष्ठाने दरिद्रो द्रोणनामा ब्राह्मणः प्रतिग्रहधनः सततं विशिष्टवस्त्रानुलेपनगन्धमाल्यालङ्कारताम्बूलादिभोगपरिवर्जितः प्ररूढकेशश्मश्रुनखरोमोपचितः शीतोष्णवातवर्षादिभिः परिशोषितशरीरः। तस्य च केनापि यजमानेनानुकम्पया शिशुगोयुगं दत्तं। ब्राह्मणेन च बालभावादारभ्य याचितघृततैलयवसादिभिः संवर्ध्य सुपुष्टं कृतं। तच्च दृष्ट्वा सहसैव कश्चिच्चौरश्चिन्तितवान्। अहमस्य ब्राह्मणस्य गोयुगमिदमपहरिष्यामि। इति निश्चित्य निशायां बन्धनपाशं गृहीत्वा यावत् प्रस्थितः। तावदर्धमार्गे प्रविरलतीक्ष्णदन्तपङ्क्तिरुन्नतनासावंशो प्रकटरक्तान्तनयनोपचितस्नायुसन्ततिर्नतगात्रः शुष्ककपोलः सुहुतहुतवहपिङ्गश्मश्रुकेशशरीरः कश्चिद्दृष्टः। दृष्ट्वा च तं तीव्रभयोत्त्रस्तो ऽपि चौरो ऽब्रवीत्। को भवानिति। स आह। सत्यवचनो ऽहं ब्रह्मराक्षसः। भवानप्यात्मानं निवेदयतु। सो ऽब्रवीत्। अहं क्रूरकर्मा चौरः। दरिद्रब्राह्मणस्य गोयुगं हर्तुं प्रस्थितो ऽस्मि। अथ जातप्रत्ययो राक्षसो ऽब्रवीत्। भद्र षष्ठान्नकालिको ऽहं। अतस्तमेव ब्राह्मणमद्य भक्षयिष्यामि। तत् सुन्दरमिदं। एककार्यावेवावां। अथ तौ तत्र गत्वैकान्ते कालमन्वेषयन्तौ स्थितौ। प्रसुप्ते च ब्राह्मणे तद्भक्षणार्थं प्रस्थितं राक्षसं दृष्ट्वा चौरो ऽब्रवीत्। भद्र नैष न्यायः। यतो गोयुगे

मयापहृते पश्चात् त्वमेनं ब्राह्मणं भक्षय। सो ऽब्रवीत्। कदाचिदयं ब्राह्मणो गोशब्देन बुध्येत। तदानर्थको ऽयं ममारम्भः स्यात्। चौरो ऽप्यब्रवीत्। तवापि यदि भक्षणायोपस्थितस्यान्तर एको ऽप्यन्तरायः स्यात्। तदाहमपि न शक्नोमि गोयुगमपहर्तुं। अतः प्रथमं मयापहृते गोयुगे पश्चात् त्वया ब्राह्मणो भक्षयितव्यः। इत्थं चाहमहमिकया तयोर्विवदतोः समुत्पन्ने द्वैधे प्रतिरववशाद्ब्राह्मणो जजागार। अथ तं चौरो ऽब्रवीत्। ब्राह्मण त्वामेवायं राक्षसो भक्षयितुमिच्छति। राक्षसो ऽप्याह। ब्राह्मण चौरो ऽयं गोयुगं ते पहर्तुमिच्छति। एवं श्रुत्वोत्थाय ब्राह्मणः सावधानो भूत्वेष्टदेवतामन्त्राध्यायेनात्मानं रक्षसादुद्गूर्ण लगुडेन चौराद्गोयुगं ररक्ष। अतो ऽहं ब्रवीमि।

शत्रवो ऽपि हितायैव विवदन्तः परस्परं।
चौरेण जीवितं दत्तं राक्षसेन तु गोयुगं॥१९९॥

अथ तस्य वचनमवधार्यारिमर्दनः पुनरपि प्राकारकर्णमपृच्छत्। कथय किमत्र मन्यते भवान्। सो ऽब्रवीत्। देव अवध्य एवायं। यतो रक्षितेनानेन कदाचित् परस्परप्रीत्या कालः सुखेन गच्छति। उक्तं च।

परस्परस्य मर्माणि ये न रक्षन्ति जन्तवः।
त एव निधनं यान्ति वल्मीकोदरसर्पवत्॥२००॥

अरिमर्दनो ऽब्रवीत्। कथमेतत्। प्राकारकर्णः कथयति। अस्ति कथा
कस्मिंश्चिन्नगरे देवशक्तिर्नाम राजा। तस्य च पुत्रो जठरवल्मीकाश्रये ॥१०॥
णोरगेण प्रतिदिनं प्रत्यङ्गं जीर्यते। अनेकोपकारैः सद्वैद्यैः सच्छास्त्रोपदिष्टौषधयुक्त्यापि चिकित्स्यमानो न स्वास्थ्यमाप्नोति। अथासौ राजपुत्रो निर्वेदाद्देशान्तरं गतः। कस्मिंश्चिन्नगरे भिक्षाटनं कृत्वा महति देवालये कालं यापयति। अथ तत्र नगरे बलिर्नाम राजास्ते। तस्य च द्वे दुहितरौ यौवनस्थे तिष्ठतः। ते च प्रतिदिवसमादित्योदये पितुः पा

दान्तिकमागत्य नमस्कारं चक्रतुः। तत्र चैकाब्रवीत्। विजयस्व महाराज यस्य प्रदानात् सर्वं सुखं लभ्यते। द्वितीया तु विहितं भुङ्क्ष्व महाराजेति ब्रवीति। तच्छ्रुत्वा प्रकुपितो राजाब्रवीत्। भो मन्त्रिण एनां दुष्टभाषिणीं कुमारिकां कस्यचिद्वैदेशिकस्य प्रयच्छत। येन निजविहितमियमेव भुङ्क्ते। अथ तथेति प्रतिपद्याल्पपरिवारा सा कुमारिका मन्त्रिभिस्तस्य देवकुलाश्रितराजपुत्रस्य प्रतिपादिता। सापि प्रहृष्टमानसा तं पतिं दैववत् प्रतिपद्यादाय चान्यविषयं गता। ततः कस्मिंश्चिद्दूरतरनगरप्रदेशे तडागतटे राजपुत्रमावासरक्षायै निरूप्य। स्वयं च घृततैललवणतण्डुलादिक्रयनिमित्तं सपरिवारा गता। कृत्वा च क्रयविक्रयं यावदागच्छति। तावत् स राजपुत्रो वल्मीकोपरिकृतमूर्धा प्रसुप्तः। तस्य च मुखाद्भुजगः फणान्निष्क्रम्य वायुमश्नाति। तत्रैव च वल्मीके ऽपरः सर्पो निष्क्रम्य तथैवासीत्। अथ तयोः परस्परदर्शनेन क्रोधसंरक्तलोचनयोर्मध्याद्वल्मीकस्थेन सर्पेणोक्तं। भो भो दुरात्मन् कथं सुन्दरसर्वाङ्गं राजपुत्रमित्थं कदर्थयसि। मुखस्थो ऽहिरब्रवीत्। भो भो त्वयापि दुरात्मनास्य वल्मीकस्य मध्ये कथमिदं दूषितं हाटकपूर्णं कलशयुगलमित्येवं परस्परस्य मर्माण्युद्घाटितवन्तौ। पुनर्वल्मीकस्थो ऽहिरब्रवीत्। भो दुरात्मन् भेषजमिदं ते किं को ऽपि न जानाति। यज्जीर्णोत्कालितकाञ्जिकाराजिकापानेन भवान् विनाशमुपयाति। अथोदरस्थो ऽहिरब्रवीत्। तवाप्येतद्भेषजं किं कश्चिदपि न वेत्ति। यदुष्णतैलेन वा महोष्णोदकेन तव विनाशः स्यादिति। एवं च सा राजकन्या विटपान्तरिता तयोः परस्परालापान् मर्ममयानाकर्ण्य तथैवानुष्ठितवती। विधायाव्यङ्गं नीरोगं भर्तारं निधिं च परममासाद्य स्वदेशाभिमुखं प्रायात्। पितृमातृस्वजनैः प्रतिपूजिता विहितोपभोगं प्राप्य सुखेनावस्थिता। अतो ऽहं ब्रवीमि।

परस्परस्य मर्माणि ये न रक्षन्ति जन्तवः।

त एव निधनं यान्ति वल्मीकोदरसर्पवत् ॥२०१॥

तच्च श्रुत्वा स्वयमरिमर्दनो ऽप्येवं समर्थितवान्। तथा चानुष्ठितं दृष्ट्वान्तर्लीनं विहस्य रक्ताक्षः पुनरब्रवीत्। कष्टं कष्टं। विनाशितो ऽयं भवद्भिरन्यायेन स्वामी। उक्तं च।

अपूज्या यत्र पूज्यन्ते पूज्यानां तु विमानना।
त्रीणि तत्र प्रवर्तन्ते दुर्भिक्षं मरणं भयं ॥२०२॥

तथा च। प्रत्यक्षे ऽपि कृते पापे मूर्खः साम्ना प्रशाम्यति।
रथकारः स्वकां भार्यां सजारां शिरसावहत् ॥२०३॥

मन्त्रिणः प्राहुः। कथमेतत्। रक्ताक्षः कथयति। अस्ति कस्मिंश्चिदधिष्ठाने वीरधरो नाम रथकारः। तस्य भार्या कामदमिनी। सा च पुंश्चली जनापवादसंयुक्ता च। सो ऽपि तस्याः परीक्षणार्थं व्यचिन्तयत्। कथं मयास्याः परीक्षणं कर्तव्यं। उक्तं च यतः। कथा ॥११॥

यदि स्यात् पावकः शीतः प्रोष्णो वा शशलाञ्छनः।
स्त्रीणां च तत् सतीत्वं स्याद्यदि वा दुर्जनो हितः ॥२०४॥

जानामि चैनां लोकवचनादसतीं। उक्तं च।

यच्च वेदेषु शास्त्रेषु न दृष्टं न च संश्रुतं।
तत् सर्वं वेत्ति लोको ऽयं यत् स्याद्ब्रह्माण्डमध्यगं ॥२०५॥

एवं सम्प्रधार्य भार्यामवोचत्। प्रिये प्रभाते ऽहं ग्रामान्तरं यास्यामि। तत्र कतिचिद्दिनानि लगिष्यन्ति। तत् त्वया किमपि पाथेयं मम योग्यं विधेयं। सापि तद्वचनं श्रुत्वा हर्षितचित्ता सौत्सुक्या सर्वकार्याणि सन्त्यज्य सिद्धमन्नं घृतशर्कराप्रायमकरोत्। अथवा साधिदमुच्यते।

दुर्दिवसे घनतिमिरे वर्षति जलदे महाटवीप्रभृतौ।
पत्युर्विदेशगमने परमसुखं जघनचपलायाः ॥२०६॥

अथासौ प्रत्यूष उत्थाय स्वगृहान्निर्गतः। सापि तं प्रस्थितं विज्ञाय प्रहसितवदनाङ्गसंस्कारकर्म कुर्वाणा कथञ्चित् तद्दिनमत्यवाहयत्।

अथ पूर्वपरिचितविटगृहे गत्वा तं प्रत्युक्तवती । स दुरात्मा मे पतिर्ग्रामान्तरं गतः । तत् त्वयास्मद्गृहे प्रसुप्ते जने समागन्तव्यं। तथानुष्ठिते स रथकारो ऽरण्ये दिनमतिवाह्य प्रदोषे स्वगृहे ऽपरद्वारेण प्रविश्य शय्याधस्तले निभृतो भूत्वा स्थितः । एतस्मिन्नन्तरे स देवदत्तः समागत्य तत्र शयन उपविष्टः । तं दृष्ट्वा रोषाविष्टचित्तो रथकारो व्यचिन्तयत् । किमेनमुत्थाय हन्मि । अथवा हेलयैव प्रसुप्तौ द्वावप्येतौ व्यापादयामि । परं पश्यामि तावदस्याश्चेष्टितं। शृणोमि चानेन सहालापान् । अत्रान्तरे सा गृहद्वारं निभृतं विधाय शयनतलमारूढा । अथ तस्यास्तत्रारोहन्त्या रथकारशरीरे पादो विलग्नः । ततः सा व्यचिन्तयत् । नूनमेतेन दुरात्मना रथकारेण मत्परीक्षणार्थं भाव्यं । ततः स्त्रीचरितविज्ञानं किमपि करोमि । एवं तस्याश्चिन्तयन्त्याः देवदत्तः स्पर्शोत्सुको बभूव । अथ तया कृताञ्जलिपुटयाभिहितं । भो महानुभाव न मे शरीरं त्वया स्पर्शनीयं । यतो ऽहं पतिव्रता महासती च । न चेच्छापं दत्वा त्वां भस्मसात् करिष्यामि । स आह । यद्येवं तर्हि त्वया किमहमाहूतः । साब्रवीत् । भो शृणुष्वैकाग्रमनाः । अहमद्य प्रत्यूषे देवतादर्शनार्थं चण्डिकायतनं गता । तत्राकस्मात् खे वाणी सञ्जाता । पुत्रि किं करोमि । भक्तासि मे त्वं । परं षण्मासाभ्यन्तरे विधिनियोगाद्विधवा भविष्यसि । ततो मयाभिहितं । भगवति यथा त्वमापदं वेत्सि तथा तत्प्रतीकारमपि जानासि । तदस्ति कश्चिदुपायो येन मे पतिः शतसंवत्सरजीवी भवति । ततस्तयाभिहितं । अपि चास्ति । यतस्त्वदायत्तः स प्रतीकारः । तच्छ्रुत्वा मयाभिहितं । देवि यदि तन्मम प्राणैर्भवति तदादेशय येन करोमि । अथ देव्याभिहितं । यद्यद्यदिने परपुरुषेण सहैकस्मिन् शयने समारुह्यालिङ्गनं करोषि । तत् तव भर्तुः सक्तो ऽपमृत्युस्तस्य सञ्चरति । भर्तापि पुनर्वर्षशतं जीवति । तेन त्वं मयाभ्यर्थितः । तद्यत् किञ्चित् कर्तुमनास्तत् कुरुष्व ।

न हि देवतावचनमन्यथा भविष्यतीति निश्चयः। ततो ऽन्तर्हासविकाशमुखः स तदुचितमाचचार। सो ऽपि रथकारो मूर्खस्तस्यास्तद्वचनमाकर्ण्य पुलकाङ्किततनुः शय्याधस्तलान्निष्क्रम्य तामुवाच। साधु पतिव्रते। साधु कुलनन्दने। अहं दुर्जनवचनशङ्कितहृदयस्त्वत्परीक्षानिमित्तं ग्रामान्तरव्याजं कृत्वात्र खट्वाधस्तले निभृतं लीनः। तदेह्यालिङ्ग्य मां। त्वं स्वभर्तृभक्तानां मुख्यानारीणां यदेव ब्रह्मव्रतं परसङ्गे ऽपि पालितवती। मदायुर्वृद्धिकृते ऽपमृत्युविनाशार्थं च त्वमेवं कृतवती। तामेवमुक्त्वा सस्नेहमालिङ्गितवान्। स्वस्कन्धे तामारोप्य तमपि देवदत्तमुवाच। भो महानुभाव मत्पुण्यैस्त्वमिहागतः। त्वत्प्रसादान्मया प्राप्तं वर्षशतप्रमाणमायुः। तत् त्वमपि मामालिङ्ग्य मत्स्कन्धे समारुह। इति जल्पन्ननिच्छन्तमपि देवदत्तमालिङ्ग्य बलात् स्वकीयस्कन्ध आरोपितवान्। ततश्च नृत्यं कृत्वा। हे ब्रह्मव्रतधराणां धुरीण त्वयापि मह्युपकृतमित्याद्युक्त्वा स्कन्धादुत्तार्य। यत्र यत्र स्वजनगृहद्वारादिषु बभ्राम। तत्र तत्र तयोरुभयोरपि तद्गुणवर्णनमेव करोति। अतो ऽहं ब्रवीमि।

प्रत्यक्षे ऽपि कृते पापे मूर्खः साम्ना प्रशाम्यति।
रथकारः स्वकां भार्यां सजारां शिरसावहत्॥२०७॥

तत् सर्वथा मूलोत्खाता वयं विनष्टाः स्मः। सुष्ठु खल्विदमुच्यते।

मित्ररूपा हि रिपवः सम्भाव्यन्ते विचक्षणैः।
ये हितं वाक्यमुत्सृज्य विपरीतोपसेविनः॥२०८॥

तथा च। सन्तो ऽप्यर्था विनश्यन्ति देशकालविरोधिनः।
अप्राज्ञान् मन्त्रिणः प्राप्य तमः सूर्योदये यथा॥२०९॥

ततस्तद्वचो ऽनादृत्य सर्वे ते स्थिरजीविनमुत्क्षिप्य स्वदुर्गमानेतुमारब्धाः। अथानीयमानः स्थिरजीव्याह। देवाद्याकिञ्चित्करेणैतदवस्थेन किं मयोपसङ्गृहीतेन। यत्कारणमिच्छामि दीप्तं वह्निमनुवेष्टुं। तद

र्हसि मामग्निप्रदानेन समुद्धर्तुं। अथ रक्ताक्षस्तस्यान्तर्गतभावं ज्ञात्वाब्रवीत्। किमर्थमग्निपतनमिच्छसि। सो ऽब्रवीत्। अहं तावद्युष्मदर्थमिमामापदं मेघवर्णेन प्रापितः। तदिच्छामि तेषां वैरयातनार्थमुलूकत्वमिति। तच्च श्रुत्वा राजनीतिकुशलो रक्ताक्षः प्राह। भद्र कुटिलस्त्वं कृतकवचनचतुरश्च। तत् त्वमुलूकयोनिगतो ऽपि स्वकीयामेव वायसयोनिं बहुमन्यसे। श्रूयते चैतदाख्यानकं।

सूर्यं भर्तारमुत्सृज्य पर्जन्यं मारुतं गिरिं।
स्वजातिं मूषिका प्राप्ता स्वजातिर्दुरतिक्रमा ॥२१०॥

मन्त्रिणः प्रोचुः। कथमेतत्। रक्ताक्षः कथयति। अस्ति विषमशीलतलस्खलिताम्बुनिर्घोषश्रवणसन्त्रस्तमत्स्यपरिवर्तनसञ्जनितश्वेतफेनसबलतरङ्गाया गङ्गायास्तटे जपनियमतपःस्वाध्यायोपवासयोगक्रियानुष्ठानपरायणैः परिपूतपरिमितजलजिघृक्षुभिः कन्दमूलफलशैवलाभ्यवहारकदर्थितशरीरैर्वल्कलकृतकौपीनमात्रप्रच्छादनैस्तपस्विभिराकीर्णमाश्रमपदं। तत्र याज्ञवल्क्यो नाम कुलपतिः। तस्य जाह्नव्यां स्नात्वोपस्प्रष्टुमारब्धस्य करतले श्येनमुखात् परिभ्रष्टा मूषिका पतिता। तां दृष्ट्वा न्यग्रोधपत्रे ऽवस्थाप्य। पुनः स्नात्वोपस्पृश्य च। प्रायश्चित्तादिक्रियां कृत्वा च। मूषिकां तां स्वतपोबलेन कन्यकां कृत्वा समादाय स्वाश्रममाशिश्राय। अनपत्यां च जायामाह। भद्रे गृह्यतामियं तव दुहितोत्पन्ना प्रयत्नेन संवर्धनीयेति। ततस्तया संवर्धिता लालिता पालिता च यावत्। द्वादशवर्षा सञ्जज्ञे। अथ विवाहयोग्यां तां दृष्ट्वा भर्तारमिव जायोवाच। भो भर्तः किमिदं नावबुध्यसे यथास्याः स्वदुहितुर्विवाहसमयातिक्रमो भवति। असावाह। साधूक्तं। उक्तं च।

स्त्रियः पूर्वं सुरैर्भुक्ताः सोमगन्धर्ववह्निभिः।
भुञ्जते मानुषाः पश्चात् तस्माद्दोषो न विद्यते ॥२११॥
सोमस्तासां ददौ शौचं गन्धर्वाः शिक्षितां गिरं।

पावकः शर्वमेध्यत्वं तस्मान्निष्कल्मषाः स्त्रियः ॥२१२॥
असम्प्राप्तरजा गौरी प्राप्ते रजसि रोहिणी।
अव्यञ्जना भवेत् कन्या कुचहीना च नग्निका ॥२१३॥
व्यञ्जनैस्तु समुत्पन्नैः सोमो भुङ्क्ते हि कन्यकां।
पयोधराभ्यां गन्धर्वा रजस्यग्निः प्रतिष्ठितः ॥२१४॥
तस्माद्विवाहयेत् कन्यां यावदृतुमती भवेत्।
विवाहश्चाष्टवर्षायाः कन्यायास्तु प्रशस्यते ॥२१५॥
व्यञ्जनं हन्ति वै पूर्वं परं चैव पयोधरौ।
रतिरिष्टांस्तथा लोकान् हन्याच्च पितरं रजः ॥२१६॥
ऋतुमत्यां तु तिष्ठन्त्यां स्वेच्छादानं तु दीयते।
तस्मादुद्वाहयेन्नग्नां मनुः स्वयम्भुवो ऽब्रवीत् ॥२१७॥
पितृवेश्मनि या कन्या रजः पश्यत्यसंस्कृता।
अविवाह्या तु सा कन्या जघन्या वृषली स्मृता ॥२१८॥
श्रेष्ठेभ्यः सदृशेभ्यश्च जघन्येभ्यो रजस्वला।
पित्रा देया विनिश्चित्य यतो दोषो न विद्यते ॥२१९॥

अतो ऽहमेनां सदृशाय प्रयच्छामि नान्यस्मै। उक्तं च।

ययोरेव समं वित्तं ययोरेव समं कुलं।
तयोर्विवाहः सख्यं च न तु पुष्टविपुष्टयोः ॥२२०॥

तथा च।

कुलं च शीलं च सनाथता च विद्या च वित्तं च वपुर्वयश्च।
एतान् गुणान् सप्त विचिन्त्य देया कन्या बुधैः शेषमचिन्तनीयं ॥

तद्यद्यस्या रोचते तदा भगवन्तमादित्यमाहूय तस्मै प्रयच्छामि। सा प्राह। इह को दोषः। क्रियतामेतत्। अथ मुनिना रविराहूतः। वेदमन्त्रामन्त्रणप्रभावात् तत्क्षणादेवाभ्युपगम्यादित्यः प्रोवाच। भगवन् किमहमाहूतः। सो ऽब्रवीत्। एषा मदीया कन्यका तिष्ठति। यद्येषा

त्वां वृणोति तर्ह्युद्वहस्वेति। एवमुक्त्वा स्वदुहितरमुवाच। पुत्रि किं तव रोचत एष भगवान् त्रैलोक्यदीपको भानुः। पुत्रिकाब्रवीत्। तात अतिदहनात्मको ऽयं। नाहमेनमभिलषामि। तदस्मादन्यः प्रकृष्टतरः कश्चिदाहूयतां। अथ तस्यास्तद्वचनं श्रुत्वा मुनिर्भास्करमुवाच। भगवंस्त्वदधिको ऽस्ति कश्चित्। भास्करः प्राह। अस्ति मदप्यधिको मेघो येनाच्छादितो ऽहमदृश्यो भवामि। अथ मुनिना मेघमप्याहूय कन्याभिहिता। पुत्रिके ऽस्मै त्वां प्रयच्छामि। सा प्राह। कृष्णवर्णो ऽयं जडात्मा च। तदस्मादन्यस्य प्रधानस्य कस्यचिन्मां प्रयच्छ। अथ मुनिना मेघो ऽपि पृष्टः। भो भो मेघ त्वदप्यधिको ऽस्ति कश्चित्। मेघेनोक्तं। मत्तो ऽप्यधिको ऽस्ति वायुः। वायुना हतो ऽहं सहस्रधा यामि। तच्छ्रुत्वा मुनिना वायुराहूतः। आह च। पुत्रिके एष वायुस्ते विवाहायोत्तमः प्रतिभाति। साब्रवीत्। तात अतिचपलो ऽयं। तदस्मादप्यधिकः कश्चिदानीयतां। मुनिराह। वायो त्वत्तो ऽप्यधिको ऽस्ति कश्चित्। पवनेनोक्तं। मत्तो ऽप्यधिको ऽस्ति पर्वतो येन संस्तभ्य बलवानप्यहं ध्रिये। अथ मुनिः पर्वतमाहूय कन्यामुवाच। पुत्रिके त्वामस्मै प्रयच्छामि। सा प्राह। तात कठिनात्मको ऽयं स्तब्धश्च। तदन्यस्मै देहि मां। मुनिना पर्वतः पृष्टः। भो पर्वतराज त्वदप्यधिको ऽस्ति कश्चित्। गिरिणोक्तं। मत्तो ऽप्यधिकाः सन्ति मूषिका ये मच्छरीरं बलाद्विदारयन्ति। ततो मुनिर्मूषिकमाहूय तस्या अदर्शयत्। आह च। पुत्रिके त्वामस्मै प्रयच्छामि। एष प्रतिभाति ते मूषराजः। सापि तं दृष्ट्वा स्वजातीय एष इति मन्यमाना पुलकोद्भूषितशरीरोवाच। तात मां मूषिकां कृत्वास्मै प्रयच्छ। येन स्वजातिविहितं गृहधर्ममनुतिष्ठामि। ततः सो ऽपि स्वतपोबलेन तां मूषिकां कृत्वास्मै प्रादात्। अतो ऽहं ब्रवीमि।

सूर्यं भर्तारमुत्सृज्य पर्जन्यं मारुतं गिरिं।

स्वजातिं मूषिका प्राप्ता स्वजातिर्दुरतिक्रमा ॥२२२॥

अथ रक्ताक्षवचनमनादृत्य तैः स्ववंशविनाशाय स स्वदुर्गमुपनीतः। नीयमानश्चान्तर्लीनमवहस्य स्थिरजीवी व्यचिन्तयत्।

हन्यतामिति येनोक्तं स्वामिनो हितवादिना।
स एवैको ऽत्र सर्वेषां नीतिशास्त्रार्थतत्त्ववित् ॥२२३॥

तद्यदि तस्य वचनमकरिष्यन्नेते। ततो न स्वल्पो ऽप्यनर्थो ऽभविष्यादेतेषां। अथ दुर्गद्वारं प्राप्यारिमर्दनो ऽब्रवीत्। भो भो हितैषिणो ऽस्य स्थिरजीविनो यथासमीहितं स्थानं प्रयच्छत। तच्च श्रुत्वा स्थिरजीवी व्यचिन्तयत्। मया तावदेतेषां वधोपायश्चिन्तनीयः। स मया मध्यस्थेन न साध्यते। यतो मदीयमिङ्गितादिकं विचारयन्तस्ते ऽपि सावधाना भविष्यन्ति। तद्दुर्गमधिश्रितो ऽभिप्रेतं साधयामि। इति निश्चित्योलूकपतिमाह। देव युक्तमिदं यत् स्वामिना प्रोक्तं। परमहमपि नीतिज्ञस्तेहितश्च। यद्यप्यनुरक्तः शुचिस्तथापि दुर्गमध्य आवासो नार्हः। तदहमत्रैव दुर्गद्वारस्थः प्रत्यहं भवत्पादपद्मरजः पवित्रीकृततनुः सेवां करिष्यामि। तथेति प्रतिपन्ने प्रतिदिनमुलूकपतिसेवकास्ते प्रकाममाहारं कृत्वा उलूकराजादेशात् प्रकृष्टमांसाहारं स्थिरजीविने प्रयच्छन्ति। अथ कतिपयैरेवाहोभिर्मयूर इव स बलवान् संवृत्तः। अथ रक्ताक्षः स्थिरजीविनं पोष्यमाणं दृष्ट्वा सविस्मयो मन्त्रिजनं राजानं च प्रत्याह। अहो मूर्खो ऽयं मन्त्रिजनो भवांश्च। इत्येवमहमवगच्छामि। उक्तं च।

पूर्वं तावदहं मूर्खो द्वितीयः पाशबन्धकः।
ततो राजा च मन्त्री च सर्वं वै मूर्खमण्डलं ॥२२४॥

ते प्राहुः। कथमेतत्। रक्ताक्षः कथयति। अस्ति कस्मिंश्चित् कथा
पर्वतैकदेशे महान् वृक्षः। तत्र च सिम्भुकनामा को ऽपि पक्षी प्रति ॥१३॥
वसति। तस्य पुरीषे सुवर्णमुत्पद्यते। अथ कदाचित् तमुद्दिश्य व्याधः

को ऽपि समाययौ। स च पक्षी तदग्रत एव पुरीषमुत्ससर्ज। अथ पातसमकालमेव तत् सुवर्णीभूतं दृष्ट्वा व्याधो विस्मयमगमत्। अहो मम शिशुकालादारभ्य शकुनिबन्धव्यसनिनो ऽशीतिवर्षाणि समभूवं। न च कदाचिदपि पक्षिपुरीषे सुवर्णं दृष्टं। इति विचिन्त्य तत्र वृक्षे पाशं बबन्ध। अथासावपि पक्षी मूर्खस्तत्रैव विश्वस्तचित्तो यथापूर्वमुपविष्टः। तत्कालमेव पाशेन बद्धः। व्याधस्तु तं पाशादुन्मुच्य पञ्जरके संस्थाप्य निजावासं नीतवान्। अथ चिन्तयामास। किमनेन सापायेन पक्षिणाहं करिष्यामि। यदि कदाचित् को ऽप्यमुमीदृशं ज्ञात्वा राज्ञे निवेदयिष्यति। तन्नूनं प्राणसंशयो मे भवेत्। अतः स्वयमेव पक्षिणं राज्ञे निवेदयामि। इति विचार्य तथैवानुष्ठितवान्। अथ राजापि तं पक्षिणं दृष्ट्वा विकसितनयनवदनकमलः परां तुष्टिमुपागतः। प्राह चैवं। हंहो रक्षापुरुषा एनं पक्षिणं यत्नेन रक्षत। अशनपानादिकं चास्य यथेच्छं प्रयच्छत। अथ मन्त्रिणाभिहितं। किमनेनाश्रद्धेयव्याधवचनप्रत्ययमात्रपरिगृहीतेनाण्डजेन। किं कदाचित् पक्षिपुरीषे सुवर्णं सम्भवति। तन्मुच्यतां पञ्जरबन्धनादयं पक्षी। इति मन्त्रिवचनाद्राज्ञा मोचितो ऽसौ पक्षी। उन्नतद्वारतोरणे समुपविश्य सुवर्णमयीं विष्टां विधाय। पूर्वं तावदहं मूर्ख इति श्लोकं पठित्वा यथासुखमाकाशमार्गेण प्रायात्। अतो ऽहं ब्रवीमि।

पूर्वं तावदहं मूर्खो द्वितीयः पाशबन्धकः।
ततो राजा च मन्त्री च सर्वं वै मूर्खमण्डलं ॥२२५॥

अथ ते पुनरपि प्रतिकूलदैवतया हितमपि रक्ताक्षवचनमनादृत्य भूयस्तं प्रभूतमांसादिविविधाहारेण पोषयामासुः। अथ रक्ताक्षः स्ववर्गमाहूय रहः प्रोवाच। अहो एतावदेवास्मद्भूपतेः कुशलं दुर्गं च। तदुपदिष्टं मया यत् कुलक्रमागतः सचिवो ऽभिधत्ते। तद्वयमन्यत् पर्वतदुर्गं सम्प्रति समाश्रयामः। उक्तं च यतः।

अनागतं यः कुरुते स शोभते स शोच्यते यो न करोत्यनागतं ।
वने ऽत्र संस्थस्य समागता जरा बिलस्य वाणी न कदापि मे श्रुता ॥

ते प्रोचुः । कथमेतत् । रक्ताक्षः कथयति । अस्ति कस्मिंश्चिद्वनो
द्देशे खरनखरो नाम सिंहः प्रतिवसति स्म । स कदाचिदितश्चेतश्च ॥१४॥
परिभ्रमन् क्षुत्क्षामकण्ठो न किञ्चिदपि सत्त्वमाससाद । ततश्चास्तमनसमये महतीं गिरिगुहामासाद्य प्रविष्टश्चिन्तयामास । नूनमेतस्यां गुहायां रात्रौ केनापि सत्त्वेनागन्तव्यं । तन्निभृतो भूत्वा तिष्ठामि । एतस्मिन्नन्तरे तत्स्वामी दधिपुच्छो नाम शृगालः समायातः । स च यावत् पश्यति । तावत् सिंहपदपद्धतिर्गुहायां प्रविष्टा न च निःक्रामणं गता । ततश्चाचिन्तयत् । अहो विनष्टो ऽस्मि । नूनमस्यामन्तर्गतेन सिंहेन भाव्यं । तत् किं करोमि । कथं ज्ञास्यामि । एवं विचिन्त्य द्वारस्थः फूत्कर्तुमारब्धः । अहो बिल अहो बिल । इत्युक्त्वा तूष्णीम्भूय भूयो ऽपि तथैव प्रत्यभाषत । भो किं न स्मरसि यन्मया त्वया सह समयः कृतो ऽस्ति । यन्मया बाह्यात् समागतेन त्वं वक्तव्यः । त्वया चाहमाकारणीय इति । तद्यदि मां नाह्वयसि ततो ऽहं द्वितीयं तदेव बिलं यास्यामि । यत् पश्चान्मामाह्वास्यति । अथ तच्छ्रुत्वा सिंहश्चिन्तितवान् । नूनमेषा गुहास्य समागतस्य सदा समाह्वानं करोति । परमद्य मद्भयान्न किञ्चिद्ब्रूते । अथवा साध्विदमुच्यते ।

भयसन्त्रस्तमनसां हस्तपादादिकाः क्रियाः ।
प्रवर्तन्ते न वाणी च वेपथुश्चाधिको भवेत् ॥ २२७ ॥

तदहमस्याह्वानं करोमि येन तदनुसारेण प्रविष्टो ऽयं मे भोज्यतां याति । एवं सम्प्रधार्य सिंहस्तस्याह्वानमकरोत् । अथ सिंहशब्देन सा गुहा प्रतिरवसम्पूर्णान्यानपि दूरस्थानरण्यजीवान् त्रासयामास । शृगालो ऽपि पलायमान इमं श्लोकमपठत् ।

अनागतं यः कुरुते स शोभते स शोच्यते यो न करोत्यनागतं ।

वने ऽत्र संस्थस्य समागता जरा बिलस्य वाणी न कदापि मे श्रुता॥

तदेवं मत्वा युष्माभिर्मया सह गन्तव्यमिति। एवमभिधायात्मानुयायि परिवारानुगतो दूरदेशान्तरं रक्ताक्षो जगाम।

अथ रक्ताक्षे गते स्थिरजीव्यतिहृष्टमना व्यचिन्तयत्। अहो कल्याणमस्माकमुपस्थितं यद्रक्ताक्षो गतः। यतः स दीर्घदर्शी। एते च मूढमनसः। ततो मम सुखघात्याः सञ्जाताः। उक्तं च यतः।

न दीर्घदर्शिनो यस्य मन्त्रिणः स्युर्महीपतेः।
क्रमायाता ध्रुवं तस्य न चिरात् स्यात् परिक्षयः॥२२९॥

अथवा साध्विदमुच्यते।

मन्त्रिरूपा हि रिपवः सम्भाव्यन्ते विचक्षणैः।
ये सन्तं नयमुत्सृज्य सेवन्ते प्रतिलोमतः॥२३०॥

एवं विचिन्त्य स्वकुलाय एकैकां वनकाष्ठिकां गुहादीपनार्थं दिने दिने प्रक्षिपति। न च ते मूर्खा उलूका विजानन्ति। यदेष कुलायमस्मद्दाहाय वृद्धिं नयति। अथवा साध्विदमुच्यते।

अमित्रं कुरुते मित्रं मित्रं द्वेष्टि हिनस्ति च।
शुभं वेत्त्यशुभं पापं भद्रं दैवहतो नरः॥२३१॥

अथ कुलायव्याजेन दुर्गद्वारे कृते काष्ठनिचये सञ्जाते सूर्योदये ऽन्धतां प्राप्तेषूलूकेषु सत्सु स्थिरजीवी शीघ्रं गत्वा मेघवर्णमाह। स्वामिन् दाहसाध्या कृता रिपुगुहा। तत् सपरिवारः समेत्यैकैकां वनकाष्ठिकां ज्वलन्तीं गृहीत्वा गुहाद्वारे ऽस्मत्कुलाये प्रक्षिप। येन सर्वे शत्रवः कुम्भीपाकनरकप्रायेण दुःखेन म्रियन्ते। तच्छ्रुत्वा प्रहृष्टो मेघवर्ण आह। तात कथयात्मवृत्तान्तं। चिराद्य दृष्टो ऽसि। स आह। वत्स नायं वक्तव्यस्य कालः। यतः कदाचित् तस्य रिपोः कश्चित्प्रणिधिर्म मेहागमनं निवेदयिष्यति। तज्ज्ञानादन्धो ऽन्यत्रापसरणं करिष्यति। तत् त्वर्यतां। उक्तं च।

शीघ्रकृत्येषु कार्येषु विलम्बयति यो नरः ।
तत् कृत्यं देवतास्तस्य कोपाद्विघ्नन्त्यसंशयं ॥२३२॥

तथा च। यस्य यस्य हि कार्यस्य फलितस्य विशेषतः ।
क्षिप्रमक्रियमाणस्य कालः पिबति तत्फलं ॥२३३॥

तद्गृहायातस्ते हतशत्रोः सर्वं सविस्तरं निर्व्याकुलतया कथयिष्यामि। अथासौ तद्वचनमाकर्ण्य सपरिजन एकैकां ज्वलन्तीं वनकाष्ठिकां चञ्चुग्रेण गृहीत्वा तद्गुहाद्वारं प्राप्य स्थिरजीविकुलाये प्राक्षिपत्। ततः सर्वे ते दिवान्धा रक्ताक्षवाक्यानि स्मरन्तो द्वारस्यावृतत्वादनिःसरन्तो गुहामध्ये कुम्भीपाकन्यायमापन्ना मृताश्च। एवं शत्रून् निःशेषतां नीत्वा भूयो ऽपि मेघवर्णस्तदेव न्यग्रोधपादपदुर्गं जगाम। ततः सिंहासनस्थो भूत्वा सभामध्ये प्रमुदितमनाः स्थिरजीविनमपृच्छत्। तात कथं त्वया शत्रुमध्ये गतेनैतावत् कालो नीतः। तदत्र कौतुकमस्माकं वर्तते। तत् कथ्यतां। यतः

वरमग्नौ प्रदीप्ते तु प्रपातः पुण्यकर्मणां ।
न चारिजनसंसर्गो मुहूर्तमपि सेवितः ॥२३४॥

तदाकर्ण्य स्थिरजीव्याह। भद्र आगामिफलवाञ्छया कष्टमपि सेवको न जानाति। उक्तं च यतः।

उपनतभयैर्यो यो मार्गो हितार्थकरो भवेत् ।
स स निपुणया बुद्ध्या सेव्यो महान् कृपणो ऽपि वा ।
करिकरनिभौ ज्याघाताङ्कौ महार्थविशारदौ ।
रचितवलयैः स्त्रीवद्धौ करौ हि किरीटिना ॥२३५॥

शक्तेनापि सदा नरेन्द्रविदुषा कालान्तरापेक्षिणा ।
वास्तव्यं खलु वाक्यवज्रविषमे क्षुद्रे ऽपि पापे जने ।
दर्वीव्यग्रकरेण धूममलिनेनायासयुक्तेन च ।
भीमेनातिबलेन मत्स्यभवने किं नोषितं सूदवत् ॥२३६॥

यद्वा तद्वा विषमपतितं साधु वा गर्हितं वा।
कालापेक्षी हृदयनिहितं बुद्धिमान् कर्म कुर्यात्।
किं गाण्डीवस्फुरगुरुघनास्फालनक्रूरपाणिर्।
नासील्लीलानटनविलसन् मेखली सव्यसाची ॥ २३७॥
सिद्धिं प्रार्थयता जनेन विदुषा तेजो निगृह्य स्वकं।
सत्वोत्साहवतापि दैवविधिषु स्थैर्यं प्रकार्यं क्रमात्।
देवेन्द्रद्रविणेश्वरान्तकसमैरप्यन्वितो भ्रातृभिः।
किं क्लिष्टः सुचिरं त्रिदण्डमवहच्छ्रीमान्न धर्मात्मजः ॥ २३८॥
रूपाभिजनसम्पन्नौ कुन्तीपुत्रौ बलान्वितौ।
गोकर्मरक्षाव्यापारे विराटप्रेष्यतां गतौ ॥ २३९॥
रूपेणाप्रतिमेन यौवनगुणैः श्रेष्ठे कुले जन्मना।
कान्त्या श्रीरिव यात्र सापि विदिशां कालक्रमादागता।
सैरन्ध्रीति सगर्वितं युवतिभिः साक्षेपमाज्ञातया।
द्रौपद्या ननु मत्स्यराजभवने घृष्टं न किं चन्दनं ॥ २४०॥

मेघवर्ण आह। तात असिधाराव्रतमिदं मन्ये यदरिणा सह संवासः। सो ऽब्रवीत्। देव एवमेतत्। परं न तादृग्मूर्खसमागमः क्वापि मया दृष्टः। न च महाप्रज्ञमनेकशास्त्रेष्वप्रतिमबुद्धिं रक्ताक्षं विना धीमान्। यत्कारणं तेन मदीयं यथावस्थितं चित्तं ज्ञातं। ये पुनरन्ये मन्त्रिणस्ते महामूर्खा मन्त्रिमात्रव्यपदेशोपजीविनो ऽतत्त्वकुशला यैरिदमपि न ज्ञातं। यतः

अरितो ऽभ्यागतो भृत्यो दुष्टस्तत्सङ्गतत्परः।
अपसर्प्य स धर्मत्वान्नित्योद्वेगी च दूषितः ॥ २४१॥
आसने शयने याने पानभोजनवस्तुषु।
दृष्टादृष्टप्रमत्तेषु प्रहरन्त्यरयो ऽरिषु ॥ २४२॥
तस्मात् सर्वप्रयत्नेन त्रिवर्गनिलयं बुद्धः।

आत्मानमादृतो रक्षेत् प्रमादाद्धि विनश्यति ॥२४३॥

साधु चेदमुच्यते

सन्तापयन्ति कमपथ्यभुजं न रोगाः ।
दुर्मन्त्रिणं कमुपयान्ति न नीतिदोषाः ।
कं श्रीर्न दर्पयति कं न निहन्ति मृत्युः ।
कं स्वीकृता न विषयाः परिपीडयन्ति ॥२४४॥
लुब्धस्य नश्यति यशः पिशुनस्य मैत्री ।
नष्टक्रियस्य कुलमर्थपरस्य धर्मः ।
विद्याफलं व्यसनिनः कृपणस्य सौख्यं ।
राज्यं प्रमत्तसचिवस्य नराधिपस्य ॥२४५॥

तद्राजन्नसिधाराव्रतं मयाचरितमरिसंसर्गादिति । यद्भवतोक्तं तन्मया साक्षादेवानुभूतं । उक्तं च ।

अपमानं पुरस्कृत्य मानं कृत्वा तु पृष्ठतः ।
स्वार्थमभ्युद्धरेत् प्राज्ञः स्वार्थभ्रंशो हि मूर्खता ॥२४६॥
स्कन्धेनापि वहेच्छत्रुं कालमासाद्य बुद्धिमान् ।
महता कृष्णसर्पेण मण्डूका बहवो हताः ॥२४७॥

मेघवर्ण आह । कथमेतत् । स्थिरजीवी कथयति ।

कथा ॥१५॥

अस्ति वरुणाद्रिसमीप एकस्मिन् प्रदेशे परिणतवया मन्दविषो नाम कृष्णसर्पः । स एवं चित्ते सञ्चिन्तितवान् । कथं नाम मया सुखोपायवृत्त्या वर्तितव्यमिति । ततो बहुमण्डूकं ह्रदमुपगम्य धृतिपरीतमिवात्मानं दर्शितवान् । अथ तथा स्थिते तस्मिन्नुदकप्रान्तगतेनैकेन मण्डूकेन पृष्टः । माम किमद्य यथापूर्वमाहारार्थं न विहरसि । सो ऽब्रवीत् । भद्र कुतो मे मन्दभाग्यस्याहाराभिलाषः । यत्कारणमद्य रात्रौ प्रदोष एव मयाहारार्थं विहरमानेन दृष्ट एको मण्डूकः । तद्ग्रहणार्थं मया क्रमः सज्जितः । सो ऽपि मां दृष्ट्वा मृत्युभयेन स्वाध्यायप्रसक्तानां ब्राह्मणा

नामन्तरमपक्रान्तो न विभावितो मया क्वापि गतः। तत्सदृशमोहितचित्तेन मया कस्यचिद्ब्राह्मणस्य सूनो द्रष्टिकनामा ह्रदतटजलान्तस्थो ऽङ्गुष्ठे दष्टः। ततो ऽसौ सपदि पञ्चत्वमुपागतः। अथ तस्य पित्रा दुःखितेनाहं शप्तः। यथा दुरात्मन् त्वया निरपराधो मत्सुतो दष्टः। तदनेन दोषेण त्वं मण्डूकानां वाहनं भविष्यसि। तत्प्रसादलब्धजीविकया वर्तिष्यस इति। ततो ऽहं युष्माकं वाहनार्थमागतः। तेन च सर्वमण्डूकानामिदमावेदितं। ततस्तैः प्रहृष्टमनोभिः सर्वैरेव गत्वा जलपादनाम्नो दर्दुरराजस्य विज्ञप्तं। अथासावपि मन्त्रिपरिवृतो ऽत्यद्भुतमिदमिति मन्यमानः ससम्भ्रमं ह्रदादुत्तीर्य मन्दविषस्य फणिनः फणप्रदेशमधिरूढः। शेषा अपि यथाज्येष्ठं तत्पृष्ठोपरि समारुरुहुः। किं बहुना तदुपरि स्थानमप्राप्नुवन्तस्तस्यानुपदं धावन्ति। मन्दविषो ऽप्यात्मतुष्ट्यर्थमनेकप्रकारगतिविशेषानदर्शयत्। अथ जलपादो लब्धतदङ्गसंस्पर्शसुखस्तमाह।

न तथा करिणा यानं तुरगेण रथेन वा।
नरयाणेन वा यानं यथा मन्दविषेण मे ॥ २४८॥

अथान्येद्युर्मन्दविषश्छद्मना मन्दं मन्दं विसर्पति। तच्च दृष्ट्वा जलपादो ऽब्रवीत्। भद्र मन्दविष यथापूर्वं किमद्य साधु नोह्यते। मन्दविषो ऽब्रवीत्। देवाद्याहारवैकल्यान्न मे वोढुं शक्तिरस्ति। अथासावब्रवीत्। भद्र भक्षय क्षुद्रमण्डूकान्। तच्छ्रुत्वा प्रहर्षितसर्वगात्रो मन्दविषः ससम्भ्रममब्रवीत्। ममायमेव विप्रशापो ऽस्ति। तत् तवानेनानुज्ञावचनेन प्रीणितो ऽस्मि। ततो ऽसौ नैरन्तर्येण मण्डूकान् भक्षयन् कतिपयैरेवाहोभिर्बलवान् संवृत्तः। प्रहृष्टश्चान्तर्लीनमवहस्येदमब्रवीत्।

मण्डूका विविधा ह्येते छलपूर्वोपसाधिताः।
कियन्तं कालमक्षीणा भवेयुः खादिता मम ॥ २४९॥

जलपादो ऽपि मन्दविषेण कृतकवचनव्यामोहितचित्तः किमपि नाव बुध्यते। अत्रान्तरे ऽन्यो महाकायः कृष्णसर्पस्तमुद्देशं समायातः। तं च मण्डूकैर्वाह्यमानं दृष्ट्वा विस्मयमगमत्। आह च। वयस्य यदस्मा कमशनं तैर्वाह्यसे। विरुद्धमेतत्। मन्दविषो ऽब्रवीत्।

सर्वमेतद्विजानामि यथा वाह्यो ऽस्मि दर्दुरैः।
किञ्चित् कालं प्रतीक्ष्यो ऽहं घृतान्धो ब्राह्मणो यथा ॥२५०॥

सो ऽब्रवीत्। कथमेतत्। मन्दविषः कथयति। अस्ति कस्मिंश्चि कथा दधिष्ठाने यज्ञदत्तो नाम ब्राह्मणः। तस्य भार्या पुंश्चल्यन्यासक्तमना ॥१६॥ अजस्रं विटाय सखण्डघृतान् घृतपूरान् कृत्वा भर्तुश्चौरिकया प्रयच्छति। अथ कदाचिद्भर्त्रा दृष्टोक्ता च। भद्रे किमेतत् परिपच्यते। कुत्र वाजस्रं नयसीदं। कथय सत्यं। सा चोत्पन्नप्रतिभा कृतकवचनैर्भर्तारमब्रवीत्। अस्त्यत्र नातिदूरे भगवत्या देव्या आयतनं। तत्राहमुपोषिता सती बलिं भक्ष्यविशेषांश्चापूर्वान् नयामि। अथ तस्य पश्यतो गृहीत्वा तत् सकलं देव्यायतनाभिमुखी प्रतस्थे। यत्कारणं देव्या निवेदितेनानेन मदीयो भर्तैवं मंस्यते। यन्मम ब्राह्मणी भगवत्याः कृते भक्ष्यविशेषान् नित्यमेव नयतीति। अथ देव्यायतने गत्वा स्नानार्थं नद्यामवतीर्य यावत् स्नानक्रियां करोति। तावद्भर्तान्यमार्गान्तरेणागत्य देव्याः पृष्ठतो ऽदृश्यो ऽवतस्थे। अथ सा ब्राह्मणी स्नात्वा देव्यायतनमागत्य स्नानानुलेपनमाल्यधूपबलिक्रियादिकं कृत्वा देवीं प्रणम्य व्यजिज्ञपत्। भगवति केन प्रकारेण मम भर्तान्धो भविष्यति। तच्छ्रुत्वा स्वरभेदेन देवीपृष्ठस्थितो ब्राह्मणो जगाद। यदि त्वमजस्रं घृतपूरादिभक्ष्यं तस्मै भर्त्रे प्रयच्छसि। ततः शीघ्रमन्धो भविष्यति। सा तु बन्धकी कृतकवचनवञ्चितमानसा तस्मै ब्राह्मणाय तदेव नित्यं प्रददौ। अथान्येद्युर्ब्राह्मणेनाभिहितं। भद्रे नाहं सुतरां पश्यामि। तच्छ्रुत्वा चिन्तितमनया। देव्या प्रसादो ऽयं प्राप्त इति। अथ तस्या हृदयवल्लभो विटस्त

त्सकाशमन्धीभूतो ऽयं ब्राह्मणः किं मम करिष्यतीति निःशङ्कः प्रति दिनमभ्येति। अथान्वेषुस्तं प्रविशन्तमभ्यासगतं दृष्ट्वा केशैर्गृहीत्वा लगुडपार्ष्णिप्रभृतिप्रहारैस्तावदताडयत्। यावदसौ पञ्चत्वमाप। तामपि दुष्टपत्नीं छिन्ननासिकां कृत्वा विससर्ज। अतो ऽहं ब्रवीमि।

सर्वमेतद्विजानामि यथा वाह्यो ऽस्मि दर्दुरैः।
किञ्चित् कालं प्रतीक्ष्यो ऽहं घृतान्धो ब्राह्मणो यथा ॥२५१॥

अथ मन्दविषो ऽन्तर्लीनमवहस्य पुनरपि मण्डूका विविधास्वादा इति तदेवाब्रवीत्। अथ जलपादस्तच्छ्रुत्वा सुतरां व्यग्रहृदयः किमनेनाभिहितमिति तमपृच्छत्। भद्र किं त्वयाभिहितं। इदं विरुद्धं वचः। अथासावाकारप्रच्छादनार्थं न किञ्चिदित्यब्रवीत्। तथैव कृतकवचनव्यामोहितचित्तो जलपादस्तस्य दुष्टाभिसन्धिं नावबुध्यते। किं बहुना तथा तेन सर्वे ऽपि भक्षिता यथा बीजमात्रमपि नावशिष्टं। अतो ऽहं ब्रवीमि।

स्कन्धेनापि वहेच्छत्रुं कालमासाद्य बुद्धिमान्।
महता कृष्णसर्पेण मण्डूका बहवो हताः ॥२५२॥

अथ राजन् यथा मन्दविषेण बुद्धिबलेन मण्डूका निहताः। तथा मयापि सर्वे ऽपि वैरिण इति। साधु चेदमुच्यते।

वने प्रज्वलितो वह्निर्दहन् मूलानि रक्षति।
स मूलोन्मूलनं कुर्याद्वायोर्यो मृदुशीतलः ॥२५३॥

मेघवर्ण आह। तात सत्यमेवैतत्। ये महात्मानो भवन्ति ते महासत्त्वा आपद्गता अपि प्रारब्धं न सृजन्ति। उक्तं च यतः।

महत्त्वमेतन्महतां नयालङ्कारधारिणां।
न मुञ्चन्ति यदारब्धं कृच्छ्रे ऽपि व्यसनोदये ॥२५४॥

तथा च। प्रारभ्यते न खलु विघ्नभयेन नीचैः।
प्रारभ्य विघ्नविहता विरमन्ति मध्याः।

विघ्नैः सहस्रगुणितैरपि हन्यमानाः ।
प्रारब्धमुत्तमगुणा न परित्यजन्ति ॥ २५५ ॥

तत् कृतं निःकण्टकं मम राज्यं शत्रून् निःशेषतां नयता त्वया। अथवा युक्तमेतन्नयवेदिनां। उक्तं च यतः।

ऋणशेषं चाग्निशेषं शत्रुशेषं तथैव च ।
व्याधिशेषं च निःशेषं कृत्वा प्राज्ञो न सीदति ॥ २५६ ॥

सो ऽब्रवीत्। देव भाग्यवांस्त्वमेवासि यस्यारब्धं सर्वमेव संसिध्यति। तत्र केवलं शौर्यं कृत्यं साधयति। किंतु प्रज्ञया यत् क्रियते तदेव विजयाय भवति। उक्तं च।

शस्त्रैर्हता न हि हता रिपवो भवन्ति ।
प्रज्ञाहतास्तु रिपवः सुहता भवन्ति ।
शस्त्रं निहन्ति पुरुषस्य शरीरमेकं ।
प्रज्ञा कुलं च विभवं च यशश्च हन्ति ॥ २५७ ॥

तदेवं प्रज्ञापुरुषकाराभ्यां युक्तस्यायत्नेन कार्यसिद्धयः सम्भवन्ति।

प्रसरति मतिः कार्यारम्भे दृढी भवति स्मृतिः ।
स्वयमुपनयन्नर्थान् मन्त्रो न गच्छति विप्लवं।
स्फुरति सफलस्तर्कश्चित्तं समुन्नतिमश्नुते ।
भवति च रतिः श्लाघ्ये कृत्ये नरस्य भविष्यतः ॥ २५८ ॥

तथा च नयत्यागशौर्यसम्पन्ने पुरुषे राज्यमिति। उक्तं च।

त्यागिनि शूरे विदुषि च संसर्गरुचिर्जनो गुणी भवति ।
गुणवति धनं धनाच्छ्रीः श्रीमत्याज्ञा ततो राज्यं ॥ २५९ ॥

मेघवर्ण आह। नूनं सद्यःफलानि नीतिशास्त्राणि यत् त्वयानुकृत्ये नानुप्रविश्यारिमर्दनः सपरिजनो निशेषितः। स्थिरजीव्याह।

तीक्ष्णोपायप्राप्तिगम्यो ऽपि यो ऽर्थस्तस्याप्यादौ संश्रयः साधुयुक्तः।
उत्तुङ्गाग्रः सारभूतो वनानां मान्वभ्यर्च्यश्छिद्यते पादपेन्द्रः ॥ २६० ॥

अथवा स्वामिन् किं तेनाभिहितेन यदनन्तरकाले क्रियारहितमसुखसाध्यं वा भवति। साधु चेदमुच्यते।

अनिश्चितैरध्यवसायभीरुभिः पदे पदे दोषशतानुदर्शिभिः।
फलैर्विसंवादमुपागता गिरः प्रयान्ति लोके परिहासवस्तुतां॥२६१॥

न च लघुष्वपि कर्तव्येषु धीमद्भिरनादरः कार्यः। यतः

शक्यामि कर्तुमिदमल्पमयत्नसाध्यं।
अत्रादरः क इति कृत्यमुपेक्ष्यमाणाः।
केचित् प्रमत्तमनसः परितापदुःखं।
आपत्प्रसङ्गसुलभं पुरुषाः प्रयान्ति॥२६२॥

तदद्य जितारेर्महिभोर्यथापूर्वं निद्रालाभो भविष्यति। उच्यते चैतत्।

निःसर्पे बद्धसर्पे वा भवने सुप्यते सुखं।
सदा दृष्टभुजङ्गे तु निद्रा दुःखेन लभ्यते॥२६३॥

तथा च।

विस्तीर्णव्यवसायसाध्यमहतां स्निग्धोपभुक्ताशिषां।
कार्याणां नयसाहसोन्नतिमतामिच्छापदारोहिणां।
मानोत्सेकपराक्रमव्यसनिनः पारं न यावद्गताः।
सामर्षे हृदये ऽवकाशविषया तावत् कथं निर्वृतिः॥२६४॥

तदवसितकार्यारम्भस्य विश्राम्यतीव मे हृदयं। तदिदमधुना निहतकण्टकं राज्यं प्रजापालनतत्परो भूत्वा पुत्रपौत्रादिक्रमेणाचलच्छत्रासनश्रीश्चिरं भुंक्ष्व। अपि च।

प्रजा न रञ्जयेद्यस्तु राजा रक्षादिभिर्गुणैः।
अजागलस्तनस्येव तस्य राज्यं निरर्थकं॥२६५॥

गुणेषु रागो व्यसनेष्वनादरो रतिः सुभृत्येषु च यस्य भूपतेः।
चिरं स भुङ्क्ते चलचामरांशुकां सितातपत्राभरणां नृपश्रियं॥२६६॥

न च त्वया प्राप्तराज्यो ऽहमिति मत्वा श्रीमदेनात्मा व्यंसयितव्यः।

यत्कारणं चला हि राज्ञां विभूतयः। वंशारोहणवद्राज्यलक्ष्मीर्दुरारोहा। क्षणविनिपातरता प्रयत्नशतैरपि धार्यमाणा दुर्धरा। प्रशस्ताराधिताप्यन्ते विप्रलम्भिनी। वानरजातिरिव विद्रुतानेकचित्ता। पद्मपत्रोदकमिवाघटितसंश्लेषा। पवनगतिरिवातिचपला। अनार्यसङ्गतमिवास्थिरा। आशीविष इव दुरुपचारा। सन्ध्याभ्रलेखेव मुहूर्तरागा। जलबुद्बुदालीव स्वभावभङ्गुरा। शीरप्रकृतिरिव कृतघ्ना। स्वप्नलब्धद्रव्यराशिरिव क्षणदृष्टनष्टा। अपि च।

यदैव राज्ये क्रियतेऽभिषेकस्तदैव बुद्धिर्व्यसनेषु योज्या।
घटा हि राज्ञामभिषेककाले सहाम्भसेवापदमुद्गिरन्ति ॥२६७॥

न च कश्चिदनधिगमनीयो नामास्त्यापदां। उक्तं च।

रामस्य व्रजनं बलेर्नियमनं पाण्डोः सुतानां वनं।
वृष्णीनां निधनं नलस्य नृपते राज्यात् परिभ्रंशनं।
नाट्याचार्यकमर्जुनस्य पतनं सञ्चिन्त्य लङ्केश्वरे।
सर्वं कालवशाज्जनोऽत्र सहते कः कं परित्रायते ॥२६८॥

क्व स दशरथः स्वर्गे भूत्वा महेन्द्रसुहृद्गतः।
क्व स जलनिधेर्वेलां बध्वा नृपः सगरस्तथा।
क्व स करतलाज्जातो वैण्यः क्व सूर्यतनुर्मनुः।
ननु बलवता कालेनैते प्रबुध्य निमीलिताः ॥२६९॥

मान्धाता क्व गतस्त्रिलोकविजयी राजा क्व सत्यव्रतः।
देवानां नृपतिर्गतः क्व नहुषः सच्छास्त्रवान् केशवः।
मन्यन्ते सरथाः सकुञ्जरवराः शक्रासनाध्यासिनः।
कालेनैव महात्मना त्वनुकृता कालेन निर्वासिताः ॥२७०॥

अपि च।

स च नृपतिस्ते सचिवास्ताः प्रमदास्तानि काननवनानि।
स च ते च ताश्च तानि च कृतान्तदृष्टानि नष्टानि ॥२७१॥

एवं मत्तकरिकर्णचञ्चलां राज्यलक्ष्मीमवाप्य न्यायैकनिष्ठो भूत्वोपभुंक्ष्व।

इति श्रीविष्णुशर्मविरचिते पञ्चतन्त्रके
काकोलूकीयं नाम तृतीयं तन्त्रं
समाप्तं

---

अथेदमारभ्यते लब्धप्रणाशो नाम चतुर्थं तन्त्रं। तस्यायमाद्यः श्लोकः।

प्राप्तमर्थं तु यो मोहात् सान्त्वनैः प्रतिमुञ्चति।
स तथा वञ्चितो मूढो मकरः कपिना यथा ॥१॥

तद्यथानुश्रूयते। अस्ति कस्मिंश्चित् समुद्रोपकण्ठे महान् जम्बूपादपः सदाफलः। तत्र च रक्तमुखो नाम वानरः प्रतिवसति स्म। अथ तस्य तरोरधस्तात् कदाचिद्विकरालमुखो नाम मकरः समुद्रसलिलान्निष्क्रम्य सुकोमलबालुकासनाथे तीरोपान्ते न्यविशत्। ततश्च रक्तमुखेन स प्रोक्तः। भो भवान् समभ्यागतो ऽतिथिः। तद्भक्षयतु मया दत्तान्यमृततुल्यानि जम्बूफलानि। उक्तं च।

प्रियो वा यदि वा द्वेष्यो मूर्खः पण्डित एव वा।
वैश्वदेवान्तमापन्नः सो ऽतिथिः स्वर्गसङ्क्रमः ॥२॥
न पृच्छेच्चरणं गोत्रं न च विद्यां कुलं न च।
अतिथिं वैश्वदेवान्ते श्राद्धे च मनुरब्रवीत् ॥३॥
दूरमार्गश्रमश्रान्तं वैश्वदेवान्तमागतं।
अतिथिं पूजयेद्यस्तु स याति परमां गतिं ॥४॥
अपूजितो ऽतिथिर्यस्य गृहाद्याति विनिश्वसन्।
गच्छन्ति विमुखास्तस्य पितृभिः सह देवताः ॥५॥

एवमुक्त्वा तस्मै जम्बूफलानि प्रददौ। सो ऽपि तानि भक्षयित्वानेन सह चिरं गोष्ठीसुखमनुभूय भूयो ऽपि स्वभवनमगात्। एवं नित्यमेव

तौ वानरमकरौ जम्बूछायाश्रितौ विविधसाधुगोष्ठ्या कालं नयन्तौ सुखेन तिष्ठतः। सो ऽपि मकरो भक्षितशेषाणि जम्बूफलानि गृहं गत्वा स्वपत्न्याः प्रयच्छति। अथ तयान्यस्मिन्नहनि स पृष्टः। नाथ क्वैवंविधान्यमृतकल्पानि नित्यं प्राप्नोषि। सो ऽब्रवीत्। भद्रे ममास्ति प्रियसुहृद्रक्तमुखो नाम वानरः। स प्रीतिपूर्वमिमानि फलानि प्रयच्छति। अथ तयाभिहितं। यः सदैवामृतप्रायाणीदृशानि फलानि भक्षयति। तस्य हृदयममृतमयं भविष्यति। तद्यदि मया भार्यया ते प्रयोजनं। ततस्तस्य हृदयं मम प्रयच्छ। येन तद्भक्षयित्वा जरामरणरहिता त्वया सह भोगान् भुनज्मि। स आह। भद्रे मा मैवं वद। यतः स प्रतिपन्नो ऽस्माकं भ्राता। अपरं फलदाता ततो व्यापादयितुं न शक्यते। तत् त्यजैनं मिथ्याग्रहं। उक्तं च।

एका प्रसूयते माता द्वितीया वाक् प्रसूयते।
वाग्जातमधिकं प्रोचुः सोदर्यादपि बन्धुवत् ॥६॥

अथ मकरी प्राह। त्वया कदाचिदपि मम वचनं नान्यथा कृतं। तन्नूनमेषा वानरी भविष्यति। यतस्तस्या अनुरागतस्त्वं सकलमपि दिनं तत्र गमयसि। तत् त्वं ज्ञातः मया सम्यक्। उक्तं च यतः।

साह्लादं वचनं प्रयच्छसि न मे नो वाञ्छितं याचितः।
प्रायः प्रोच्छ्वसिषि द्रुतं हुतवहज्वालासमं रात्रिषु।
कण्ठाश्लेषपरिग्रहे शिथिलता यन्नादराचुम्बसे।
तत् ते धूर्त हृदिस्थिता प्रियतमा काचिन्ममैवापरा ॥७॥

सो ऽपि पत्न्याः पादोपसङ्ग्रहं कृत्वा सदीनमुवाच।

मयि ते पादपतिते किङ्करत्वमुपागते।
त्वं प्राणवल्लभे ऽकस्मात् कोपने कोपमेष्यसि ॥८॥

सापि तद्वचनमाकर्ण्याश्रुप्लुतमुखी तमुवाच।

सार्धं मनोरथशतैस्तव धूर्त कान्ता।

सैव स्थिता मनसि कृत्रिमभावरम्या ।
अस्माकमस्ति न कथञ्चिदिहावकाशः ।
तस्मात् कृतं चरणपातविडम्बनाभिः ॥ ९ ॥

अपरं सा यदि ते वल्लभा न भवति । तत् किं मया प्रोक्तो ऽपि तां न व्यापादयसि । अथ स यदि मर्कटः । तत् कस्तेन सह तव स्नेहः । तत् किं बहुना । यदि तस्य हृदयं न भक्षयामि । तदा तवोपरि प्रायोपवेशनं कृत्वा प्राणांस्त्यक्ष्यामि । एवं तस्यास्तन्निश्चयं ज्ञात्वा चिन्ताव्याकुलितहृदयः स प्रोवाच । अहो साध्विदमुच्यते ।

वज्रलेपस्य मूर्खस्य नारीणां कर्कटस्य च ।
एको ग्रहस्तु मीनानां नीलमद्यपयोस्तथा ॥१०॥

तत् किं करोमि । कथं स मे बध्यो भवति । इति विचिन्त्य वानरपार्श्वमगमत् । वानरो ऽपि चिरायान्तं सोद्वेगमवलोक्य प्रोवाच । भो मित्र किमद्य चिरवेलया समायातो ऽसि । कस्मात् साह्लादं नालपयसि । न च सुभाषितानि पठसि । स आह । मित्र अद्याहं तव भ्रातृजायया निष्ठुरतरैर्वचनैरभिहितः । भो कृतघ्न मा मे त्वं स्वमुखं दर्शय । यतस्त्वं प्रतिदिनं मित्रमुपजीवसि । न च तस्य पुनः स्वगृहद्वारदर्शनेनापि प्रत्युपकारं करोषि । तत् ते प्रायश्चित्तमपि नास्ति । उक्तं च । ब्रह्मघ्ने च सुरापे च चौरे भग्नव्रते शठे ।
निष्कृतिर्विहिता सद्भिः कृतघ्ने नास्ति निष्कृतिः ॥११॥

तत् त्वं मम देवरं गृहीत्वाद्य प्रत्युपकारार्थं गृहमानय । नो चेत् त्वया सह परलोके मे दर्शनं । तदहं तयैव प्रोक्तस्तव सकाशमागतः । तदद्य तया सह त्वदर्थे कलहायतो ममेयती वेला विलग्ना । तदागच्छ मे गृहं । तव भ्रातृपत्नी रचितचतुष्कप्रगुणितवस्त्रमणिमाणिक्याद्युचिताभरणा द्वारदेशबद्धवन्दनमालिका सोत्कण्ठा तिष्ठति । मर्कट आह । भो मित्र युक्तमभिहितं मद्भ्रातृपत्न्या । उक्तं च यतः ।

वर्जयेत् कौलिकाकारं मित्रं प्रज्ञतरो नरः ।
आत्मनः सम्मुखं नित्यं य आकर्षति लोलुपः ॥१२॥
ददाति प्रतिगृह्णाति गुह्यमाख्याति पृच्छति ।
भुङ्क्ते भोजयते चैव षड्विधं प्रीतिलक्षणं ॥१३॥

परं वयं वनचराः। युष्मदीयं च जलान्ते गृहं। तत् कथं शक्यते तत्र गन्तुं। तस्मात् तामपि भ्रातृपत्नीमत्रानय। येन प्रणम्य तस्या आशीर्वादं गृह्णामि। स आह। मित्र अस्ति समुद्रान्तरे सुरम्ये पुलिनप्रदेशे ऽस्मद्गृहं। तन्मम पृष्ठमारूढः सुखेनाकृतभयो गच्छ। सो ऽपि तच्छ्रुत्वा सानन्दमाह। भद्र यद्येवं तर्हि त्वर्यतां। किं विलम्बितेन। एषो ऽहं तव पृष्ठमारूढः। तथानुष्ठिते ऽगाधे जलधौ गच्छन्तं मकरमालोक्य भयत्रस्तमना वानरः प्रोवाच। भ्रातः शनैः शनैर्गम्यतां। जलकल्लोलैः प्लाव्यते मे शरीरं। तदाकर्ण्य मकरश्चिन्तयामास। असावगाधं जलं प्राप्तो मे वशः सञ्जातः। मत्पृष्ठगतस्तिलमात्रमपि चलितुं न शक्नोति। तस्मात् कथयाम्यस्य निजाभिप्रायं येनाभीष्टदेवतास्मरणं करोति। आह च। भो मित्र त्वं बधाय मया समानीतो भार्यावाक्येन विश्वास्य। तत् स्मर्यतामभीष्टदेवता। सो ऽब्रवीत। भ्रातः किं मया तस्यास्तवापि चापकृतं यस्मात् भवता मे बधोपायश्चिन्तितः। मकर आह। भो तस्यास्तव हृदयस्यामृतमयफलरसास्वादनमृष्टस्य भक्षणे दोहदः सञ्जातः। तेनैतदनुष्ठितं। ततः प्रत्युत्पन्नमतिर्वानर आह। भद्र यद्येवं तत् किं त्वया न मम तत्रैव व्याहृतं। येन स्वहृदयं जम्बूकोटरे सदैव मया सुगुप्तीकृतं। तत् भ्रातृपत्न्या अर्पयामि। त्वयाहं शून्यहृदयो ऽत्र कस्मादानीतः। तदाकर्ण्य मकरः सानन्दमाह। भद्र यद्येवं तदर्पय मे स्वहृदयं। येन सा दुष्टपत्नी तद्भक्षयित्वानशनादुत्तिष्ठति। अहं त्वां तमेव जम्बूपादपं प्रापयामि। एवमुक्त्वा निवर्त्य जम्बूतरुतलं समागमत्। वानरो ऽपि जल्पितविविधोपया

चितशतः कथमपि जलधितीरं समासादितवान्। ततश्च दीर्घतरचङ्क्रमणेन तमेव जम्बूपादपमारूढश्चिन्तयामास। अहो मया लब्धास्तावत् प्राणाः। अथवा साधिदमुच्यते।

न विश्वसेदविश्वस्ते विश्वस्ते ऽपि न विश्वसेत्।
विश्वासाद्भयमुत्पन्नं मूलान्यपि निकृन्तति ॥ १४ ॥

तन्ममैतदद्य पुनर्जन्मदिनमिव सञ्जातं। इति चिन्तयानं मकर आह। भो मित्र अर्पय मे तद्धृदयं यथा ते भ्रातृपत्नी भक्षयित्वानशनादुत्तिष्ठति। अथ विहस्य निर्भर्त्सयन् वानरस्तमाह। धिग् धिग् मूर्ख विश्वासघातक किं कस्यचिद्धृदयद्वयं भवति। तदाशु गम्यतां जम्बूवृक्षस्याधस्तात्। न भूयो ऽपि त्वयात्रागन्तव्यं। उक्तं च यतः।

सकृद्दुष्टं तु यो मित्रं पुनः सन्धातुमिच्छति।
स मृत्युमुपगृह्णाति गर्भादश्वतरी यथा ॥ १५ ॥

तच्छ्रुत्वा मकरः सविलक्षं चिन्तितवान्। अहो मया मूढेन किमस्य स्वचित्ताभिप्रायो निवेदितः। तद्यद्यसौ पुनरपि कथञ्चिद्विश्वासं गच्छति। तद्भूयो ऽपि विश्वासयामि। आह च। मित्र तस्या न किञ्चित् तव हृदयेन प्रयोजनं। मया तव हृदयाभिप्रायपरीक्षणार्थं हास्येनेदमभिहितं। तदागच्छ प्राघुणकन्यायेनास्मदावासं। त्वद्भ्रातृपत्नी त्वां प्रत्युत्कण्ठिता तिष्ठति। वानर आह। भो दुष्ट गम्यतामधुना। नाहमागमिष्यामि। उक्तं च।

बुभुक्षितः किं न करोति पापं क्षीणा नरा निष्करुणा भवन्ति।
आख्याहि भद्रे प्रियदर्शनस्य न गङ्गदत्तः पुनरेति कूपं ॥ १६ ॥

मकर आह। कथमेतत्। सो ऽब्रवीत्। अस्ति कस्मिंश्चित् कूपे कथा
गङ्गदत्तो नाम मण्डूकराजः प्रतिवसति स्म। स कदाचिद्दायादैरुद्वेजितो ॥ १ ॥
ऽरघट्टघाटिकामारुह्य कूपात् क्रमेण निष्क्रान्तः। अथ तेन चिन्तितं। कथं तेषां दायादानां मयापकारः कर्तव्यः। उक्तं च।

आपदि येनापकृतं येन च हसितं दशासु विषमासु ।
अपकृत्य तयोरुभयोः पुनरपि जातं नरं मन्ये ॥१७॥

इत्येवं बहु चिन्तयन् स विले प्रविशन्तं प्रियदर्शनाभिधं कृष्णसर्पमपश्यत्। तं दृष्ट्वा भूयो ऽप्यचिन्तयत्। एनं कृष्णसर्पं तत्र कूपे नीत्वा सकलदायादानामुच्छेदं करिष्यामि। उक्तं च यतः।

शत्रुणा योजयेच्छत्रुं बलिना बलवत्तरं ।
स्वकार्याय यतो न स्यात् काचित् पीडात्र तत्क्षये ॥१८॥

तथा च। शत्रुमुन्मूलयेत् प्राज्ञस्तीक्ष्णं तीक्ष्णेन शत्रुणा ।
व्यथाकरं सुखार्थाय कण्टकेनैव कण्टकं ॥१९॥

एवं स विभाव्य विलद्वारं गत्वा तमाहूतवान्। एह्येहि प्रियदर्शन एहीति। तच्छ्रुत्वा सर्पश्चिन्तयामास। य एष मामाह्वयते स स्वजातीयो न भवति। यतो नैषा सर्पिणी। अन्येन केनापि सह मर्त्यलोके मम सन्धानं नास्ति। तदत्रैव दुर्गे स्थितस्तावद्वेद्मि को ऽयं भविष्यति। उक्तं च यतः।

यस्य न ज्ञायते शीलं न कुलं न च संश्रयः ।
न तेन सङ्गतिं कुर्यादित्युवाच वृहस्पतिः ॥२०॥

कदाचित् को ऽपि मन्त्रवाद्यौषधचतुरो वा मामाहूय बन्धने क्षिपति। अथवा कश्चित्पुरुषो वैरमाश्रित्य कस्यचिद्विपक्षस्यार्थे मामाह्वयति। प्राह च। भोः को भवान्। स आह। अहं गङ्गदत्तो नाम मण्डूकाधिपतिस्त्वत्सकाशे मैत्र्यार्थमभ्यागतः। तच्छ्रुत्वा सर्प आह। भो अश्रद्धेयमेतत्। तृणानां वह्निना सह मैत्रीसङ्गमः क्व। उक्तं च।

यो यस्य जायते वध्यः स स्वप्ने ऽपि कथञ्चन ।
न तत्समीपमभ्येति तत् किमेवं प्रजल्पसि ॥२१॥

गङ्गदत्त आह। भो सत्यमेतत्। स्वभाववैरी त्वमस्माकं। परं परिभवादहं त्वत्सकाशं प्राप्तः। उक्तं च।

सर्वनाशे च सञ्जाते प्राणानामपि संशये ।
अपि शत्रुं प्रणम्योच्चै रक्षेत् प्राणान् धनानि च ॥२२॥

सर्प आह । कथय कस्मात् ते परिभवः । स आह । दायादेभ्यः । सर्पो ऽब्रवीत् । अथ क्व त आश्रयः । वाप्यां कूपे तडागे ह्रदे वा । तत् कथय स्वाश्रयं । तेनोक्तं । पाषाणचयनिबद्धे कूपे । सर्प आह । अपदा वयं । तन्नास्ति तत्र मे प्रवेशः । प्रविष्टस्य च स्थानं नास्ति यत्र स्थितस्तव दायादान् व्यापादयामि । तद्गम्यतां । उक्तं च ।

यच्छक्यं ग्रसितुं शस्यं ग्रस्तं परिणमेच्च यत् ।
हितं च परिणामे यत् तदद्यं भूतिमिच्छता ॥२३॥

गङ्गदत्त आह । भो समागच्छ त्वं । अहं सुखोपायेन तत्र तव प्रवेशं कारयिष्यामि । तथा तस्य मध्ये जलोपान्ते रम्यतरं कोटरमस्ति । तत्र स्थितस्त्वं लीलया तान् दायादान् साधयिष्यसि । तच्छ्रुत्वा सर्पो ऽप्यचिन्तयत् । अहं तावत् परिणतवयाः कदाचित् कथञ्चिन्मूषकमेकं प्राप्नोमि न वा । तत् सुखावहो जीवनोपायो ऽयमनेन कुलाङ्गारेण मे दर्शितः । तद्गत्वा तान् मण्डूकान् भक्षयामीति । अथवा साध्विदमुच्यते ।

यो हि प्राणपरिक्षीणः सहायपरिवर्जितः ।
स हि सर्वसुखोपायं वृत्तिमाचरयेद्बुधः ॥२४॥

एवं विचिन्त्य तमाह । भो गङ्गदत्त यद्येवं तदग्रे भव येन तत्र गच्छावः । गङ्गदत्त आह । भो प्रियदर्शन अहं त्वां सुखोपायेन तत्र नेष्यामि । स्थानं च दर्शयिष्यामि । परं त्वया मत्परिजनो रक्षणीयः । केवलं यानहं तव दर्शयिष्यामि त एव भक्षणीया इति । सर्प आह । भद्र साम्प्रतं त्वं मे मित्रं जातं । तन्न भेतव्यं । त्वद्वचनेन भक्षणीयास्ते दायादाः । एवमुक्त्वा विलान्निष्क्रम्य तमालिङ्ग्य च तेनैव सह प्रस्थितः । अथ कूपान्तमासाद्यारघट्टघटिकामार्गेण सर्पस्तेनात्मना स्वालयं नीतः । ततश्च गङ्गदत्तेन कृष्णसर्पं कोटरे स्थित्वा दर्शितास्ते दायादाः । ते च

तेन सर्वे शनैः शनैर्भक्षिताः। अथ मण्डूकाभावे सर्पेणाभिहितं। भद्र निःशेषितास्ते रिपवः। तत् प्रयच्छ मे ऽन्यत् किञ्चिद्भोजनं यतो ऽहं त्वयात्रानीतः। गङ्गदत्त आह। कृतं त्वया मित्रकृत्यं। तत् साम्प्रतमनेनैव घाटिकायन्त्रमार्गेण गम्यतामिति। सर्प आह। भो गङ्गदत्त न सम्यगभिहितं भवता। कथमहं तत्र गच्छामि। मदीयं बिलदुर्गमन्येन रुद्धं भविष्यति। तस्मादत्र स्थितस्य मण्डूकमेकैकं स्ववर्गीयं प्रयच्छ। नो चेत् सर्वानपि भक्षयिष्यामीति। तच्छ्रुत्वा गङ्गदत्तो व्याकुलितमना व्यचिन्तयत्। अहो किमेतन्मया कृतमेनं समानीय। तद्यदि निषेधयिष्यामि तत् सर्वानपि भक्षयिष्यति। अथवा युक्तमुच्यते।

यो ऽमित्रं कुरुते मित्रं वीर्याभ्यधिकमात्मनः।
स करोति न सन्देहः स्वयं हि विषभक्षणं ॥२५॥

तत् प्रयच्छाम्यस्यैकैकं दिनं प्रति सुहृदमपि। उक्तं च।

सर्वस्वहरणे शक्तं शत्रुं बुद्धियुता नराः।
तोषयन्त्यल्पदानेन बाडवं सागरो यथा ॥२६॥

यो दुर्बलो ऽणूनपि याच्यमानो बलीयसा यच्छति नैव साम्ना।
प्रयच्छते नैव च दर्ष्यमानं खारीं स चूर्णस्य पुनर्ददाति ॥२७॥

तथा च। सर्वनाशे समुत्पन्ने अर्धं त्यजति पण्डितः।
अर्धेन कुरुते कार्यं सर्वनाशो हि दुस्तरः ॥२८॥

न स्वल्पस्य कृते भूरि नाशयेन्मतिमान् नरः।
एतदेव हि पाण्डित्यं यत् स्वल्पाद्भूरिरक्षणं ॥२९॥

एवं निश्चित्य तमेकैकं मण्डूकं नित्यमेवादिशत्। सो ऽपि तं भक्षयित्वान्यमपि तस्य परोक्षे भक्षयति। अथवा साध्विदमुच्यते।

यथा हि मलिनैर्वस्त्रैर्यत्र तत्रोपविश्यते।
एवं चलितवित्तस्तु वित्तशेषं न रक्षति ॥३०॥

अथान्यदिने तेनापरान् मण्डूकान् भक्षयित्वा गङ्गदत्तसुतो यमुनादत्तो

नाम मण्डूको भक्षितः। तं भक्षितं मत्वा गङ्गदत्तः सुरागस्वरेण धिग् धिक् प्रलापकरः कथञ्चिदपि न क्रन्दनाद्विरराम। ततः स्वपत्न्याभिहितः।

किं क्रन्दसि दुराक्रन्द स्वपक्षक्षयकारक।
स्वपक्षस्य क्षये जाते को नस्त्राता भविष्यति ॥३१॥

तदद्यापि विचिन्त्यतामात्मनो निष्क्रमणं। अस्य वधोपायो वा। अथ गच्छता कालेन सकलमपि कवलितं मण्डूककुलं। केवलमेको गङ्गदत्तस्तिष्ठति। ततश्च प्रियदर्शनेन भणितं। भद्र गङ्गदत्त बुभुक्षितो ऽहं। निःशेषिताः सर्वे मण्डूकाः। भवांस्तिष्ठति। तद्दीयतां मे किञ्चिद्भोजनं यतो ऽहं त्वयात्रानीतः। स आह। भो मित्र न त्वयात्र विषये मयि विद्यमाने कापि चिन्ता कार्या। तद्यदि मां प्रेषयिष्यसि ततो ऽन्यकूपस्थानपि मण्डूकान् विश्वास्यात्रानयामि। स आह। मम तावत् त्वमभक्ष्यो भ्रातृस्थाने। तद्यद्येवं करोषि तत् साम्प्रतं पितृस्थाने भवसि। तदेवं क्रियतामिति। सो ऽपि तदाकर्ण्यारघट्टघाटिकामाश्रित्य विविधदेवतोपकल्पितपूजोपयाचितो ऽस्मात् कूपाद्विनिष्क्रान्तः। प्रियदर्शनो ऽपि तदागमनकाङ्क्षया तत्रस्थः प्रतीक्षमाणस्तिष्ठति। अथ चिरादप्यनागते गङ्गदत्ते प्रियदर्शनो ऽन्यकोटरनिवासिनीं गोधामुवाच। भद्रे क्रियतां मे स्तोकं साहाय्यं। यतश्चिरपरिचितस्ते गङ्गदत्तः। तद्गत्वा तत्सकाशं कुत्रचिज्जलाशये ऽन्विष्य मम सन्देशं कथय। यदागम्यतां द्रुततरमेकाकिनापि भवता यद्यन्ये मण्डूका नागच्छन्ति। नाहं त्वया विनात्र वस्तुं शक्नोमि। तथाहं यदि त्वां प्रति विरुद्धमाचरामि तन्मदीयं जन्म सुकृतं तवेति। गोधापि तद्वचनाद्द्रुततरं गङ्गदत्तमन्विष्याह। भद्र गङ्गदत्त स तव सुहृत् प्रियदर्शनस्तव मार्गं समीक्षमाणस्तिष्ठति। तच्छीघ्रमागम्यतां। अपरञ्च तेन तव विरूपकरणार्थे जन्म सुकृतमन्तरे धृतं। तन्निःशङ्केन मनसा समागम्यतामिति। तदाकर्ण्य गङ्गदत्तः प्राह।

बुभुक्षितः किं न करोति पापं क्षीणा नरा निष्करुणा भवन्ति।
आख्याहि भद्रे प्रियदर्शनस्य न गङ्गदत्तः पुनरेति कूपं ॥३२॥

इत्येवमुक्त्वा स तां विसर्जयामास। तद्भो दुष्टजलचर अहमपि गङ्गदत्त इव त्वद्गृहे न कथञ्चिदप्यायास्यामि। तच्छ्रुत्वा मकर आह। भो मित्र नैतद्युज्यते ते कर्तुं। सर्वथैव मे कृतघ्नतादोषमपनय मद्गृहागमनेन। अन्यथा तवोपरि प्रायोपवेशनं करिष्यामि। वानर आह। मूढ किमहं लम्बकर्णो मूर्खो दृष्टापायो ऽपि स्वयमे तत्रैव गत्वात्मानं व्यापादयामि। यतः

आगतश्च गतश्चैव दृष्ट्वा सिंहपराक्रमं।
अकर्णहृदयो मूर्खो यो गत्वा पुनरागतः ॥३३॥

कथा ॥२॥ मकर आह। भद्र स को लम्बकर्णः। कथं दृष्टापायो ऽपि मृतः। तन्मे निवेद्यतां। वानर आह। अस्ति कस्मिंश्चिद्वनोद्देशे करालकेशरो नाम सिंहः प्रतिवसति स्म। तस्य च धूसरको नाम शृगालः सदैवानुयायी परिचारको ऽस्ति। अथ कदाचित् तस्य सिंहस्य हस्तिना सह युध्यमानस्य शरीरे गुरुतराः प्रहाराः सञ्जाता यैः पदमेकमपि चलितुं न शक्नोति। तस्याचलनाच्च धूसरकः क्षुत्क्षामकण्ठो दौर्बल्यं गतः। अन्यस्मिन्नहनि सिंहमवोचत्। स्वामिन् बुभुक्षया पीडितो ऽहं। पदात् पदमपि चलितुं न शक्नोमि। तत् कथं ते शुश्रूषां करोमि। सिंह आह। भो गच्छान्वेषय किञ्चित् सत्वं येनेमामवस्थां गतो ऽपि व्यापदयामि। तदाकर्ण्य शृगालो ऽन्वेषणं कुर्वन् कञ्चित् समीपवर्तिनं ग्राममासादितवान्। तत्र च लम्बकर्णो नाम गर्दभस्तडागोपान्ते प्रविरलदूर्वाङ्कुरान् कृच्छ्रादास्वादयन् दृष्टः। ततश्च समीपवर्तिना भूत्वा तेनाभिहितः। माम नमस्कारो ऽयं मदीयः सम्भाव्यतां। चिराद्दृष्टो ऽसि। तत् कथय किमेवं दुर्बलतां गतः। लम्बकर्ण आह। भो भगिनीसुत किं कथयामि। रजको ऽतिनिर्दयो

ऽतिभारेण मां पीडयति। घासमुष्टिमपि न प्रयच्छति। केवलमत्र दूर्वाङ्कुरान् धूलिमिश्रितान् भक्षयामि। तत् कुतो मे शरीरपुष्टिरिति। शृगाल आह। माम यद्येवं तदस्ति मरकतसदृशशस्पप्रायो नदीसनाथो रमणीयतरः प्रदेशः। तत्रागत्य मया सह सुभाषितगोष्ठीसुखमनुभवन् तिष्ठ। लम्बकर्ण आह। भो भगिनीसुत युक्तमुक्तं भवता। परं वयं ग्राम्याः पशवो ऽरण्यचराणां बध्याः। तत् किं तेन भव्यप्रदेशेन। शृगाल आह। माम मैवं वद। मद्भुजपञ्जरपरिरक्षितः प्रदेशो ऽसौ। तन्नास्ति कस्यचिदपरस्य तत्र प्रवेशः। अपरमनेनैव भवद्विधिना रजककदर्थितास्तत्र तिस्रो रासभ्यो ऽनाथाः सन्ति। ताश्च पुष्टिमापन्ना यौवनोत्कटा इदं मामूचुः। यदि त्वमस्माकं सत्यो मातुलः। तदा किंचिद्ग्रामान्तरं गत्वास्मद्योग्यं कञ्चित् पतिमानय। एतदर्थे त्वामहं तत्र नयामि। अथ शृगालवचनानि श्रुत्वा कामपीडिताङ्गो लम्बकर्णस्तमुवाच। भद्र यद्येवं तदग्रे भव। त्वरितं तत्र गच्छावः। अथवा साधिदमुच्यते।

नामृतं न विषं किञ्चिदेकां मुक्त्वा नितम्बिनीं।
यस्याः सङ्गेन जीव्येत मृयते च वियोगतः॥३४॥

तथा च। यासां नाम्नापि कामः स्यात् सङ्गमं दर्शनं विना।
तासां दृक्सङ्गमं प्राप्य यन्न द्रवति कौतुकं॥३५॥

तथानुष्ठिते शृगालेन सह सिंहान्तिकमागतः। सिंहो ऽपि व्यथाकुलस्तं गर्दभं दृष्ट्वा यावत् समुत्तिष्ठति। तावद्रासभः पलायितुमारब्धवान्। अथ तस्य पलायमानस्य सिंहेन तलप्रहारो दत्तः। स च मन्दभाग्यस्य व्यवसाय इव व्यर्थतां गतः। अत्रान्तरे शृगालः कोपाविष्टस्तमुवाच। भो किमेवंविधः प्रहारस्ते। यदि गर्दभो ऽपि तव पुरो बलाद्गच्छति। तत् कथं गजेन सह युद्धं करिष्यसि। तद्दृष्टं ते बलं। अथ विलक्षस्मितं सिंह आह। भो किमहं करोमि। मया न

क्रमः सज्जीकृत आसीत्। अन्यथा गजो ऽपि मत्क्रमाक्रान्तो न गच्छति। शृगाल आह। अद्याप्येकवारं तवान्तिके तमानयिष्यामि। परं त्वया सज्जीकृतक्रमेण स्थातव्यं। सिंह आह। भद्र यो मां प्रत्यक्षं दृष्ट्वा गतः स पुनः कथमत्रैवागमिष्यति। तदन्यत् किमपि सत्त्वमन्विष्यतां। शृगाल आह। किं तवानेन व्यापारेण। त्वं केवलं सज्जितक्रमस्तिष्ठ। तथानुष्ठिते शृगालो ऽपि यावद्रासभमार्गेण गच्छति तावत् तत्रैव स्थाने चरन् दृष्टः। अथ शृगालं दृष्ट्वा रासभः प्राह। भो भगिनीसुत शोभनस्थाने त्वयाहं नीतो द्राग्मृत्युवशं गतः। तत् कथय किं तत् सत्त्वमतिरौद्रं यस्य वज्रसदृशकरप्रहारादहं मुक्तः। तच्छ्रुत्वा प्रहसन् शृगाल आह। माम सा वन्यसुखेनातिपुष्टा रासभी त्वामायान्तं दृष्ट्वा सानुरागालिङ्गितुमिच्छुर्धाविता। त्वं च कातरत्वान्नष्टः। सा पुनर्न शक्ता त्वां विना स्थातुं। तया तु नश्यतो ऽपि भवतो ऽवलम्बनार्थं हस्तः प्रसारिता नान्यकारणेन। तदागच्छ। स त्वत्कृते प्रायोपवेशनकृतमतिरेतद्वदति। यल्लम्बकर्णो यदि मे भर्ता न भवति। तदहमग्नौ जले वा प्रविशामि। विषं वा भक्षयिष्यामि। पुनस्तस्य वियोगं सोढुं न शक्नोमि। तत् प्रसादं कृत्वा तत्रागम्यतामिति। नो चेत् स्त्रीहत्या ते भविष्यति मन्मथश्च तव प्रकोपं करिष्यति। उक्तं च यतः।

स्त्रीमुद्रां मकरध्वजस्य जयिनीं सर्वार्थसम्पत्करीं।
एनां ये प्रविहाय यान्ति कुधियो मिथ्याफलान्वेषिणः।
ते तेनैव निहत्य निर्दयतरं नग्नीकृता मुण्डिताः।
केचिद्रक्तपटीकृताश्च जटिलाः कापालिकाश्चापरे ॥३६॥

अथासौ तद्वचनप्रत्ययितो भूयो ऽपि तेन सह प्रस्थितः। अथवा साध्विदमुच्यते।

जानन्नपि नरो दैवात् प्रकरोति विगर्हितं।

कर्म किं कस्यचिल्लोके गर्हितं रोचते कथं ॥ ३७॥

अत्रान्तरे धूर्तजनवचनशतप्रतारितो रासभः पुनरपि सिंहस्यान्तिकमागतः। तत् प्राक्सञ्ज्ञितक्रमेण सिंहेन लम्बकर्णो व्यापादितः। ततश्च तं हत्वा शृगालं रक्षपालं निरूप्य स्वयं स्नानार्थं नद्यां गतः। अथ शृगालेनातिलौल्यौत्सुक्यात् खरस्य कर्णसहितं हृदयं भक्षितं। अत्रान्तरे यावत् सिंहः स्नात्वा कृतदेवार्चनः प्रतर्पितपितृगणः। तावत् कर्णहृदयरहितो रासभस्तिष्ठति। तं दृष्ट्वा कोपपरीतात्मा सिंहः शृगालमाह। पाप किमिदमनुचितं कर्म समाचरितं। यत् कर्णहृदयभक्षणेनायमुच्छिष्टतां नीतः। शृगालः सविनयमाह। स्वामिन् मा मैवं वद। यत्कर्णहृदयरहितो ऽयं रासभ आसीत्। तेनेहागत्य त्वामवलोक्य भयाद्गत्वा भूयो ऽप्यागतः। अथ तद्वचनं श्रद्धेयं मत्वा सिंहस्तेन सह संविभज्य निःशङ्कितमनास्तं भक्षितवान्। अतो ऽहं ब्रवीमि।

आगतश्च गतश्चैव दृष्ट्वा सिंहपराक्रमं।
अकर्णहृदयो मूर्खो यो गत्वा पुनरागतः ॥ ३८॥

तन्मूर्ख कपटं कृतं। अपरं त्वया युधिष्ठिरेणेव सत्यवचनेन विनाशितं। अथवा साध्विदमुच्यते।

स्वार्थमुत्सृज्य यो दम्भी सत्यं ब्रूते सुमन्दधीः।
स स्वार्थाद्भ्रस्यते नूनं युधिष्ठिर इवापरः ॥ ३९॥

मकर आह। कथमेतत्। वानरः कथयति। अस्ति कस्मिंश्चि कथा
दधिष्ठाने युधिष्ठिरनामा कुम्भकारः प्रतिवसति स्म। स कदाचित् प्रमा ॥ ३॥
दादर्धभग्नघटकर्परतीक्ष्णाग्रस्योपरि महता वेगेन धावन् पतितः। ततः कर्परकोट्या पाटितललाटो रुधिरप्लावितनुः कृच्छ्रादुत्थाय स्वाश्रयमाजगाम। ततश्चापथ्यसेवनात् प्रहारस्तस्य करालतां गतः कृच्छ्रेण नीरोगतां नीतः। अथ कदाचिद्दुर्भिक्षपीडिते देशे स कुम्भकारः क्षुत्क्षामकण्ठः कैश्चिद्राजसेवकैः सह देशान्तरं गत्वा कस्यापि राज्ञः सेवको

बभूव। सो ऽपि राजा तस्य ललाटे विकरालं प्रहारक्षतं दृष्ट्वा चिन्तयामास। यद्वीरपुरुषः कश्चिदयं। नूनं तेन ललाटपट्टे ऽस्य सम्मुखः प्रहारः। अतस्तं सम्मानदानादिभिः सर्वेषां राजपुत्राणां सकाशाद्विशेषप्रसादेन राजा पश्यति। ते ऽपि राजपुत्रास्तस्य तं प्रसादमतिरेकं दृष्ट्वा परमेर्ष्याधर्मं वहन्तो ऽपि राजभयान्न किञ्चिदूचुः। अथान्यस्मिन्नहनि तस्य भूपतेर्वैरिसम्भावनायां क्रियमाणायां विग्रहे समुपस्थिते प्रकल्प्यमानेषु गजेषु सन्नह्यमानेषु वाजिषु योद्धृषु प्रगुणीक्रियमाणेषु तेन भूभुजा स कुम्भकारः प्रस्तावानुगतं पृष्टो निर्व्यञ्जने। भो राजपुत्र किं ते नाम का च जातिः। कस्मिन् सङ्ग्रामे प्रहारो ऽयं ते ललाटे लग्नः। स आह। देव नायं शस्त्रप्रहारः। युधिष्ठिराभिधः कुलालो ऽहं प्रकृत्या। मद्गृहे ऽनेककर्पराण्यासन्। अथाहं कदाचिन्मद्यपानं कृत्वा निर्गतः प्रधावन् कर्परोपरि पतितः। ततः प्रहारविकारो ऽयं मे ललाट एवं विकरालतां गतः। तदाकर्ण्य राजा सव्रीडमुवाच। अहो वञ्चितो ऽहं राजपुत्रानुकारिणानेन कुलालेन। तद्दीयतां द्रागेतस्यार्धचन्द्रः। तथानुष्ठिते कुम्भकारः प्राह। देव मा मैवं कुरु। पश्य मे रणे हस्तलाघवं। राजाह। भो सर्वगुणसम्पन्नो भवान्। तथापि गम्यतां। उक्तं च।

शूरो ऽसि कृतविद्यो ऽसि दर्शनीयो ऽसि पुत्रक।
यस्मिन् कुले समुत्पन्नो गजस्तत्र न हन्यते ॥४०॥

कथा ॥४॥ कुलालः पृच्छति। कथमेतत्। राजा कथयति। अस्ति कस्मिंश्चिद्वनोद्देशे सिंहदम्पती प्रतिवसतः स्म। अथ कदाचित् सिंही प्रसूता पुत्रद्वयमजीजनत्। सिंहो ऽपि नित्यमेव मृगान् व्यापाद्य सिंह्यै ददाति। अथान्यस्मिन्नहनि तेन किमपि नासादितं। वने भ्रमतो ऽपि तस्य रविरस्तं गतः। अथ तेन स्वगृहमागच्छता शृगालशिशुः प्राप्तः। स च बालको ऽयमित्यवधार्य यत्नेन दंष्ट्रामध्यगतं कृत्वा सिंह्या जीवन्तमेव

समर्पितवान्। ततः सिंह्याभिहितं। भो कान्त त्वयानीतं किञ्चिदस्माकं भोजनं। सिंह आह। प्रिये मयाद्यैनं शृगालशिशुं परित्यज्य न किञ्चित् सत्त्वमासादितं। स च बालो ऽयमिति मत्वा न व्यापादितो विशेषात् स्वजातीयश्च। उक्तं च यतः।

स्त्रीविप्रलिङ्गिबालेषु प्रहर्तव्यं न कर्हिचित्।
प्राणत्यागे ऽपि सञ्जाते विश्वस्तेषु विशेषतः ॥४१॥

इदानीं त्वमेनं भक्षयित्वा पथ्यं कुरु। प्रभाते ऽन्यत् किञ्चिदुपार्जयिष्यामि। सा प्राह। भो कान्त त्वया बालको ऽयं विचिन्त्य न हतः। तत् कथमेनमहं स्वोदरार्थे विनाशयामि। उक्तं च।

अकृत्यं नैव कर्तव्यं प्राणत्यागे ऽपि संस्थिते।
न च कृत्यं परित्याज्यं धर्म एष सनातनः ॥४२॥

तस्मान्ममायं तृतीयः पुत्रो भविष्यति। इत्येवमुक्त्वा तमपि स्वस्तनक्षीरेण परां पुष्टिमनयत्। एवं ते त्रयो ऽपि शिशवः परस्परमज्ञातजातिविशेषा एकाचारविहारा बाल्यसमयं निर्वाहयन्ति। अथ कदाचित् तत्रवने भ्रमन्नरण्यगजः समायातः। तं दृष्ट्वा तौ सिंहसुतौ द्वावपि कुपिताननौ तं प्रति प्रचलितौ यावत् तावत् तेन शृगालसुतेनाभिहितं। अहो गजो ऽयं युष्मत्कुलशत्रुः। तन्न गन्तव्यमेतस्याभिमुखं। एवमुक्त्वा गृहं प्रधावितः। तावपि ज्येष्ठबान्धवभङ्गान्निरुत्साहतां गतौ। अथवा साध्विदमुच्यते।

एकेनापि सुधीरेण सोत्साहेन रणं प्रति।
सोत्सहं जायते सैन्यं भग्ने भङ्गमवाप्नुयात् ॥४३॥

तथा च। अत एव हि वाञ्छन्ति भूपा योधान् महाबलान्।
शूरान् वीरान् कृतोत्साहान् वर्जयन्ति च कातरान् ॥४४॥

अथ तौ द्वावपि गृहं प्राप्य पित्रोरग्रतो विहसन्तौ ज्येष्ठभ्रातृचेष्टितमूचतुः। यथा गजं दृष्ट्वा दूरतो ऽपि नष्टः। सो ऽपि तदाकर्ण्य कोपा

विष्टमनाः प्रस्फुरिताधरपल्लवस्ताम्रलोचनस्त्रिशिखां भृकुटिं कृत्वा तौ निर्भर्त्सयन् परुषतरवचनान्युवाच। ततः सिंह्यैकान्ते नीत्वा प्रबोधितो ऽसौ। वत्स मैवं कदाचिज्जल्प। भवदीयलघुभ्रातरावेतौ। अथासौ प्रभूतकोपाविष्टस्तामुवाच। किमहमेताभ्यां शौर्येण रूपेण विद्याभ्यासेन कौशलेन वा हीनः। येन मामुपहसतः। तन्मयावश्यमेतौ व्यापादनीयौ। तदाकर्ण्य सिंही तस्य जीवितमिच्छन्त्यन्तर्विहस्य प्राह।

शूरो ऽसि कृतविद्यो ऽसि दर्शनीयो ऽसि पुत्रक।
यस्मिन् कुले समुत्पन्नो गजस्तत्र न हन्यते ॥४५॥

तत् सम्यक् शृणु वत्स। त्वं शृगालीसुतः कृपया मया स्वस्तनक्षीरेण पुष्टिं नीतः। तद्यावदेतौ मत्पुत्रौ शिशुत्वात् त्वां शृगालं न जानीतः। तावद्द्रुततरं गत्वा स्वजातीयानां मध्ये भव। नो चेदाभ्यां हतो मृत्युपथं समेष्यसि। सो ऽपि तद्वचनं श्रुत्वा भयव्याकुलमनाः शनैः शनैरपसृत्य स्वजात्या मिलितः। तस्मात् त्वमपि यावदेते राजपुत्रास्त्वां कुलालं न जानन्ति। तावद्द्रुततरमपसर। नो चेदेतेषां सकाशाद्विडम्बनां प्राप्य मरिष्यसि। कुलालो ऽपि तदाकर्ण्य सत्वरं प्रनष्टः। अतो ऽहं ब्रवीमि।

स्वार्थमुत्सृज्य यो दम्भी सत्यं ब्रूते सुमन्दधीः।
स स्वार्थाद्भ्रस्यते नूनं युधिष्ठिर इवापरः ॥४६॥

धिग्मूर्ख यत् त्वया स्त्रियो ऽर्थे एतत् कार्यमनुष्ठातुमारब्धं। न हि स्त्रीणां कथञ्चिद्विश्वासमुपगच्छेत्। उक्तं च।

यदर्थे स्वकुलं त्यक्तं जीवितार्धं च हारितं।
सा मां त्यजति निःस्नेहा कः स्त्रीणां विश्वसेन्नरः ॥४७॥

कथा ॥५॥ मकर आह। कथमेतत्। वानर आह। अस्ति कस्मिंश्चिदधिष्ठाने को ऽपि ब्राह्मणः। तस्य च प्रियातिप्राणप्रिया। सापि प्रतिदिनं कुटुम्बेन सह कलहं कुर्वाणा न विश्राम्यति। सो ऽपि ब्राह्मणः

कलहमसहमानो भार्यावात्सल्यात् स्वकुटुम्बं परित्यज्य ब्राह्मण्या सह विप्रकृष्टं देशान्तरं गतः। अथ महाटवीमध्ये ब्राह्मण्याभिहितः। आर्यपुत्र तृष्णा मां बाधते। तदुदकं क्वाप्यन्वेषय। अथासौ तद्वचनानन्तरं यावदुदकं गृहीत्वा समागच्छति। तावत् तां मृतामपश्यत्। अतिवल्लभतया विषादं कुर्वन् यावद्विलपति। तावदाकाशे वाचं शृणोति। तथा हि यदि ब्राह्मण त्वं स्वकीयजीवितव्यार्द्धं ददासि। ततस्ते जीवति ब्राह्मणी। तच्छ्रुत्वा ब्राह्मणेन शुचीभूय तिसृभिर्वाचाभिः स्वजीवितार्द्धं दत्तं। वाक्सममेव च ब्राह्मणी जीविता सा। अथ तौ जलं पीत्वा वनफलानि भक्षयित्वा गन्तुमारब्धौ। ततः क्रमेण कस्यचिन्नगरस्य प्रवेशे पुष्पवाटिकां प्रविश्य ब्राह्मणो भार्यामभिहितवान्। भद्रे यावदहं भोजनं गृहीत्वा समागच्छामि तावदत्र त्वया स्थातव्यं। इत्यभिधाय प्रायासीत्। अथ तस्यां पुष्पवाटिकायां पङ्गुररघट्टं खेलयन् दिव्यगिरा गीतमुद्गिरयति। तच्च श्रुत्वा कुसुमेषुणार्दितया तत्सकाशं गत्वाभिहितं। भद्र यदि मां न कामयसे। तन्मत्सक्ता स्त्रीहत्या तव भविष्यति। पङ्गुरब्रवीत्। किं व्याधिग्रस्तेन मया करिष्यसि। साब्रवीत्। किमनेनोक्तेन। अवश्यं त्वया सह मया सङ्गमः कर्तव्यः। तच्छ्रुत्वा तथा कृतवान्। सुरतानन्तरं साब्रवीत्। इतः प्रभृति यावज्जीवं मयात्मा भवते दत्तः। इति ज्ञात्वा भवानप्यस्माभिः सहागच्छतु। सो ऽब्रवीत्। एवमस्तु। अथ ब्राह्मणो भोजनं गृहीत्वा समागत्य तया सह भोक्तुमारब्धः। साब्रवीत्। एष पङ्गुर्बुभुक्षितः। तदेतस्यापि कियन्तमपि ग्रासं देहीति। तथैवानुष्ठिते ब्राह्मण्याभिहितं। ब्राह्मण सहायहीनस्त्वं यदा ग्रामान्तरं गच्छसि। तदा मम वचनसहायो ऽपि नास्ति। तत एनं पङ्गुं गृहीत्वा गच्छावः। सो ऽब्रवीत्। न शक्नोम्यात्मानमप्यात्मना वोढुं। किं पुनरेनं पङ्गुं। साब्रवीत् पेटाभ्यन्तरस्थमेनमहं नेष्यामि। अथ तत् कृतकवचनव्यामोहितचित्तेन तेन प्रति

पन्नं। तथानुष्ठित एवान्यस्मिन् दिने कूपोपकण्ठे विश्रान्तो ब्राह्मणस्तया पङ्गुपुरुषासक्तया सम्प्रेर्य कूपान्तः पातितः। सापि पङ्गुं गृहीत्वा कस्मिंश्चिन्नगरे प्रविष्टा। तत्र शुल्कचौर्यरक्षानिमित्तं राजपुरुषैरितस्ततो भ्रमद्भिस्तन्मस्तकस्था पेटा दृष्टा। बलादाच्छिद्य राजाग्रे नीता। राजा च यावत् तामुत्पाटयति। तावत् तं पङ्गुं ददर्श। ततः सा ब्राह्मणी विलापं कुर्वती राजपुरुषानुपदमेव तत्रागता। राज्ञा पृष्टा को वृत्तान्त इति। साब्रवीत्। ममैष भर्ता व्याधिबाधितो दायादसमूहैरुद्वेजितो मया स्नेहव्याकुलितमानसया शिरसि कृत्वा त्वत्सकाशमानीतः। तच्छ्रुत्वा राजाब्रवीत्। ब्राह्मणि मे त्वं भगिनी। ग्रामद्वयं गृहीत्वा भर्त्रा सह भोगान् भुञ्जाना सुखेन तिष्ठ। अथ स ब्राह्मणो दैववशात् केनापि साधुना कूपादुत्तारितः परिभ्रमंस्तदेव नगरमायातः। तया दुष्टभार्यया दृष्टो राज्ञे निवेदितः। राजन्नयं मम भर्तुर्वैरी समायात्। राज्ञापि बध आदिष्टः। सो ऽब्रवीत्। देव अनया मम सक्तं किञ्चिद्गृहीतमस्ति। यदि त्वं धर्मवत्सलः। तद्दापय। राजाब्रवीत्। भद्रे यत् त्वयास्य सक्तं किञ्चिद्गृहीतमस्ति तत् समर्पय। सा प्राह। देव मया न किञ्चिद्गृहीतं। ब्राह्मण आह। यन्मया त्रिवाचिकं स्वजीवितार्द्धं दत्तं तद्देहि। अथ सा राजभयात् तत्रैव त्रिवाचिकमेव जीवितं मया दत्तमिति जल्पन्ती प्राणैर्विमुक्ता। ततः सविस्मयं राजाब्रवीत्। किमेतदिति। ब्राह्मणेनापि पूर्ववृत्तान्तः सकलो ऽपि तस्मै निवेदितः। अतो ऽहं ब्रवीमि।

यदर्थे स्वकुलं त्यक्तं जीवितार्द्धं च हारितं।
सा मां त्यजति निःस्नेहा कः स्त्रीणां विश्वसेन्नरः ॥४८॥

वानरः पुनरप्याह। साधु चेदमुपाख्यानकं श्रूयते।

न किं दद्यान्न किं कुर्यात् स्त्रीभिरभ्यर्थितो नरः।
अनश्वा यत्र हेषन्ते शिरो ऽपर्वणि मुण्डितं ॥४९॥

कथा ॥६॥

मकर आह। कथमेतत्। वानरः कथयति। अस्ति प्रख्यातबलपौरुषो ऽनेकनरेन्द्रवृन्दमुकुटमरीचिजालजटिलीकृतपादपीठः शरच्छशाङ्ककिरणनिर्मलयशाः समुद्रपर्यन्तायाः पृथिव्या भर्ता नन्दो नाम राजा। तस्य सर्वशास्त्राधिगतः समस्ततत्त्वः सचिवो वररुचिर्नाम। तस्य च प्रणयकलहेन जाया कुपिता। सा चातीव वल्लभानेकप्रकारं परितोष्यमाणापि न प्रसीदति। ब्रवीति च भर्ता। भद्रे येन प्रकारेण तुष्यसि तं वद। निश्चितं करोमि। ततः कथञ्चित् तयोक्तं। यदि शिरो मुण्डयित्वा मम पादयोर्निपतसि। तदा प्रसादाभिमुखी भवामि। तथानुष्ठिते प्रसन्नासौ। अथ नन्दस्य भार्यापि तथैव रुष्टा प्रसाद्यमानापि न तुष्यति। तेनोक्तं। भद्रे त्वया विना मुहूर्तमपि न जीवामि। पादयोः पतित्वा त्वां प्रसादयामि। साब्रवीत्। यदि खलीनं मुखे प्रक्षिप्याहं तव पृष्ठे समारुह्य त्वां धावयामि। धावितस्तु यद्यश्ववद्ध्रेषसे। तदा प्रसन्ना भवामि। तथैवानुष्ठितं। अथ प्रभातसमये सभोपविष्टस्य राज्ञो वररुचिरायातः। तं च दृष्ट्वा राजा पप्रच्छ। भो वररुचे किमपर्वणि मुण्डितं शिरस्ते। सो ऽब्रवीत्।

न किं दद्यान्न किं कुर्यात् स्त्रीभिरभ्यर्थितो नरः।
अनश्वा यत्र ह्रेषन्ते शिरो ऽपर्वणि मुण्डितं ॥ ५० ॥

तद्भो दुष्टमकर त्वमपि नन्दवररुचिवत् स्त्रीवश्यः। ततस्तद्भद्रानीतेन त्वया मां प्रति बधोपायप्रयासः प्रारब्धः परं स्ववाग्दोषेणैव प्रकटीभूतः। अथवा साध्विदमुच्यते।

आत्मनो मुखदोषेण बध्यन्ते शुकसारिकाः।
बकास्तत्र न बध्यन्ते मौनं सर्वार्थसाधनं ॥ ५१ ॥

तथा च। सुगुप्तं रक्षमाणो ऽपि दर्शयन् दारुणं वपुः।
व्याघ्रचर्मप्रतिच्छन्नो वाक्कृते रासभो हतः ॥ ५२ ॥

मकर आह। कथमेतत्। वानरः कथयति। अस्ति कस्मिंश्चिद्

कथा ॥७॥ धिष्ठाने शुद्धपटो नाम रजकः प्रतिवसति स्म। तस्य च गर्दभ एको ऽस्ति। सो ऽपि घासाभावादतिदुर्बलतां गतः। अथ तेन रजकेनाटव्यां परिभ्रमता मृतव्याघ्रो दृष्टः। चिन्तितं च। अहो शोभनमापतितं। अनेन व्याघ्रचर्मणा प्रतिच्छाद्य रासभं रात्रौ यवक्षेत्रेषूत्स्रक्ष्यामि। येन व्याघ्रं मत्वा समीपवर्तिनः क्षेत्रपाला एनं न निःकासयिष्यन्ति। तथानुष्ठिते रासभो यथेच्छया यवभक्षणं करोति। प्रत्यूषे भूयो ऽपि रजकः स्वाश्रयं नयति। एवं गच्छता कालेन स रासभः पीवरतनुर्जातः। कृच्छ्राद्बन्धनस्थानमपि नीयते। अथान्यस्मिन्नहनि स मदोद्धतो दूराद्रासभीशब्दमशृणोत्। तच्छ्रवणमात्रेणैव स्वयं शब्दयितुमारब्धः। अथ ते क्षेत्रपाला रासभो ऽयं व्याघ्रचर्मप्रतिच्छन्न इति ज्ञात्वा लगुडशरपाषाणप्रहारैस्तं व्यापादितवन्तः। अतो ऽहं ब्रवीमि।

सुगुप्तं रक्षमाणो ऽपि दर्शयन् दारुणं वपुः।
व्याघ्रचर्मप्रतिच्छन्नो वाक्कृते रासभो हतः॥५३॥

अथैवं तेन सह वदतो मकरस्य जलचरेणैकेनागत्याभिहितं। भो मकर त्वदीया भार्यानशनोपविष्टा त्वयि चिरयति प्रणयाभिभवाद्विपन्ना। एवं तद्वज्रपातसदृशवचनमाकर्ण्यातीव व्याकुलितहृदयः प्रलपितमेवं चकार। अहो किमिदं सञ्जातं मे मन्दभाग्यस्य। उक्तं च।

माता यस्य गृहे नास्ति भार्या च प्रियवादिनी।
अरण्यं तेन गन्तव्यं यथारण्यं तथा गृहं॥५४॥

तन्मित्र क्षम्यतां मया ते ऽपराधः कृतः। सम्प्रत्यहं तु स्त्रीवियोगाद्वैश्वानरप्रवेशं करिष्यामि। तच्छ्रुत्वा वानरः प्रहसन् प्रोवाच। भो ज्ञातस्त्वं मया प्रथममेव यत् त्वं स्त्रीवश्यः स्त्रीजितश्च। साम्प्रतं च प्रत्ययः सञ्जातः। तन्मूढ आनन्दे ऽपि जाते त्वं विषादं गतः। तादृग्भार्यायां मृतायामुत्सवः कर्तुं प्रयुज्यते। उक्तं च यतः।

या भार्या दुष्टचारित्रा सततं कलहप्रिया।

भार्यारूपेण सा ज्ञेया विदग्धैर्दारुणा जरा ॥५५॥
तस्मात् सर्वप्रयत्नेन नामापि परिवर्जयेत् ।
स्त्रीणामिह हि सर्वासां य इच्छेत् सुखमात्मनः ॥५६॥
यदन्तस्तन्न जिह्वायां यज्जिह्वायां न तद्बहिः ।
यद्बहिस्तन्न कुर्वन्ति विचित्रचरित्राः स्त्रियः ॥५७॥
के नाम न विनश्यन्ति मिथ्याज्ञानान्नितम्बिनीं ।
रम्यां य उपसर्पन्ति दीपाभां शलभा यथा ॥५८॥
अन्तर्विषमया ह्येता बहिश्चैव मनोरमाः ।
गुञ्जाफलसमाकाराः स्वभावादेव योषितः ॥५९॥
ताडिता अपि दण्डेन शस्त्रैरपि विखण्डिताः ।
न वशं योषितो यान्ति न दानैर्न च संस्तवैः ॥६०॥
आस्तां तावत् किमन्येन दौरात्म्येनेह योषितां ।
विधृतं स्वोदरेणापि घ्नन्ति पुत्रं स्वकं रुषा ॥६१॥
रूक्षायां स्नेहसद्भावं कठोरायां सुमार्दवं ।
नीरसायां रसं बालो बालिकायां विकल्पयेत् ॥६२॥

मकर आह । भो मित्र अस्त्येतत् । परं किं करोमि । ममानर्थद्वयमेतत् सञ्जातं । एकस्तावद्गृहभङ्गः । अपरस्त्वद्विधेन मित्रेण सह चित्तविश्लेषः । अथवा भवत्येवं दैवयोगात् । उक्तं च यतः ।

यादृशं मम पाण्डित्यं तादृशं द्विगुणं तव ।
नाभूज्जारो न भर्ता च किं निरीक्षसि नग्निके ॥६३॥

कथा ८॥

वानर आह । कथमेतत् । मकरो ऽब्रवीत् । अस्ति कस्मिंश्चिदधिष्ठाने हालिकदम्पती प्रतिवसतः स्म । सा च हालिकभार्या पत्युर्वृद्धभावात् सदैवान्यचित्ता न कथञ्चिद्गृहे स्थैर्यमालम्बते । केवलं परपुरुषानन्वेषमाणा परिभ्रमति । अथ केनचित् परवित्तापहारकेण धूर्तेन सा लक्षिता विजने प्रोक्ता च । सुभगे मृतभार्यो ऽहं ।

त्वद्दर्शनेन स्मरपीडितश्च । तदीयतां मे रतिदक्षिणा । ततस्तयाभिहितं । भो सुभग यद्येवं तदस्ति मे पत्युः प्रभूतं धनं । स च वृद्धत्वात् प्रचलितुमप्यसमर्थः । ततस्तद्धनमादायाहमागच्छामि । येन त्वया सहान्यत्र गत्वा यथेच्छया रतिसुखमनुभविष्यामि । सो ऽब्रवीत् । रोचते मह्यमप्येतत् । तत् प्रत्यूषे ऽत्र स्थाने शीघ्रमेव समागन्तव्यं येन शुभतरं किञ्चिन्नगरं गत्वा त्वया सह जीवलोकः सफलीक्रियते । सापि तथेति प्रतिज्ञाय प्रहसितवदना स्वगृहं गत्वा रात्रौ प्रसुप्ते भर्तरि सर्वं वित्तमादाय प्रत्यूषसमये तत्कथितस्थानमुपाद्रवत् । धूर्तो ऽपि तामग्रे विधाय दक्षिणां दिशमाश्रित्य सत्वरगतिः प्रस्थितः । एवं तयोर्व्रजतोर्योजनद्वयमात्रेणाग्रतः काचिन्नदी समुपस्थिता । तां दृष्ट्वा धूर्तश्चिन्तयामास । किमहमनया यौवनप्रान्तवर्तमानया । किञ्च कदाप्यस्याः पृष्ठतः को ऽपि समेष्यति । तन्मे महाननर्थः स्यात् । तत् केवलमस्या वित्तमादाय गच्छामीति निश्चित्य तामुवाच । प्रिये सुदुस्तरेयं महानदी । तदहं द्रव्यमात्रां पारे धृत्वा समागच्छामि । ततस्त्वामेकाकिनीं स्वपृष्ठमारोप्य सुखेनोत्तारयिष्यामि । सा प्राह । सुभग एवं क्रियतां । इत्युक्त्वाशेषं वित्तं तस्मै समर्पयामास । अथ तेनाभिहितं । भद्रे परिधानाच्छादनवस्त्रमपि समर्पय । येन जलमध्ये निःशङ्का व्रजसि । तथानुष्ठिते धूर्तो वित्तं वस्त्रयुगलं चादाय यथाचिन्तितविषयं गतः । सापि कण्ठनिवेशितहस्तयुगला सोद्वेगा नदीपुलिनप्रदेश उपविष्टा यावत्तिष्ठति । तावदेतस्मिन्नन्तरे काचिच्छृगालिका मांसपिण्डगृहीतवदना तत्राजगाम । आगत्य च यावत् पश्यति । तावन्नदीतीरे महान् मत्स्यः सलिलान्निःक्रम्य बहिःस्थित आस्ते । एतं च दृष्ट्वा सा मांसपिण्डं समुत्सृज्य तं मत्स्यं प्रत्युपाद्रवत् । अत्रान्तर आकाशादवतीर्य को ऽपि गृध्रस्तं मांसपिण्डमादाय पुनः खमुत्पपात । मत्स्यो ऽपि शृगालिकां दृष्ट्वा नद्यां प्रविवेश । अथ सा शृगालिका व्यर्थश्रमा गृध्रमवलोकयन्ती

तया नग्निकया सस्मितमभिहिता ।

गृध्रेणापहृतं मांसं मत्स्यो ऽपि सलिलं गतः ।
मत्स्यमांसपरिभ्रष्टे किं निरीक्षसि जम्बुके ॥६४॥

तच्छ्रुत्वा शृगालिका तामपि पतिधनजारपरिभ्रष्टां दृष्ट्वा सोपहासमाह ।

यादृशं मम पाण्डित्यं तादृशं द्विगुणं तव ।
नाभूज्जारो न भर्ता च किं निरीक्षसि नग्निके ॥६५॥

एवं तस्य कथयतः पुनरन्येन जलचरेणागत्य निवेदितं । यदहो त्वदीयं गृहमप्यपरेण महामकरेण गृहीतं । तच्छ्रुत्वासावतिदुःखितमनास्तं गृहान्निःसारयितुमुपायं चिन्तयन्नुवाच । अहो पश्यतां मे दैवोपहतत्वं । मित्रं ह्यमित्रतां यातं । अपरं मे प्रिया मृता । गृहमन्येन च व्याप्तं । किमद्यापि भविष्यति । अथवा युक्तमिदमुच्यते ।

क्षते प्रहारा निपतन्त्यभीक्ष्णमन्नक्षये वर्द्धति जाठराग्निः ।
आपत्सु वैराणि समुद्भवन्ति वामे विधौ सर्वमिदं नराणां ॥६६॥

तत् किं करोमि । किमनेन सह युद्धं करोमि । किं वा साम्नैव सम्बोध्य गृहान्निःसारयामि । किं वा भेदं दानं वा करोमि । अथवामुमेव वानरमित्रं पृच्छामि । उक्तं च ।

यः पृष्ट्वा कुरुते कार्यं प्रष्टव्यान् स्वहितान् गुरून् ।
न तस्य जायते विघ्नः कस्मिंश्चिदपि कर्मणि ॥६७॥

एवं सम्प्रधार्य भूयो ऽपि तमेव जम्बूवृक्षमारूढं कपिमपृच्छत् । भो मित्र पश्य मे मन्दभाग्यतां । यत् सम्प्रति गृहमपि मे बलवत्तरेण मकरेण रुद्धं । तदहं त्वां प्रष्टुमभ्यागतः । कथय किं करोमि । सामादीनामुपायानां मध्ये कस्यात्र विषयः । स आह । भो कृतघ्न पापचारिन् मया निषिद्धो ऽपि किं भूयो मामनुसरसि । नाहं तव मूर्खस्योपदेशमपि दास्यामि । तच्छ्रुत्वा मकरः प्राह । भो मित्र सापराधस्य मे पूर्वस्नेहमनुस्मृत्य हितोपदेशं देहि । वानर आह । नाहं ते कथ

विष्यामि। यद्भार्यावाक्येन भवताहं समुद्रे प्रक्षेप्तुं नीतः। तदेव न युक्तं। यद्यपि भार्या सर्वलोकादपि वल्लभा भवति। तथापि न मित्राणि बान्धवाश्च भार्यावाक्येन समुद्रे प्रक्षिप्यन्ते। तन्मूर्ख मूढत्वेन नाशस्तव मया प्रागेव निवेदित आसीत्। यतः

सतां वचनमादिष्टं मदेन न करोति यः।
स विनाशमवाप्नोति घण्टोष्ट्र इव सत्वरं ॥ ६८ ॥

कथा ॥१॥ मकर आह। कथमेतत्। सो ऽब्रवीत्। अस्ति कस्मिंश्चिदधिष्ठान उज्जलको नाम रथकारः प्रतिवसति स्म। स चातीव दारिद्र्योपहतश्चिन्तितवान्। अहो धिगियं दरिद्रतास्मद्गृहे। यतः सर्वो ऽपि जनः स्वकर्मण्येव रतस्तिष्ठति। अस्मदीयः पुनर्व्यापारो नात्राधिष्ठाने ऽर्घति। यतः सर्वलोकानां चिरन्तनाश्चतुर्भूमिका गृहाः सन्ति। मम च नात्र। तत् किं मदीयेन रथकारत्वेन प्रयोजनं। इति चिन्तयित्वा देशान्निःक्रान्तः। यावत् किञ्चिद्वनं गच्छति। तावद्गह्वराकारवनगहनमध्ये सूर्यास्तमनवेलायां स्वयूथाद्भ्रष्टां प्रसववेदनया पीड्यमानामुष्ट्रीमपश्यत्। स च दासेरकयुक्तामुष्ट्रीं गृहीत्वा स्वस्थानाभिमुखः प्रस्थितः। गृहमासाद्य रज्जुं गृहीत्वा तामुष्ट्रिकां बबन्ध। ततश्च तीक्ष्णं परशुमादाय तस्याः कृते पल्लवानयनार्थं पर्वतैकदेशे गतः। तत्र च नूतनानि कोमलानि बहूनि पल्लवानि छित्वा शिरसि समारोप्य तस्याग्रे निचिक्षेप। तया च तानि शनैः शनैर्भक्षितानि। पश्चात् पल्लवभक्षणप्रभावादहर्निशं पीवरतनुरुष्ट्री सञ्जाता। सो ऽपि दासेरको महानुष्ट्रः सञ्जातः। ततः स नित्यमेव दुग्धं गृहीत्वा स्वकुटुम्बं परिपालयति। अथ रथकारेण वल्लभत्वाद्दासेरकग्रीवायां महती घण्टा प्रतिबद्धा। पश्चाद्रथकारो व्यचिन्तयत्। अहो किमन्यैः दुष्कृतकर्मभिः। यावन्ममैतदेवोष्ट्रीपरिपालनमस्य कुटुम्बस्य भव्यं सञ्जातं। तत् किमन्येन व्यापारेण। एवं विचिन्त्य गृहमागत्य प्रियामाह। भद्रे तव

सम्मत्या समीचीनो ऽयं व्यापारः। तत् कुतो ऽपि धनिकात् किञ्चिद्द्रव्यमादाय मया गुर्जरदेशे गन्तव्यं कलभग्रहणाय। तावत् त्वयैतौ यत्नेन रक्षणीयौ। यावदहमपरामुष्ट्रीं नीत्वा समागच्छामि। ततश्च गुर्जरग्रामं गत्वोष्ट्रीं गृहीत्वा स्वगृहमागतः। किं बहुना तेन तथा कृतं यथा तस्य प्रचुरा उष्ट्राः करभाश्च सम्मिलिताः। ततस्तेन महदुष्ट्रयूथं कृत्वा रक्षापुरुषो धृतः। तस्य वर्षं प्रति वृत्त्या करभमेकं प्रयच्छति। अन्यदहर्निशं दुग्धपानं तस्य कृतं। एवं रथकारो ऽपि नित्यमेवोष्ट्रीकरभव्यापारं कुर्वन् सुखेन तिष्ठति। अथ ते दासेरका अधिष्ठानोपवन आहारार्थं गच्छन्ति। कोमलवल्लीर्यथेच्छया भक्षयित्वा महति सरसि पानीयं पीत्वा सायन्तनसमये मन्दं मन्दं लीलया गृहमागच्छन्ति। स च पूर्वदासेरको मदातिरेकात् पृष्ठ आगत्य मिलितः। ततस्तैः कलभैरभिहितं। अहो मन्दमतिरयं दासेरको यथा यूथाद्भ्रष्टः पृष्ठे स्थित्वा घण्टां वादयन्नागच्छति। यदि कस्यापि दुष्टसत्त्वस्य देशे पतिष्यति। तन्नूनं मृत्युमवाप्स्यति। अथ तेषां तद्वनं गाहमानानां कश्चित् सिंहो घण्टारवमाकर्ण्य समायातः। यावदवलोकयति तावदुष्ट्रीदासेरकाणां यूथं गच्छति। एकस्तु पुनः पृष्ठे क्रीडां कुर्वन् वल्लरीश्चरन् यावत्तिष्ठति। तावदन्ये दासेरकाः पानीयं पीत्वा स्वगृहे गताः। सो ऽपि वनान्निष्क्रम्य यावद्दिशो ऽवलोकयति। तावन्न कश्चिन्मार्गं पश्यति वेत्ति च। यूथाद्भ्रष्टो मन्दं मन्दं बृहच्छब्दं कुर्वन् यावत् कियद्दूरं गच्छति। तावत् तच्छब्दानुसारी सिंहो ऽपि क्रमं कृत्वा निःसृतो ऽग्रे व्यवस्थितः। तद्यावदुष्ट्रः समीपमागतः। तावत् सिंहेन लङ्घयित्वा ग्रीवायां गृहीतो मारितश्च। अतो ऽहं ब्रवीमि।

सतां वचनमादिष्टं मदेन न करोति यः।
स विनाशमवाप्नोति घण्टोष्ट्र इव सत्वरं ॥६१॥

अथ तच्छ्रुत्वा मकरः प्राह। भद्र

प्राज्ञः साप्तपदं मैत्र्यं जनाः शास्त्रविचक्षणाः ।
मित्रतां च पुरस्कृत्य किञ्चिद्वक्ष्यामि तच्छृणु ॥ ७० ॥
उपदेशप्रदातॄणां नराणां हितमिच्छतां ।
परस्मिन्निह लोके च व्यसनं नोपपद्यते ॥ ७१ ॥

तत् सर्वथा कृतघ्नस्यापि मे कुरु प्रसादमुपदेशप्रदानेन । उक्तं च ।

उपकारिषु यः साधुः साधुत्वे तस्य को गुणः ।
अपकारिषु यः साधुः स साधुः सद्भिरुच्यते ॥ ७२ ॥

तदाकर्ण्य वानरः प्राह । भद्र यद्येवं तर्हि तत्र गत्वा तेन सह युद्धं कुरु । उक्तं चः ।

हतस्त्वं प्राप्स्यसि स्वर्गं जीवन् गृहमथो यशः ।
युध्यमानस्य ते भावि गुणद्वयमनुत्तमं ॥ ७३ ॥
उत्तमं प्रणिपातेन शूरं भेदेन योजयेत् ।
नीचमल्पप्रदानेन समशक्तिं पराक्रमैः ॥ ७४ ॥

कथा ॥१०॥ मकर आह । कथमेतत् । सो ऽब्रवीत् । अस्ति कस्मिंश्चिद्वनो द्देशे महाचतुरको नाम शृगालः । तेन कदाचिदरण्ये स्वयम्मृतो गजः समासादितः । तस्य समन्तात् परिभ्रमति । परं कठिनां त्वचं भेत्तुं न शक्नोति । अथात्रावसर इतश्चेतश्च विचरन् कश्चित् सिंहस्तत्रैव प्रदेशे समाययौ । अथ समागतं दृष्ट्वा स क्षितितलविन्यस्तमौलिमण्डलः संयोजितकरयुगलः सविनयमुवाच । स्वामिन् त्वदीयो ऽहं लागुडिकः स्थितस्त्वदर्थे गजमिमं रक्षामि । तदेनं भक्षयतु स्वामी । तं प्रणतं दृष्ट्वा सिंहः प्राह । भो नाहमन्येन हतं सत्त्वं कदाचिदपि भक्षयामि । उक्तं चः ।

वने ऽपि सिंहा मृगमांसभुक्ता बुभुक्षिता नैव तृणं चरन्ति ।
एवं कुलीना व्यसनाभिभूता न नीतिमार्गं परिलङ्घयन्ति ॥ ७५ ॥

तत् तवैव गजो ऽयं मया प्रसादीकृतः । तच्छ्रुत्वा शृगालः सानन्द

माह। युक्तमिदं स्वामिनो निजभृत्येषु। उक्तं च यतः।

अन्त्यावस्थो ऽपि महान् स्वामिगुणान्न जहाति तु शुद्धतया।
न श्वेतभावमुज्झति शङ्खः शिखिभुक्तिमुक्तो ऽपि ॥७६॥

अथ सिंहे गते कश्चिद्व्याघ्रः समाययौ। तमपि दृष्ट्वासौ व्यचिन्तयत्। अहो एकस्तावत् दुरात्मा प्रणिपातेनापवाहितः। तत् कथमिदानीमेनमपवाहयिष्यामि। नूनं शूरो ऽयं। न खलु भेदं विना साध्यो भविष्यति। उक्तं च यतः।

न यत्र शक्यते कर्तुं साम दानमथापि वा।
भेदस्तत्र प्रयोक्तव्यो यतः स वशकारकः ॥७७॥

किञ्च सर्वगुणसम्पन्नो ऽपि भेदेन बध्यते। उक्तं च।

अन्तःस्थेन विरुद्धेन सुवृत्तेनातिचारुणा।
अन्तर्भिन्नेन सम्प्राप्तं मौक्तिकेनापि बन्धनं ॥७८॥

एवं सम्प्रधार्य तस्याभिमुखो भूत्वा गर्वादुन्नतकन्धरः ससम्भ्रममुवाच। माम कथमत्र भवान् मृत्युमुखे प्रविष्टः। येनैष गजः सिंहेन व्यापादितः। स च मामेतद्रक्षणे नियुज्य नद्यां स्नानार्थं गतः। तेन च गच्छता मम समादिष्टं। यदि कश्चिदिह व्याघ्रः समायाति। तत् त्वया सुगुप्तं ममावेदनीयं। येन वनमिदं मया निर्व्याघ्रं कर्तव्यं। यतः पूर्वं व्याघ्रेणैकेन मया व्यापादितो गजः शून्ये भक्षयित्वोच्छिष्टतां नीतः। तद्दिनादारभ्य व्याघ्रान् प्रति प्रकुपितो ऽस्मि। तच्छ्रुत्वा व्याघ्रः सन्त्रस्तस्तमाह। भो भागिनेय देहि मे प्राणदक्षिणां। ततस्त्वया तस्यात्र चिरायायातस्यापि मदीया कापि वार्ता नाख्येया। एवमभिधाय सत्वरं पलायांचक्रे। अथ गते व्याघ्रे तत्र कश्चिद्द्वीपी समायातः। तमपि दृष्ट्वासौ व्यचिन्तयत्। दृढदंष्ट्रो ऽयं चित्रकः। तदस्य पार्श्वादस्य गजस्य यथा चर्मच्छेदं भवति तथा करोमि। एवं निश्चित्य तमप्युवाच। भो भगिनीसुत किमतिचिराद्दृष्टो ऽसि। कथं च बुभुक्षित इव लक्ष्यसे।

तदतिथिरसि मे। एषो गजः सिंहेन हतस्तिष्ठति। अहं चास्य तदा दिष्टो रक्षपालः। परं तथापि यावत् सिंहो न समायाति। तावदस्य गजस्य मांसं भक्षयित्वा तृप्तिं कृत्वा द्रुततरं व्रज। स आह। माम यद्येवं तन्न कार्यं मे मांसाशनेन। यतो जीवन्नरो भद्रशतानि पश्यति।

उक्तं च। यच्छक्यं ग्रसितुं ग्रासं ग्रस्तं परिणमेच्च यत्।
हितं च परिणामि यत् तदद्यं भूतिमिच्छता ॥७९॥

तत् सर्वथा तदेव भुज्यते यदेव परिणमति। तदहमितो ऽपयास्यामि। शृगाल आह। भो ऽधीर विश्रब्धो भूत्वा भक्षय त्वं। तस्यागमनं दूरतो ऽपि तवाहं निवेदयिष्यामि। तथानुष्ठिते द्वीपिना भिन्नां त्वचं विज्ञाय जम्बुकेनाभिहितं। भो भगिनीसुत गम्यतां गम्यतां। एष सिंहः समायाति। तच्छ्रुत्वा चित्रको दूरं प्रनष्टः। अथ यावदसौ तद्भेदकृतद्वारेण किञ्चिन्मांसं भक्षयति। तावदतिसङ्क्रुद्धो ऽपरः शृगालः समाययौ। अथ तमात्मतुल्यजातपराक्रमं दृष्ट्वैनं श्लोकमपठत्।

उत्तमं प्रणिपातेन शूरं भेदेन योजयेत्।
नीचमल्पप्रदानेन समशक्तिं पराक्रमैः ॥८०॥

तदभिमुखकृतप्रयाणः स्वदंष्ट्राभिस्तं विदार्य दिशोभागं कृत्वा स्वयं सुखेन चिरकालं हस्तिमांसं बुभुजे। एवं त्वमपि तं रिपुं स्वजातीयं युद्धेन परिभूय दिशोभागं कुरु। नो चेत् पश्चाद्बद्धमूलादस्मात् त्वमपि विनाशमवाप्स्यसि। उक्तं च यतः।

सम्भाव्यं गोषु सम्पन्नं सम्भाव्यं ब्राह्मणे तपः।
सम्भाव्यं स्त्रीषु चापल्यं सम्भाव्यं जातितो भयं ॥८१॥

अन्यच्च। सुभिक्षाणि विचित्राणि शिथिलाः पौरयोषितः।
एको दोषो विदेशस्य स्वजातिर्यद्विरुध्यते ॥८२॥

कथा ॥११॥ मकर आह। कथमेतत्। वानरो ऽब्रवीत्। अस्ति कस्मिंश्चिदधिष्ठाने चित्राङ्गो नाम सारमेयः। तत्र च चिरकालं दुर्भिक्षं पतितं।

अन्नाभावात् सारमेयादयो निष्कुलतां गन्तुमारब्धाः। अथ चित्राङ्गः क्षुत्क्षामकण्ठस्तद्भयाद्देशान्तरं गतः। तत्र च कस्मिंश्चित् पुरे कस्यचिद्गृहमेधिनो गृहिण्याः प्रमादेन प्रतिदिनं गृहं प्रविश्य विविधान्नानि भक्षयन् परां तृप्तिं गच्छति। परं तद्गृहाद्बहिर्निष्क्रान्तो ऽन्यैर्मदोद्धतसारमेयैः सर्वदिक्षु परिवृत्य सर्वाङ्गं दंष्ट्राभिर्विदार्यते। ततस्तेन विचिन्तितं। अहो वरं स्वदेशो यत्र दुर्भिक्षे ऽपि सुखेन स्थीयते। न च को ऽपि युद्धं करोति। तदेव स्वनगरं व्रजामि। इत्यवधार्य स्वस्थानं प्रतिजगाम। अथासौ देशान्तरात् समायातः सर्वैरपि स्वजनैः पृष्टः। भो चित्राङ्ग कथयास्माकं देशान्तरवार्तां। कीदृग्देशः। किं चेष्टितं लोकस्य। क आहारः। कश्च व्यवहारस्तत्रेति। स आह। किं कथ्यते विदेशस्य स्वरूपविषयः।

सुभिक्षाणि विचित्राणि शिथिलाः पौरयोषितः।
एको दोषो विदेशस्य स्वजातिर्यद्विरुध्यते ॥८३॥

सो ऽपि मकरस्तदुपदेशं श्रुत्वा कृतमरणनिश्चयो वानरमनुज्ञाप्य स्वाश्रयं गतः। तत्र च तेन स्वगृहप्रविष्टेनाततायिना सह विग्रहं कृत्वा दृढसत्त्वावष्टम्भनाच्च तं व्यापाद्य स्वाश्रयं च लब्ध्वा सुखेन चिरकालमतिष्ठत्। साध्विदमुच्यते।

अकृत्य पौरुषं या श्रीः किं तयापि सुभोग्यया।
जरद्गवो ऽपि समश्नाति दैवादुपगतं तृणं ॥८४॥

इति श्रीविष्णुशर्मविरचिते पञ्चतन्त्रके
लब्धप्रणाशो नाम चतुर्थं तन्त्रं
समाप्तं

---

अथेदमारभ्यते ऽपरीक्षितकारितं नाम पञ्चमं तन्त्रं। तस्यायमाद्यः श्लोकः।

कुदृष्टं कुपरिज्ञातं कुश्रुतं कुपरीक्षितं।
तन्नरेण न कर्तव्यं नापितेनेह यत् कृतं ॥ १॥

तद्यथानुश्रूयते। अस्ति दाक्षिणात्ये जनपदे पाटलिपुत्रं नाम नगरं। तत्र च मणिभद्रो नाम श्रेष्ठी प्रतिवसति स्म। तस्य धर्मार्थकाममोक्षकर्माणि कुर्वतो विधिवशाद्धनक्षयः सञ्जातः। ततश्च विभवक्षयादपमानपरम्परया परं विषादमगमत्। अथान्यदा रात्रौ चिन्तितवान्। अहो धिगियं दरिद्रता। उक्तं च यतः।

शीलं शौचं क्षान्तिर्दाक्षिण्यं मधुरता कुले जन्म।
न विराजन्ति हि सर्वे वित्तविहीनस्य पुरुषस्य ॥ २॥
मानो वा दर्पो वा विज्ञानं विभ्रमः सुबुद्धिर्वा।
सर्वं प्रणश्यति समं वित्तविहीनो यदा पुरुषः ॥ ३॥
प्रतिदिवसं याति लयं वसन्तवाताहतेव शिशिरश्रीः।
बुद्धिर्बुद्धिमतामपि कुटुम्बभारस्य चिन्ताभिः ॥ ४॥
विपुलमतेरपि नश्यति बुद्धिः पुरुषस्य मन्दविभवस्य।
घृतलवणतैलतण्डुलवस्त्रेन्धनचिन्तया सततं ॥ ५॥
गगनमिव नष्टतारं शुष्कमिव सरः श्मशानमिव रौद्रं।
प्रियदर्शनमपि रूक्षं भवति गृहं धनविहीनस्य ॥ ६॥
न विभाव्यन्ते लघवो वित्तविहीनाः पुरो ऽपि निवसन्तः।

सततं ज्ञातविनष्टाः पयसामिव बुद्बुदाः पयसि ॥७॥
सुकुलं कुशलं सुजनं विहाय कुलकुशलशीलविकले ऽपि ।
आढ्ये कल्पतराविव नित्यं रज्यन्ति जननिवहाः ॥८॥
फलतीह पूर्वसुकृतं विद्यावन्तो ऽपि कुलसमुद्भूताः ।
यस्य यदा विभवः स्यात् तस्य तदा दासतां यान्ति ॥९॥
वदति गभीरं लोकः कामं गर्जन्तमपि पतिं पयसां ।
सर्वमलज्जाकरमिह यद्यत् कुर्वन्ति परिपूर्णाः ॥१०॥

इत्येवं सम्प्रधार्य भूयो ऽपि व्यचिन्तयत्। तदहमनशनं कृत्वा प्रातः प्राणानुत्सृजामि। किमनेन व्यर्थजीवितव्यसनेन। एवं निश्चयं कृत्वा प्रसुप्तः। अथ तस्य स्वप्ने पद्मनिधिः क्षपणकरूपी सन्दर्शनं गत्वा प्रोवाच। भो श्रेष्ठिन् मा त्वं वैराग्यं गच्छ। अहं पद्मनिधिस्तव पूर्वपुरुषोपार्जितः। तदनेनैव रूपेण प्रातस्तत्र गृहं समागमिष्यामि। तत् त्वयाहं शिरसि लगुडप्रहारेण ताडनीयः। येन कनकमयो ऽक्षयो भवामि। अथ प्रातः प्रबुद्धः स तं स्वप्नं स्मरंश्चिन्ताचक्रमारूढस्तिष्ठति। अहो सत्यो ऽयं स्वप्नः किं वासत्यो भविष्यति न ज्ञायते। अथवा नूनं मिथ्यानेन भाव्यं। यत्कारणादहमहर्निशं केवलं वित्तमेव चिन्तयामि। उक्तं च यतः।

व्याधितेन सशोकेन चिन्ताग्रस्तेन जन्तुना ।
कामार्त्तेन प्रमत्तेन दृष्टः स्वप्नः फलोज्झितः ॥११॥

एतस्मिन्नन्तरे तस्य भार्यायाः कश्चिन्नापितो नखप्रक्षालनार्थं समायातः। ततश्चासौ प्रक्षालनकर्म यावत् समाचरति। तावन्निर्दिष्टरूपः क्षपणकः सहसा प्रादुर्भूतः। अथ मणिभद्रस्तं समालोक्य प्रहृष्टमना आसन्नकाष्ठदण्डेन शिरसि तमाताडयत्। सो ऽपि सुवर्णमयो भूत्वा तत्क्षणादेव भूमौ निपपात। अथ स वणिक् तं गृहमध्ये संस्थाप्य यावद्विलोकयति। तावद्दृष्टो नापितः। स विलक्ष्य चिन्तितवान्। अहो कदा

चिदेष वृत्तान्तोदृष्टो भविष्यति। तदा विनष्टो ऽहं। इति विचिन्त्य तं नापितं सन्तोष्य प्रोवाच। यदेतद्धनं वस्त्राणि च मया दत्तानि गृहाण। पुनर्भद्र न कस्यचिदाख्येयो ऽयमस्मद्वृत्तान्तः। नापितो ऽपि तद्वचनमङ्गीकृत्य स्वगृहं गत्वा व्यचिन्तयत्। नूनं सर्वे ऽप्येते नग्नकाः शिरसि काष्ठदण्डहताः काञ्चनमया भवन्ति। तदहमपि प्रातः प्रभूता नामन्त्र्य लगुडैर्हन्मि। येन मे प्रभूतं हाटकं भवति। इत्येवं तस्य चिन्तयतस्तद्दिनं निशा च कथमपि व्यतिचक्राम। अथ प्रभाते समुत्थाय क्षपणकविहारं गत्वोत्तरासङ्गं विधाय जिनस्य प्रदक्षिणात्रयं दत्त्वा जानुभ्यामवनीं गत्वा वक्त्रद्वारविन्यस्तोत्तरीयाञ्चलः कृताञ्जलिस्तारस्वरेणेमं श्लोकमपठत्।

ते जयन्ति जिना येषां केवलज्ञानशालिनां।
मनो भवाभिधे जीवे मानसेनोपराजितं ॥१२॥
सा जिह्वा या जिनं स्तौति तच्चित्तं यत् तदर्पितं।
तावेव केवलौ श्लाघ्यौ यौ तत्पूजकरौ करौ ॥१३॥

इत्येवमन्यदपि बहुधा संस्तुत्य प्रधानक्षपणकमासाद्य क्षितितलनिहितजानुचरणो नमो ऽस्तु वन्द इत्युक्त्वा लब्धधर्मवृद्ध्याशीर्वादः सुखमालिकानुग्रहलब्धव्रतादेश उत्तरीयनिबद्धग्रन्थिः सप्रश्रयमिदमाह। भगवन्नद्य विहरणक्रिया त्वया समस्तमुनिसहितेनास्मद्गृहे कर्तव्येति। स आह। भो श्रावक धर्मज्ञो ऽपि किमेवं वदसि। किं वयं ब्राह्मणा यदामन्त्रणं करोषि। यतो वयं सदैव तत्कालपरिचर्यया भ्रमन्तो भक्तिभाजं श्रावकमवलोक्य तस्य गृहे गच्छामः। कृच्छ्रादभ्यर्थिताः प्राणधारणमात्रामशनक्रियां कुर्मः। तद्गम्यतां न भूयो ऽप्येवं वाच्यं। तच्छ्रुत्वा नापितः प्राह। भगवन् वेद्मि। अहमेतत् करिष्यामि। परं भवतां प्रभूताः श्रावका अर्हणां कुर्वन्ति। अस्माभिस्तु पुनः पुस्तकच्छादनयोग्यानि पटिकर्पटादीनि बहुमूल्यानि प्रगुणीकृतानि सन्ति।

पुस्तकानां च लेखनाय लेखकानां वित्तं प्रदत्तमास्ते। तत् सर्वथा कालोचितमेव कर्तव्यमिति। एवमुक्त्वा स्वगृहं प्रति प्रस्थितः। गृहे गत्वा खदिरमयं लगुडं सज्जीकृत्य कपाटकोणैकदेशे संस्थाप्य सार्धप्रहरैकसमये भूयो ऽपि विहारद्वारमाश्रित्य स्थितः। ततश्च सर्वान् क्रमेण निष्क्रममाणान् गुरुप्रार्थनया स्वगृहमनयत्। ते ऽपि सर्वे कर्पटवित्तलोभेन भक्तियुक्तानपि परिचितश्रावकान् परित्यज्य प्रहृष्टास्तस्य पृष्ठतो जग्मुः। अथवा साध्विदमुच्यते।

एकाकी गृहसन्त्यक्तः पाणिपात्रो दिगम्बरः।
सो ऽपि संवाह्यते लोके तृष्णया पश्य कौतुकं ॥१४॥
जीर्यन्ते जीर्यतः केशा दन्ता जीर्यन्ति जीर्यतः।
चक्षुःश्रोत्रे च जीर्येते तृष्णैका तरुणायते ॥१५॥

ततो नापितो ऽपि गृहमध्ये तान् प्रवेश्य द्वारं निभृतं विधाय लगुडप्रहारैः शिरसि तानताडयत्। ते ऽपि ताड्यमाना एके पञ्चत्वमुपागता अन्ये भिन्नमस्तकाः फूत्कर्तुमारेभिरे। अत्रान्तरे तदाक्रन्दशब्दमाकर्ण्य पुरकोट्टपालपुरुषाः समागताः। तैरभिहितं। भो किमेष नगरमध्ये महान् कोलाहलः। तद्गम्यतां गम्यतामिति वदन्तः ते सर्वे तद्गृहं यावद्वेगाद्गत्वा पश्यन्ति। तावत् क्षपणका रुधिरप्लावितशरीरा नापितगृहात् पलायमाना दृष्टाः पृष्टाश्च। भो किमेतत्। ते प्रोचुर्यथावस्थितं नापितवृत्तान्तं। तैरपि नापितो दृढबन्धनबद्धो हतशेषक्षपणकैः सह धर्माधिष्ठानं नीतः। कारणिकैः पृष्टश्च। भो किमेतद्भवता कुकृत्यमनुष्ठितं। सो ऽब्रवीत्। भोः किं करोमि। मया श्रेष्ठिमणिभद्रगृहे दृष्ट एवंविधो व्यतिकरः। एतदभिधाय तेषां मणिभद्रवृत्तान्तं यथादृष्टमकथयत्। तैश्च मणिभद्राकारणाय कश्चित् प्रेषितः। तेन च गत्वा मणिभद्रः समानीतः। तैः स पृष्टः। भो श्रेष्ठिन् किं त्वया कश्चित् क्षपणकः व्यापादितः। ततस्तेनापि सर्वः क्षपणकवृ

त्तान्तः कथितः। अथ तैरभिहितं। अहो शूलायामारोप्यतामसौ कुपरीक्षितकारी दुरात्मा नापितः। तथानुष्ठिते तैरभिहितं।

अपरीक्ष्य न कर्तव्यं कर्तव्यं सुपरीक्षितं।
पश्चाद्भवति सन्तापो ब्राह्मण्या नकुलाद्यथा ॥१६॥

कथा ॥२॥ मणिभद्रः प्राह। कथमेतत्। ते प्रोचुः। अस्ति कस्मिंश्चिदधिष्ठाने देवशर्मा नाम ब्राह्मणः। तस्य भार्या प्रसूता पुत्रमेकं नकुलं च सुषुवे। अथ सा सुतवत्सला सुतवन्नकुलमपि स्तन्यदानाभ्यङ्गमर्दनादिभिः पुपोष। परमेष दुष्टजातित्वात् कदाचिदस्य दारकस्य विरुद्धमाचरिष्यतीति नकुलस्य न विश्वसिति। अथवा साधिदमुच्यते।

कुपुत्रो ऽपि भवेत् पुंसां हृदयानन्दकारकः।
दुर्विनीतः कुरूपो ऽपि मूर्खो ऽपि व्यसनी खलः ॥१७॥
एवं च भाषते लोकश्चन्दनं किल शीतलं।
पुत्रगात्रस्य संस्पर्शश्चन्दनादतिरिच्यते ॥१८॥
सौहृदस्य न वाञ्छन्ति जनकस्य हितस्य च।
लोकाः प्रायो न कस्यापि यथा पुत्रस्य बन्धनं ॥१९॥

अथ सा कदाचित् पुत्रं शय्यायां सुस्थितं विधाय जलकुम्भमादाय पतिमुवाच। भो उपाध्याय जलार्थं तडागे यास्यामि। पुत्रो ऽयं भवता नकुलाद्रक्षणीयः। अथ गतायां तस्यां ब्राह्मणो ऽपि गृहं शून्यीकृत्य स्वयमपि क्वचिद्भिक्षार्थं निर्ययौ। अत्रान्तरे कृष्णसर्पो बिलान्निष्क्रम्य दैववशात् तस्य बालकस्य पर्यङ्कान्तिकमागमत्। अथ नकुलस्तं स्वभाववैरिणं मत्वा स्वभ्रातृवधशङ्कयान्तराले सन्निपत्य दुष्टसर्पेण सह सङ्ग्रामं विधाय तं खण्डशः कृत्वा दूरतश्चिक्षेप। ततो निजशौर्यप्रमुदितो रुधिराप्लुतमुखः स्वव्यापारप्रकाशनाय मातुः सम्मुखमाजगाम। मातापि रुधिरक्लिन्नमुखं सुसंरब्धं तमागच्छन्तमवलोक्य। नूनं भक्षितो ऽनेन दुरात्मना मम दारक इति शङ्कितचित्ता कोपादविमृश्य तस्यो

परि जलपूर्णकुम्भं चिक्षेप। कुम्भपातमात्रगतजीवितं तं नकुलं तत्रैवावगणय्य यावत् स्वगृहमध्यं प्रविशति। तावद्बालकस्तथैव सुप्तस्तिष्ठति। तत्पर्यङ्कान्तिके च महान्तं कृष्णसर्पं खण्डशः कृतं ददर्श। अथ सोपकारकपुत्रस्यानालोचितकृतबधशोकेन दुःखितहृदयात्मा शिरोवक्षःस्थलादि ताडनमकरोत्। एतस्मिन्नवसरे ब्राह्मणो ऽपि कुतश्चिद्गृहीतनिर्वापः परिभ्रम्य यावदागतः पश्यति। तावत् पुत्रशोकाभिभूता ब्राह्मणी विलपति। भो भो लोभात्मन् लोभाभिभूतेन भवता यन्न कृतं ममापि वचनं तदनुभव साम्प्रतं निजदुःकृतवृक्षस्य पुत्रमृत्युदुःखफलं। अथवा भवत्येवैतदतिलोभान्धानां। उक्तं च यतः।

अतिलोभो न कर्तव्यो लोभं नैव परित्यजेत्।
अतिलोभाभिभूतस्य चक्रं भ्रमति मस्तके ॥२०॥

ब्राह्मण आह। कथमेतत्। ब्राह्मणी कथयति। इह कस्मिंश्चि कथा
दधिष्ठाने चत्वारो ब्राह्मणाः परस्परं दृढसौहृदाः प्रतिवसन्ति स्म। ॥३॥
ते चातिशयदारिद्र्योपहता मन्त्रयांचक्रिरे। अहो धिगयं दरिद्रभावः। उक्तं च।

वरं वनं व्याघ्रगजैः समन्वितं जनेन हीनं बहुकण्टकावृतं।
तृणानि शय्या परिधानवल्कलं न बन्धुमध्ये धनहीनजीवितं ॥२१॥

स्वामी द्वेष्टि सुसेवितो ऽपि सहसा प्रोज्झन्ति सद्बान्धवाः।
द्योतन्ते न गुणास्त्यजन्ति तनुजाः स्फारीभवन्त्यापदः।
भार्या नोत्तमवंशजापि भजते नो यान्ति मित्राणि च।
न्यायारोपितविक्रमानपि नरान् येषां न हि स्याद्धनं ॥२२॥

शूरः सुरूपः सुभगश्च वाग्मी शास्त्राणि सर्वाणि विदां करोतु।
अर्थं विना नैव कलाकलापं प्राप्नोति मर्त्यो ऽत्र मनुष्यलोके ॥२३॥

तद्वरं मरणं न च निर्धनत्वं। उक्तं च।

उत्तिष्ठ क्षणमेकमुद्वह सखे दारिद्र्यभारं मम।

श्रान्तस्तावदहं चिरान्मरणजं सेवे त्वदीयं सुखं ।
इत्युक्तो धनवर्जितेन सहसा गत्वा श्मशाने शवो ।
दारिद्र्यान्मरणं परं सुखमिति ज्ञात्वैव तूष्णीं स्थितः ॥२४॥

तत् सर्वथार्थार्जने यतितव्यं । इति सम्प्रधार्य देशान्तरगमनं च निश्चित्य गृहं सुहृज्जनं च परित्यज्य चत्वारो ऽपि प्रस्थिताः । अथवा साध्विदमुच्यते ।

सत्यं परित्यजति मुञ्चति बन्धुवर्गं ।
शीघ्रं विहाय जननीमपि जन्मभूमिं ।
सन्त्यज्य गच्छति विदेशमनिष्टलोकं ।
वित्ताकुलीकृतमतिः पुरुषः किमन्यः ॥२५॥

एवं च क्रमेणावन्तिविषयं प्रापुः । तत्र च सिप्राजले स्नात्वा श्रीमहाकालदेवं च प्रणम्य यावदग्रतो गच्छन्ति । तावद्भैरवानन्दो नाम योगीन्द्रः सम्मुखो बभूव । तं च ब्राह्मणोचितविधिना सम्भाष्य ते सर्वे तेनैव सह तस्य मठं जग्मुः । अथ ते योगिना पृष्टाः । कुतो भवन्तः समायाताः । क्व यास्यथ । किं प्रयोजनं । ततस्तैरभिहितं । वयं सिद्धयात्रिकाः । तत्र यास्यामो यत्र धनतृप्तिर्मृत्युर्वा भविष्यतीति । एष निश्चयः । उक्तं च ।

पतति कदाचिन्नभसः खाते पातालतो ऽपि जलमेति ।
दैवमचिन्त्यं बलवद्बलवान्न तु पुरुषकारो ऽपि ॥२६॥
अभिमतसिद्धिरशेषा भवति हि पुरुषस्य पुरुषकारेण ।
दैवमिति यदपि कथयसि पुरुषगुणः सो ऽप्यदृष्टाख्यः ॥२७॥
क्लेशस्याङ्गमदत्वा सुखमेव सुखानि नेह लभ्यन्ते ।
मधुभिन्मथनायस्तैराश्लिष्यति बाहुभिर्लक्ष्मीं ॥२८॥
दुरधिगमः परभागो यावत् पुरुषेण साहसं न कृतं ।
जयति तुलामधिरूढो भास्वानपि जलदपटलानि ॥२९॥

तत् कथ्यतामस्माकं कश्चिदर्थार्जनोपायो विवरप्रवेशश्मशानसेवनशाकिनीसाधनमहामांसविक्रयसाधकवर्तिप्रभृतीनामेकतम इति। त्वं चात्यद्भुतसिद्धिः श्रूयसे। वयं चातिसाहसिकाः। उक्तं च।

महान्त एव महतामर्थं साधयितुं क्षमाः।
ऋते समुद्रादन्यः को बिभर्ति बडवानलं ॥३०॥

भैरवानन्दो ऽपि तेषां शिष्याणां योग्यतां विज्ञाय सिद्धवर्तिचतुष्टयं कृत्वा प्रत्येकमर्पयामास। आह च। गम्यतां हिमाचलोत्तरदिग्विभागे। यत्र यस्य वर्तिः पतिष्यति। तत्र तेनासन्दिग्धं निधिरवाप्यः। तथानुष्ठिते तेषां गच्छतामेकतमस्याग्रेसरस्य हस्ताद्वर्तिः क्षितौ निपपात। अथासौ यावत् तं प्रदेशं खनति। तावत् ताम्रमयी भूमिः। ततस्तेनाभिहितं। अहो गृह्यतां यथेच्छं ताम्रमिदं। अथान्ये प्राहुः। भो मूढ किमनेन। यत् प्रभूतमपि दारिद्र्यं न नाशयति। तदुत्तिष्ठ। अग्रतो गच्छामः। सो ऽब्रवीत्। यान्तु भवन्तः। नाहमग्रतः समेष्यामि। एवमभिधाय ताम्रं यथेच्छया गृहीत्वा प्रथमो निवृत्तः। शेषास्त्रयो ऽप्यग्रतः प्रस्थिताः। अथ किञ्चिन्मात्रं गतस्याग्रेसरस्य वर्तिर्निपपात। सो ऽपि यावत् खनति। तावद्रूप्यमयी भूमिः। ततः प्रहर्षितः प्राह। भो गृह्यतां यथेच्छं रूप्यं। नाग्रे गन्तव्यमिति। तावूचतुः। भो मूर्ख पृष्ठतस्ताम्रमयी भूमिः। अत्र रूप्यमयी भूमिः। तन्नूनमग्रतः सुवर्णमयी भविष्यति। तदनेन प्रभूतेनापि दारिद्र्यनाशो न भविष्यति। तदावामग्रे यास्यावः। ततः स प्राह। यातां भवन्तौ। नाहमागमिष्यामि। एवमभिधाय स्वशक्त्या रूप्यं गृहीत्वा गृहं प्रति निवृत्तः। अथ तयोरपि गच्छतोरेकस्य वर्तिर्निपपात। सो ऽपि यावत् खनति। तावत् सुवर्णमयी भूमिः। तां दृष्ट्वा प्रहृष्टो द्वितीयमाह। भो गृह्यतां सुवर्णं यथेच्छं। नातः परं किञ्चिदुत्तममस्ति। सो ऽब्रवीत्। मूढ किं न वेत्सि। प्राक् ताम्रं ततो रूप्यं ततश्च सुवर्णं प्राप्तं। तन्नू

नमतः परं रत्नानि भविष्यन्ति येषामेकतमेनापि दारिद्र्यनाशो भविष्यति। तदुत्तिष्ठ। अग्रतो गच्छावः। किमनेन प्रभूतेनापि भारभूतेन। सो ऽब्रवीत्। गच्छतु भवान्। अहमत्रैव स्थितस्त्वां प्रतिपालयिष्यामि। तथानुष्ठिते सो ऽपि गच्छन्नेकाकी ग्रीष्मार्ककिरणसन्तप्तगात्रः पिपासाकुलितचित्तः सिद्धभूमिमार्गच्युत इतश्चेतश्च बभ्राम। अथ स भ्रमन् स्थलोपरि मस्तकोपरिभ्रमच्चक्रं रुधिरक्लिन्नकलेवरं पुरुषमेकमपश्यत्। ततो द्रुततरं गत्वा तमवोचत। भो को भवान्। किमेवं शिरसि भ्रमता चक्रेण तिष्ठसि। तत् कथय मे यदि कुत्रचित् पानीयमस्ति। यतस्तृष्णार्त्तो ऽस्मीति। एवं तस्य वदतस्तच्चक्रं तत्क्षणादेव तन्मस्तकाद्ब्राह्मणशिरसि समारुरोह। सो ऽब्रवीत्। भद्र किमेतत्। स आह। ममापीत्थमेवैतच्छिरस्यारूढं। स आह। तत् कथय कदैतदवतरिष्यति। महती मे वेदना वर्तते। स आह। यदा त्वमिव कश्चिद्धृतसिद्धवर्तिर्हस्त एवमागत्य त्वामालापयिष्यति। तदा तस्य मस्तके समारोक्ष्यति। सो ऽब्रवीत्। कियान् कालस्तवैवं स्थितस्य सञ्जातः। सो ऽब्रवीत्। साम्प्रतं को राजा धरणीतले। चक्रधर आह। वीणावत्सराजः। पुरुष आह। रामो राजा यदासीत् तदाहं दारिद्र्योपहतो ऽमुं सिद्धवर्तिमादाय त्वमिव समायातः। ततो मयान्यः पुमान् धृतचक्रमस्तको दृष्टः पृष्टश्च। ततस्तवेव पृच्छत एव ममापि शिरसि तन्मस्तकाच्चक्रमारुरोह। परं कालसङ्ख्यां न वेद्मि। चक्रधरः प्राह। भद्र कथं तर्हि तवैवं स्थितस्य भोजनजलप्राप्तिरासीत्। पुरुष आह। भद्र धनदेन निधानहरणभयात् सिद्धानामेतद्भयं प्रदर्शितं येन कश्चिदपि नात्रागच्छति। अथ कथमपि यदि कश्चिदायाति स क्षुत्पिपासानिद्रारहितो जरामरणवर्जितः केवलमित्थमेव वेदनामनुभवति। तदिदानीमाज्ञापय मां स्वगृहाय। मोचितो ऽहं भवता चिरादस्मादनर्थात्। तत् साम्प्रतं स्वस्थानं यास्यामि। इत्युक्त्वा गतः। तस्मिन् गते

कथं मे सहचरश्चिरयतीति तदन्वेषणतत्परस्तत्पदपंक्त्यनुसरणेन सुवर्णसिद्धः प्रस्थितः। यावत् किंचिन्मार्गान्तरमागच्छति। तावत् सरुधिरप्लावितशरीरं तीक्ष्णचक्रेण मस्तके परिभ्रमता वेदनार्त्तं स्वसहचरं ददर्श। ततश्च समीपवर्तिना भूत्वा सबाष्पं पृष्टः। भद्र किमेतत्। सो ऽब्रवीत्। विधिनियोगः। सुवर्णसिद्ध आह। तत् कथय किं तत्। सो ऽपि तेन पृष्टः सर्वं चक्रवृत्तान्तमकथयत्। तच्छ्रुत्वासौ तं विगर्हमाणः प्राह। भो निषिद्धस्त्वं मयानेकशो न शृणोषि मे वाक्यं। तत् किं क्रियते। अतिलोभो न कर्तव्य इति। विद्यावान् कुलीनो ऽपि बुद्धिरहितः। अथवा साध्विदमुच्यते।

वरं बुद्धिर्न सा विद्या विद्यातो बुद्धिरुत्तमा।
बुद्धिहीना विनश्यन्ति यथा ते सिंहकारकाः ॥३१॥

चक्रधरः पृच्छति। कथमेतत्। सुवर्णसिद्धः कथयति।

**कथा ॥४॥**

कस्मिंश्चिदधिष्ठाने चत्वारो ब्राह्मणपुत्राः परं मैत्रीभावमुपागता निवसन्ति स्म। तेषां त्रयः सर्वशास्त्रपारगाः परं बुद्धिरहिताः। एकस्तु शास्त्रपराङ्मुखः केवलं बुद्धिमान्। अथ कदाचित् तैर्मिलित्वा मन्त्रितं। को गुणो विद्याया यदि देशान्तरं गत्वा भूपतीन् परितोष्यार्थोपार्जना न क्रियते। तत् सर्वथा सर्वे देशान्तरं गच्छाम इति। तथानुष्ठिते किंचिन्मार्गं गत्वा तेषां ज्येष्ठतरः प्राह। अहो अस्माकमेकश्चतुर्थो मूढः केवलं बुद्धिमान्। न च विद्यां विना राज्ञां प्रतिग्रहः केवलबुद्ध्या लभ्यते। तदस्मै स्वोपार्जनाविभागं न दास्यामः। तदेष निवृत्य स्वगृहं गच्छतु। अथ द्वितीयेनाभिहितं। अहो सुबुद्धे विद्याहीनस्त्वं। तद्गच्छ गृहं। ततस्तृतीयेणाभिहितं। अहो न युज्यते कर्तुमेवं। यतो वयं बाल्यात् प्रभृत्येकत्र क्रीडिताः। तदागच्छतु। महानुभावो ऽस्मदुपार्जितस्य वित्तस्य संविभागी भवतु। तथानुष्ठिते तैर्मार्गमतिक्रामद्भिरटव्यां मृतसिंहास्थीनि दृष्टानि। ततश्चैकेनाभिहितं। अहो पूर्वाधीतविद्यायाः

प्रत्ययः क्रियते। किञ्चिदेतन्मृतसत्त्वं तिष्ठति। तत् सदभ्यस्तविद्याप्रभावेन प्रत्युज्जीवयामः। ततश्चैकेनाभिहितं। अहमस्थिसञ्चयं कर्तुं जानामि। द्वितीयेनाभिहितं। चर्ममांसरुधिरं प्रयच्छामि। तृतीयेनाभिहितं। अहं सञ्जीवनं करोमि। तत एकेनास्थिसञ्चयः कृतः। द्वितीयेन चर्ममांसरुधिरैः संयोजितः। तृतीयो यावज्जीवितव्यं योजयितुं लग्नः। तावत् स बुद्धिमता निषिद्ध उक्तश्च। एष सिंहः। यद्येनं सजीवं करिष्यसि। तत् सर्वानप्यस्मान् व्यापादयिष्यतीति। ततस्तेनाभिहितं। धिग्मूर्ख नाहं विद्यां विफलतां नेष्यामि। ततश्च तेनाभिहितं। तर्हि क्षणं प्रतीक्षस्व यावदहमेनं समीपतरुमारोहामि। तथानुष्ठिते यावत् सजीवः कृतः। तावत् त्रयो ऽपि ते तेनोत्थाय व्यापादिताः। स च बुद्धिमान् सिंहे स्थानान्तरे गते वृक्षादवतीर्य गृहं गतः। अतो ऽहं ब्रवीमि।

वरं बुद्धिर्न सा विद्या विद्यातो बुद्धिरुत्तमा।
बुद्धिहीना विनश्यन्ति यथा ते सिंहकारकाः ॥ ३२ ॥

अतः परं उक्तं च।

अपि शास्त्रेषु कुशला लोकाचारविवर्जिताः।
सर्वे ते हास्यतां यान्ति यथा ते मूर्खपण्डिताः ॥ ३३ ॥

कथा ॥५॥ चक्रधरः पृच्छति। कथमेतत्। सो ऽब्रवीत्। अथ कस्मिंश्चिदधिष्ठाने चत्वारो ब्राह्मणाः परस्परं मित्रत्वमापन्ना वसन्ति स्म। बालभावे तेषां मतिरजायत। भो देशान्तरं गत्वा विद्याया उपार्जनं क्रियते। अथान्यस्मिन् दिने ब्राह्मणाः परस्परं निश्चयं कृत्वा विद्याया उपार्जनार्थे कान्यकुब्जे गताः। तत्र च विद्यामठे गत्वा पठन्ति। एवं द्वादशाब्दानि स्थित्वा यावदेकचित्ततया सर्वे विद्याकुशलाः सञ्जाताः। ततश्चतुर्भिस्तैर्मिलित्वोक्तं। वयं सर्वे विद्यापारं गताः। तदुपाध्यायमुत्कलापयित्वा स्वदेशे गच्छाम। तथैवं क्रियतामित्युक्त्वा ब्राह्मणा

उपाध्यायमुत्कलापयित्वानुज्ञां लब्ध्वा पुस्तकानि नीत्वा प्रचलिताः। यावत् किञ्चिन्मार्गं यान्ति। तावद्द्वौ पन्थानौ समायातौ। तत उपविष्टाः सर्वे। तत्रैकः प्रोवाच। केन मार्गेण गच्छामः। अथ ते पण्डिता यावन्महाजनमेलापथिकेन सह यान्ति। तावद्रासभः कश्चित् तत्र श्मशाने तिष्ठति। तैश्चोक्तं। एतत् किं। तावद्द्वितीयः पुस्तकमुद्घाटयित्वोवाच। यस्तिष्ठति स बान्धवः। तदहो ऽयमस्मदीयो बान्धवः। ततः कश्चित् तस्य ग्रीवायां लगति। को ऽपि पादौ प्रक्षालयति। अथ यावद्दिशामवलोकनं ते पण्डिताः कुर्वन्ति तावत् कश्चिदुष्ट्रो दृष्टः। तैश्चोक्तं। एतत् किं। तावत् तृतीयेन पुस्तकमुद्घाटयित्वोक्तं। धर्मस्य त्वरिता गतिः। एष धर्मस्तावत्। चतुर्थेनोक्तं। इष्टं धर्मेण योजयेत्। अथ तैश्च रासभ उष्ट्रग्रीवायां बद्धः। तत् केनचिद्रजकस्याग्रे कथितं। यावद्रजकस्तेषां पण्डितमूर्खाणां प्रहारकरणाय समायातः। तावत् ते प्रनष्टाः। अथ यावदग्रे किञ्चित् स्तोकं मार्गं यान्ति तावत् काचिन्नद्यासादिता। तस्या जलमध्ये पलाशपत्त्रमायातं दृष्ट्वा पण्डितेनैकेनोक्तं। यदागच्छति पत्त्रं। तत् पत्त्रमस्मान् तारयिष्यति। एतत् कथयित्वा तत्पत्त्रस्योपरि पतितो यावन्नद्या नीयते। तावत् तं नीयमानमवलोक्यान्येन पण्डितेन केशान्ते गृहीत्वोक्तं।

सर्वनाशे समुत्पन्ने अर्द्धं त्यजति पण्डितः।
अर्द्धेन कुरुते कार्यं सर्वनाशो हि दुःसहः॥३४॥

इत्युक्त्वा तस्य शिरश्छेदो विहितः। तथा तैश्च पश्चाद्गत्वा कश्चिद्ग्राम आसादितः। ते ऽपि ग्रामिणैर्निमन्त्रिताः। पृथक् पृथग्गृहेषु नीताः। तत एकस्य सूत्रिका घृतखण्डसंयुक्ता भोजने दत्ता। ततो विचिन्त्य शास्त्रं दृष्ट्वा पण्डितेनोक्तं। यद्दीर्घसूत्रो विनश्यति। एवमुक्त्वा भोजनं परित्यज्य गतः। ततो द्वितीयस्य मण्डका दत्ता। तेनाप्युक्तं। यदतिविस्तारविस्तीर्णं तद्भवेन्न चिरायुषं। स च भोजनं त्यक्त्वा गतः। अन्यस्य

धार्त्तिकभोजनं दत्तं। तत्रापि पण्डितेनोक्तं। छिद्रेष्वनर्था बहुलीभवन्ति। एवं ते त्रयो ऽपि पण्डिताः लुल्लामकण्ठा लोकैर्हस्यमानास्ततः स्थानात् स्वदेशं गताः। अतो ऽहं ब्रवीमि।

अपि शास्त्रेषु कुशला लोकाचारविवर्जिताः।
सर्वे ते हास्यतां यान्ति यथा ते मूर्खपण्डिताः ॥३५॥

तच्छ्रुत्वा चक्रधर आह। अहो अकारणमेतत्। यतो दैवहता बहुबुद्धयो विनश्यन्ति स्वल्पधियो ऽपि विधिरक्षिता अभिनन्दन्ति। उक्तं च। शतबुद्धिः शिरस्स्थो ऽयं लम्बते च सहस्रधीः।
एकबुद्धिरहं भद्रे क्रीडामि विमले जले ॥३६॥

कथा ॥६॥ सुवर्णसिद्ध आह। कथमेतत्। चक्रधरः कथयति। कस्मिंश्चिज्जलाशये शतबुद्धिसहस्रबुद्धिनामानौ द्वौ मत्स्यौ प्रतिवसतः स्म। तयोरेकबुद्धिर्नाम मण्डूको मित्रतामाजगाम। एवं ते त्रयो ऽपि जलतीरे कियन्तं कालं सुभाषितगोष्ठीसुखमनुभूय पुनर्जलं प्रविशन्ति। अथ तेषां कदाचिद्गोष्ठीगतानां जालहस्ता धीवराः प्रभूतैर्मत्स्यैर्व्यापादितैर्मस्तके धृतैरस्तमनवेलायां समायाताः। तं च जलाशयं दृष्ट्वा ते मिथः प्रोचुः। अहो बहुमत्स्यो ऽयं ह्रदो दृश्यते स्वल्पसलिलश्च। तत् प्रभाते ऽत्रागमिष्यामः। इत्युक्त्वा स्वगृहं गताः। ते च तद्वज्रपातसदृशं वचः श्रुत्वा परस्परं मन्त्रयां चक्रुः। तत्र मण्डूको ऽब्रवीत्। भो भद्रौ शतबुद्धिसहस्रबुद्धी किमत्र कर्तुं युज्यते। पलायनमवष्टम्भो वा। तच्छ्रुत्वा सहस्रबुद्धिर्विहस्योवाच। भो मित्र मा भैषीर्वचनश्रवणमात्रेणापि। आगमनमपि तेषां न सम्भाव्यते। भविष्यति वा। तदा स्वबुद्धिप्रभावेन त्वामात्मानं च रक्षिष्यामि। यतो ऽहमनेकजलगतीर्जानामि। तच्छ्रुत्वा शतबुद्धिराह। भो युक्तमुक्तं सहस्रबुद्धिना। अथवा साध्विदमुच्यते।

न यत्रास्ति गतिर्वायो रश्मीनां च विवस्वतः।

तत्रापि प्रविशत्याशु बुद्धिर्बुद्धिमतां सदा ॥ ३७ ॥

तथा च। बुद्धेर्बुद्धिमतां लोके नास्त्यगम्यं कचिद्यतः।
बुद्ध्या यतो हता नन्दाश्चाणक्येनासिपाणयः ॥ ३८ ॥

तद्वचनश्रवणमात्राज्जन्मस्थानं पितृपर्यायागतं त्यक्तुं न शक्यते। तन्न कचिदपि गन्तव्यं। अहं त्वां स्वबुद्धिप्रभावेन रक्षिष्यामि। मण्डूक आह। भद्रौ मम तावदेकैव बुद्धिः पलायनविषया। तदहमन्यं कंचिज्जलाशयं सभार्यो ऽद्यैव यास्यामि। एवमुक्त्वा मण्डूको रात्रिमासाद्यान्यं जलाशयं गतः। अथान्येद्युस्तैर्यमकिङ्कराभैर्मत्स्यबन्धिभिः प्रभात आगत्य जालैराच्छादितो ह्रदः। सर्वे ऽपि मत्स्यकूर्ममण्डूककर्कटादयो जलचरा जाले निबद्धा गृहीताः। तौ च शतबुद्धिसहस्रबुद्धी सभार्यौ पलायमानौ चिरमात्मानं गतिविशेषविज्ञानैः कुटिलचारेण रक्षन्तावपि जाले निपतितौ व्यापादितौ च। अथ पराह्णसमये हृष्टास्ते धीवरा गृहं प्रति प्रस्थिताः। शतबुद्धिर्गुरुत्वादेकेन शिरसि धृतः। अपरेण रज्जुबद्धः सहस्रबुद्धिर्नीयते। ततश्च वापीकण्ठोपगतेनैकबुद्धिमण्डूकेनाभिहितं पुरः स्वपत्न्याः। पश्य पश्य प्रिये।

शतबुद्धिः शिरस्स्थो ऽयं लम्बते च सहस्रधीः।
एकबुद्धिरहं भद्रे क्रीडामि विमले जले ॥ ३९ ॥

अतो ऽहं ब्रवीमि। नैकान्ते बुद्धिरपि प्रमाणमपि। सुवर्णसिद्ध आह। यद्यप्येतदस्ति। तथापि मित्रवचनमनुल्लङ्घनीयं। परं किं क्रियते। मया निवारितो ऽपि न स्थितो ऽतिलौल्याद्विद्याहङ्काराच्च। अथवा साध्विदमुच्यते।

साधु मातुल गीतेन मया प्रोक्तो ऽपि न स्थितः।
अपूर्वो ऽयं मणिर्बद्धः सम्प्राप्तं गीतलक्षणं ॥ ४० ॥

चक्रधर आह। कथमेतत्। सो ऽब्रवीत्। अस्ति कस्मिंश्चिदधिष्ठाने उद्धतो नाम गर्दभः। स च दिवा रजकगृहे भारोद्वहनं कृत्वा ॥७॥

रात्रौ स्वेच्छया पर्यटति। अथान्यदा तस्य रात्रौ क्षेत्रेषु पर्यटतः कदाचिच्छृगालेन सार्धं मैत्री बभूव। तौ च वृतिभङ्गं कृत्वा कर्कटिकाक्षेत्रेषु प्रविश्य तत्फलभक्षणं स्वेच्छया कृत्वा प्रत्यूषे स्वस्थानं व्रजतः। अथ कदाचित् क्षेत्रमध्यस्थितेन मदोद्धतरासभेन शृगालो ऽभिहितः। भो भगिनीसुत पश्य। अतीव निर्मला रजनी। तदहं गीतं करिष्यामि। तत् कथय कतमेन रागेण करोमि। स प्राह। माम किमनेनानर्थप्रचालनेन। यतश्चौरकर्मप्रवृत्तावावां। चौरजारैर्निभृतैरेव स्थातव्यमिति। उक्तं च।

काशी विवर्जयेच्चौर्यं निद्रालुश्चर्मचौरिकां।
जिह्वालौल्यं च रोगाढ्यो जीवितुं यो ऽत्र वाञ्छति ॥४१॥

तथा त्वदीयं गीतं शङ्खवादानुवादि न मधुरमिति। दूरादपि श्रुत्वोत्थाय क्षेत्ररक्षा बन्धं बधं च विधास्यन्ति। तद्भक्षय तावदमृतरसाश्चिर्भटीः। मा त्वमत्र गीतव्यापारपरो भव। तच्छ्रुत्वा रासभ आह। भो वनाश्रयत्वात् त्वं गीतरसं न वेत्सि। तेनैतद्ब्रवीषि। उक्तं च।

शरज्ज्योत्स्नाहते दूरं तमसि प्रियसन्निधौ।
धन्यानां विशति श्रोत्रे गीतझङ्कारजा सुधा ॥४२॥

शृगाल आह। माम अस्त्येतत्। परं कठोरमुन्नदसि। तत् किं तेन नादेन स्वार्थभ्रंशिना। रासभ आह। धिग्धिग्मूर्ख किमहं गीतं न जानामि। तच्छ्रूयतां तस्य भेदस्तद्यथा।

सप्त स्वरास्त्रयो ग्रामा मूर्छनास्त्वेकविंशतिः।
ताला एकोनपञ्चाशत् तिस्रो मात्रा लयास्त्रयः ॥४३॥
स्थानत्रयं यतीनां च षडास्यानि रसा नव।
वर्णाः षड्विंशतिर्भावाश्चत्वारिंशत् ततः स्मृताः ॥४४॥
पञ्चाशीत्यधिकं ह्येतद्गीतानां च शतं स्मृतं।
सुवर्णरचितं शुद्धं गीताङ्गैः सकलैर्युतं ॥४५॥

नान्यद्गीतात् प्रियं लोके देवानामपि दृश्यते ।
शुष्कस्नायुस्वराह्लादात् त्र्यक्षं जग्राह रावणः ॥ ४६ ॥

तत् कथं भगिनीसुत मामनभिज्ञं वदसि निवारयसि च । शृगाल आह । माम यद्येवं तदहं वृतिद्वारदेशस्थः क्षेत्रपालमवलोकयामि । त्वं पुनः स्वेच्छया गीतं कुरु । तथानुष्ठिते गर्दभ उत्कन्धरं भूत्वा शब्दायितुमारब्धः । ततः क्षेत्रपालो रासभशब्दितं श्रुत्वा क्रोधाद्दन्तान् दन्तैर्निपीडयंल्लगुडमुद्यम्य प्रधावितः । यावद्रासभो दृष्टः । तावल्लगुडप्रहारैस्तथा हतो यथा प्रताडितो भूपृष्ठे पतितः । ततश्च सच्छिद्रोलूखलं गले बद्ध्वा क्षेत्रपालः सुप्तः । रासभो ऽपि जातिस्वभावाद्गतवेदनः क्षणेनाभ्युत्थितः । उक्तं च ।

सारमेयखराश्वानां गर्दभस्य विशेषतः ।
मुहूर्तात् परतो न स्यात् प्रहारजनिता व्यथा ॥ ४७ ॥

ततश्च तदेवोलूखलमादाय वृतिं चूर्णयित्वा पलायितुमारब्धः । एतस्मिन्नन्तरे शृगालो दूरादेव तं दृष्ट्वा सस्मितमिदमाह ।

साधु मातुल गीतेन मया प्रोक्तो ऽपि न स्थितः ।
अपूर्वो ऽयं मणिर्बद्धः सम्प्राप्तं गीतलक्षणं ॥ ४८ ॥

तद्भवानपि निवार्यमाणो ऽपि मया न स्थितः । तच्छ्रुत्वा चक्रधर आह । भो मित्र सत्यमेतत् । अथवा साध्विदमुच्यते ।

यस्य नास्ति स्वयं प्रज्ञा मित्रोक्तं न करोति यः ।
स एव निधनं याति यथा मन्थरकौलिकः ॥ ४९ ॥

सुवर्णसिद्ध आह । कथमेतत् । चक्रधरः कथयति । अस्ति कस्मिंश्चिदधिष्ठाने मन्थरको नाम कौलिकः । तस्य कदाचित् पटकर्माणि कथा ॥८॥
कुर्वतः सर्वाणि पटकर्मकरकाष्ठानि भग्नानि । ततः स कुठारमादाय काष्ठार्थं परिभ्रमन् समुद्रतटं प्राप । तत्र च महान्तं शिंशपापादपं दृष्ट्वा चिन्तितवान् । महानयं वृक्षो दृश्यते । तदनेन कर्तितेन प्रभू

तानि पटकर्मोपकरणानि भविष्यन्ति। इत्यवधार्य तस्योपरि कुठारमुद्यतवान्। अथ तत्र वृक्षे कश्चिद्व्यन्तर आसीत्। तेनाभिहितं। भो ममाश्रयो ऽयं पादपः। तत् सर्वथा रक्षणीयः। यतो ऽहमिह समुद्रकल्लोलसंस्पर्शशीतलानिलस्पृश्यमानशरीरः परमसुखेन तिष्ठामि। कौलिक आह। भो तदहं किं करोमि। दारुसामग्रीं विना बुभुक्षया पीड्यते मत्कुटुम्बमिति। तस्मादन्यत्र शीघ्रं गम्यतां। अहमेनं कर्तिष्यामि। व्यन्तरो ऽब्रवीत्। भो तुष्टस्तवाहं प्रार्थ्यतां किंचिदभीष्टं। रक्ष पादपममुमिति। कौलिक आह। यद्येवं तर्हि स्वगृहं गत्वा स्वमित्रं पत्नीं च पृष्ट्वा समागच्छामि। ततस्त्वया देयं। अथ तथेति व्यन्तरेण प्रतिपन्ने कौलिकः प्रहृष्टः स्वगृहं प्रति निवृत्तो यावदधिष्ठाने प्रविशति। तावन्निजसुहृदं नापितमपश्यत्। आह च। अहो मित्र मम कश्चिद्व्यन्तरः सिद्धः। तत् कथय किं प्रार्थये। नापित आह। भद्र यद्येवं तद्राज्यं प्रार्थयस्व। येन त्वं राजाहं तव मन्त्री द्वावपीह लोके सुखमनुभूय परलोकसुखमनुभवावः। उक्तं च।

राजा दानपरो नित्यमिह कीर्तिमवाप्य च।
तत्प्रभावात् पुनः स्वर्गे स्पर्धते त्रिदशैः सह ॥ ५० ॥

कौलिक आह। भो मित्र भवत्वेवं। परं पत्नीमपि पृच्छामि। नापित आह। न हि स्त्रीभिः सह मन्त्रयितुं युज्यते। उक्तं च।

भोजनाच्छादनं दद्यादनुकालं विशेषतः।
भूषणाद्यं च नारीणां न ताभिर्मन्त्रयेत् सुधीः ॥ ५१ ॥

तथा च। यत्र स्त्री यत्र कितवो बालो यत्र प्रशासिता।
तद्गृहं क्षयमायाति भार्गवो हीदमब्रवीत् ॥ ५२ ॥

किंच। तावदेव प्रधानं स्यात् तावद्गुरुजने रतः।
पुरुषो योषितां यावन्न शृणोति रहो वचः ॥ ५३ ॥

एताः स्वार्थपरा नार्यः केवलं स्वसुखे रताः।

न तासां वल्लभो यस्मात् स्वसुतो ऽपि सुखं विना ॥५४॥

कौलिक आह । यद्यप्येवं तथापि पतिव्रता सा प्रष्टव्या । एवं तमभिधाय सत्वरं गत्वा पत्नीमुवाच । भद्रे ऽद्यास्माकं कश्चिद्व्यन्तरः सिद्धः । स वाञ्छितं प्रयच्छति । तदहं त्वां प्रष्टुमागतः । तत् कथय किमर्थये । एष तावन्मम सुहृन्नापितो राज्यं प्रार्थ्यतामिति वदति । साब्रवीत् । आर्यपुत्र का मतिर्नापितानां । तन्न कार्यं तद्वचः । उक्तं च ।

चारणैर्वन्दिभिर्नीचैर्नापितैर्मालिकैरपि ।
न मन्त्रं मतिमान् कुर्यात् सार्धं भिक्षुभिरेव च ॥५५॥

अपरञ्चातिक्लेशपरम्परैषा राज्यस्थितिः सन्धिविग्रहयानासनसंश्रयद्वैधीभावादिचिन्ता । पुरुषस्य न कदाचिदपि सुखं प्रयच्छति । यतः

यदैव राज्ये क्रियते ऽभिलाषः सदैव याति व्यसनेषु बुद्धिः ।
घटा नृपाणामभिषेककाले सहाम्भसैवापदमुद्गिरन्ति ॥५६॥
यदर्थे भ्रातरः पुत्रा अपि वाञ्छन्ति ये निजाः ।
बधं राज्यकृते राज्ञां तद्राज्यं दूरतस्त्यजेत् ॥५७॥

कौलिक आह । सत्यमुक्तं भवत्या । तत् किं याचे । साब्रवीत् । त्वं तावदेकं पटं नित्यमेव निष्पादयसि । तेन सर्वव्ययशुद्धिः सम्पद्यते । अथेदानीमात्मनो ऽन्यद्बाहुयुगलं द्वितीयं शिरश्च याचस्व । येन पुरतः पृष्ठतश्चैकैकं पटं सम्पादयसि । तत्रैकस्य मूल्येन गृहव्ययः । द्वितीयस्य मूल्येन शेषकृत्यानि कुर्वाणस्य ज्ञातिमध्ये श्लाघ्यमानस्य कालो गच्छति । लोकद्वयस्योपार्जना भविष्यति । सो ऽपि तदाकर्ण्य प्रहृष्टः प्राह । साधु पतिव्रते । साधूक्तं भवत्या । तदेवं करिष्यामि । एष मे निश्चयः । अथ कौलिको व्यन्तरं गत्वा प्रार्थयां चक्रे । भो यदि मे वाञ्छितं प्रयच्छसि । तद्देहि मे द्वितीयं बाहुयुगलं शिरश्च । एवमभिहिते तत्क्षणादेव द्विशिराश्चतुर्बाहुश्च सञ्जातः । ततश्च प्रहृष्टमना यावद्गृहमागच्छति । तावल्लोकै राक्षसो ऽयमिति मन्यमानैर्लगुडपाषाणादिभिस्ताडितो

मृतश्च । अतो ऽहं ब्रवीमि ।

यस्य नास्ति स्वयं प्रज्ञा मित्रोक्तं न करोति यः ।
स एव निधनं याति यथा मन्थरकौलिकः ॥५८॥

चक्रधरः पुनरेवाह । सर्वो ऽपि जनो ऽश्रद्धेयामाशापिशाचिकां प्राप्य हास्यपदवीं याति । अथवा साध्विदमुच्यते ।

अनागतवतीं चिन्तामसम्भाव्यां करोति यः ।
स एव पाण्डुरः शेते सोमशर्मपिता यथा ॥५९॥

कथा ॥९॥ सुवर्णसिद्ध आह । कथमेतत् । सो ऽब्रवीत् । कस्मिंश्चिदधिष्ठाने स्वभावकृपणो नाम ब्राह्मणः प्रतिवसति स्म । तेन भिक्षार्जितैः सक्तुभिः भुक्तशेषैः कलशः सम्पूरितः । तं च कलशं नागदन्ते ऽवलम्ब्य तस्याधस्तात् खट्वां निधाय सततमेकदृष्ट्या तमवलोकयन् रात्रौ चिन्तयामास । सक्तुभिः परिपूर्णो ऽयं तावद्घटो वर्तते । तद्यदि दुर्भिक्षं भविष्यति तदा रूपकाणां शतमस्मिन्नुत्पत्स्यते । ततश्च तेनाजाद्वयमहं ग्रहीष्ये । ततः षण्मासिकप्रसववशादजायूथं भविष्यति । ततो ऽजाभिर्गावः । गवां प्रसवात् तदपत्यविक्रयं करिष्यामि । ततो गोभिर्महिष्यः । महिषीभिर्वडवाः । बडवाप्रसवतो मम प्रभूता अश्वा भविष्यन्ति । तेषां विक्रयात् प्रभूतं सुवर्णं भविष्यति । सुवर्णेन चतुःशालं गृहं सम्पत्स्यते । ततश्च कश्चिद्ब्राह्मणो मम गृहमभ्येत्य प्राप्तवरां रूपाढ्यां कन्यां प्रदास्यति । तस्याः पुत्रो जनिष्यते । तस्याहं सोमशर्मेति नाम करिष्यामि । ततस्तस्मिन् जानुचलनयोग्ये सञ्जाते ऽहं पुस्तकं गृहीत्वाश्वचलनशालायाः पृष्ठदेशे समुपविश्य तदवधारयिष्यामि । एतस्मिन्नन्तरे सोमशर्मा मां दृष्ट्वा जनन्या उत्सङ्गाज्जानुप्रचलनपरो ऽश्वखुरासन्नवर्ती मत्समीपमागमिष्यति । ततो ऽहं ब्राह्मणीं कोपाविष्टो ऽभिधास्यामि । गृह्यतां गृह्यतां बालकः । सापि गृहकर्मव्यग्रतयास्मद्वचनं न श्रोष्यति । ततो ऽहं समुत्थाय तां पादप्रहारेण

ताडयिष्यामि। एवं तेन तद्ध्यानावस्थितेन पादप्रहारस्तथा मुक्तो यथा स घटो भग्नः। घटान्तर्वर्तिभिः सक्तुभिश्च पाण्डुरतां गतः। अतो ऽहं ब्रवीमि।

अनागतवतीं चिन्तामसम्भाव्यां करोति यः।
स एव पाण्डुरः शेते सोमशर्मपिता यथा ॥६०॥

सुवर्णसिद्ध आह। एवमेवैतत्। यतः

यो लौल्यात् कुरुते कर्म नैवानर्थमपेक्षते।
विडम्बनामवाप्नोति स यथा चन्द्रभूपतिः ॥६१॥

कथा ॥१०॥

चक्रधर आह। कथमेतत्। सो ऽब्रवीत्। अस्ति कस्मिंश्चिन्नगरे चन्द्रो नाम भूपतिः। तत्पुत्रक्रीडार्थं वानरयूथं तिष्ठति। ते नित्यमेवानेकभोजनभक्ष्यादिभिः पुष्टिं नीयन्ते। अथ वानरयूथाधिपो यः स औशनसबार्हस्पत्यचाणक्यमतवित्तदनुष्ठाता च तान् सर्वानप्यध्यापयति स्म। तस्मिन् राजगृहे लघुकुमारवाहनयोग्यं मेषयूथं तिष्ठति। तन्मध्यादेको जिह्वालौल्यादहर्निशं महानसे निःशङ्कः प्रविश्य यत् किंचित् पश्यति तत् सर्वं भक्षयति। तं च सूपकारा यत् किंचित् काष्ठपाषाणमग्रे पश्यन्ति तेन ताडयन्ति। सो ऽपि वानरयूथपस्तं दृष्ट्वा व्यचिन्तयत्। अहो मेषसूपकारकलहो ऽयं वानराणां क्षयाय भविष्यति। यतो ऽन्नस्वादलम्पटो ऽयं मेषो महाकोपाश्च सूपकारा यथास्थानासन्नेन वस्तुना प्रहरन्ति। तद्यदि वस्त्वन्तराभावात् कदाचिदुल्मुकेन ताडयिष्यन्ति। तदूर्णाप्रचुरो ऽयं मेषः स्वल्पेनापि वह्निना प्रज्वलिष्यति। तद्दह्यमानः पुनरश्वकुट्यां समीपवर्तिन्यां प्रवेक्ष्यति। सापि तृणप्राचुर्यात् ज्वलिष्यतीति। ततो ऽश्वा वह्निदाहमवाप्स्यन्ति। शालिहोत्रेण पुनरेतदुक्तं। यद्वानरवसयाश्वानां वह्निदाहदोषः प्रशाम्यति। तन्नूनमस्माकमुपस्थितो मृत्युरिति। एवं निश्चित्य सर्वान् वानरानाहूय रहसि प्रोवाच।

मेषेण सूपकाराणां कलहो यत्र वर्तते ।
स भविष्यत्यसन्दिग्धं वानराणां क्षयावहः ॥६२॥
तस्मात् स्यात् कलहो यत्र गृहे नित्यमकारणः ।
तद्गृहं जीवितं वाञ्छन् दूरतः परिवर्जयेत् ॥६३॥

तथा च । कलहान्तानि हर्म्याणि कुवाक्यान्तं च सौहृदं ।
कुराजान्तानि राष्ट्राणि कुकर्मान्तं यशो नृणां ॥६४॥

तन्न यावत् सर्वेषां क्षयो भवति । तावदेतद्राजगृहं परित्यज्य वनं गच्छामः । अथ तस्य तद्वचनमश्रद्धेयं श्रुत्वा ते मदोद्धता वानरा विहस्य तमूचुः । भो वृद्धभावाद्भवतो बुद्धिवैकल्यं सञ्जातं येनैतद्ब्रवीषि । न वयं राजपुत्रैः स्वहस्तप्रदत्तानमृतकल्पान् भक्ष्यविशेषान् परित्यज्य तत्राटव्यां कषायकटुतिक्ताम्लक्षाराणि वनफलानि भक्षयिष्यामः । तच्छ्रुत्वाश्रुकलुषां दृष्टिं कृत्वा यूथपः प्रोवाच । रे रे मूर्खा यूयं । नैतस्य सुखस्य परिणामं जानीथ । यस्मादापातमात्रमधुरमेतत् सुखं परिणामे विषवद्भविष्यति । तदहं कुलक्षयं स्वयं नावलोकयिष्यामि । साम्प्रतं तदेव वनं यास्यामि । उक्तं च ।

धन्यास्ते ये न पश्यन्ति देशभङ्गं कुलक्षयं ।
परहस्तगतां भार्यां मित्रं च विषमस्थितं ॥६५॥

इत्येवमभिधाय सर्वान् परित्यज्य स यूथपो ऽटव्यां गतः । अथ तस्मिन् गते ऽन्यस्मिन्नहनि स मेषो महानसे प्रविष्टः । यावदेनं ताडनाय सूपकारेण नान्यत् किञ्चिदासादितं । तावदर्धज्वलितकाष्ठेन ताडितः । सो ऽपि तेन ताडितः सन्नर्धज्वलितशरीरः शब्दायमानः प्रत्यासन्नवर्तिन्यामश्वकुट्यां प्रविष्टः । तत्र च तृणप्राचुर्ययुक्तायां क्षितौ तस्य प्रलुठतः सर्वतो ऽपि वह्निज्वालाः समुत्थिताः । कुट्यां च निबद्धा घोटकाः केचित् स्फुटितनयनाः पञ्चत्वं गताः । केचिच्च बन्धनानि त्रोटयित्वार्धदग्धशरीरा हेषायमाणा इतश्चेतश्च धावमानाः सर्वमपि जनं व्याकुली

चक्रुः। एतस्मिन्नन्तरे राजा सविषादं शालिहोत्रज्ञान् चिकित्सकानाहूय प्रोवाच। भो भो प्रोच्यतामश्वानामेतेषां कश्चिद्दाहोपशमोपायः। ते ऽपि शास्त्राणि सञ्चिन्त्य प्रोचुः। देव प्रोक्तमत्र विषये भगवता शालिहोत्रेण।

कपीनां वसयाश्वानां वह्निदाहसमुद्भवा।
व्यथा विनाशमभ्येति तमः सूर्योदये यथा ॥६६॥

तत् क्रियतामेतच्चिकित्सितं द्राग्यावद्दोगेन ते न विनश्यन्ति। सो ऽपि राजा तच्छ्रुत्वा वानरबधमादिष्टवान्। किं बहुना सर्वे ते व्यापादिता इति। अथ सो ऽपि वानरयूथपस्तां कुलधर्षणां ज्ञात्वा परं विषादमुपगतः। तदनुसारे त्यक्ताहारविहारक्रियो वनाद्वनान्तरं पर्यटति। अचिन्तयच्च। कथमहं तस्य नृपपापस्यानृण्यताकृत्येनापकृत्यं करिष्यामि। उक्तं च।

धर्षणां मर्षयेद्यो ऽत्र वंशजापरनिर्मितां।
भयाद्वा यदि वा लोभात् स ज्ञेयः पुरुषाधमः ॥६७॥

अथ तेन वृद्धवानरेण कुत्रचित् पिपासाकुलितेन भ्रमता पद्मिनीखण्डमण्डितं सरः समासादितं। तत्र च यावन्निपुणतयावलोकयति। तावद्वनचरमनुष्याणां प्रविशदेव पदं पश्यति न च निर्गच्छदिति। ततश्चिन्तयामास। नूनमत्रान्तर्जले दुष्टग्राहेण भाव्यं। तत् पद्मिनीनालमादाय दूरस्थो ऽपि जलपानं करोमि। तथानुष्ठिते तन्मध्याद्रत्नमालालङ्कृतकण्ठो राक्षसो निष्क्रम्य तमुवाच। यो ऽत्र सलिले प्रविशति तं भक्षयामीति। तन्नास्ति धूर्ततरस्त्वदन्यो यो ऽनेन विधिना पिबसि। तत् तुष्टो ऽहं प्रार्थयस्व हृदयवाञ्छितं। कपिराह। भोः कियती भक्षणशक्तिस्ते। स आह। शतसहस्रायुतलक्षाण्यपि जलप्रविष्टानि भक्षयामि। बाह्यतः शृगालो ऽपि मां धर्षयति। वानरः प्राह। अस्ति मे भूपतिना सहात्यन्तं वैरं। यद्येनां रत्नमालां मे प्रयच्छसि

तत् सपरिवारमपि तं भूपतिं वाक्प्रपञ्चेन लोभयित्वात्रैव सरसि प्रवेशयामि। अथ राक्षसः श्रद्धेयवचनं तस्य तच्छ्रुत्वा तस्मै रत्नमालां समर्पयामास। वानरो ऽपि रत्नमालाविभूषितकण्ठो तन्नगरमासाद्य वृक्षप्रासादेषु परिभ्रमन् जनैर्दृष्टः पृष्टश्च। भो यूथप क्व भवानियन्तं कालं गत्वा स्थितः। क्व भवतेदृग्रत्नमाला लब्धा या दीप्त्या सूर्यमपि तिरस्कुरुते। वानरः प्राह। अस्ति कुत्रचिदरण्ये धनदविनिर्मितं सुगुप्ततरं सरः। तत्रार्धोदितसूर्यवारे यः कश्चित् प्रविश्य निमज्जति स धनदप्रसादादीदृग्रत्नमालाविभूषितकण्ठो निष्क्रमति। अथ भूभुजा जनात् तदाकर्ण्य स वानरः समाहूतः पृष्टश्च। भो यूथप ते सत्यमेतत्। रत्नमालासनाथं सरो ऽस्ति क्वापि। कपिराह। स्वामिन्नेष प्रत्यक्षतया मत्कण्ठस्थितया रत्नमालया प्रत्ययस्ते। यदि तवापि रत्नमालाभिः प्रयोजनं। तन्मया सह कमपि प्रेषय येनाहं तच्चित्रं दर्शयामि। एतच्छ्रुत्वा नृपतिः प्राह। यद्येवं तदहं सपरिजनः स्वयमेष्यामि यथा प्रभूता रत्नमालाः सम्पद्यन्ते। वानर आह। स्वामिन्नेतदेव चारु। अथ भूपतिः सपरिजनो रत्नमालालोभात् प्रस्थितः। वानरो ऽपि राज्ञा दोलारूढेन स्वोत्सङ्गमारोपितः सुखेन प्रतिपत्तिपूर्वं गच्छति। अथवा साध्विदमुच्यते।

लोभादेव नरा मूढा धनविद्यान्विता अपि।
अकृत्येषु नियोज्यन्ते भ्राम्यन्ते दुर्गमेष्वपि ॥६८॥

तथा च। इच्छति शती सहस्रं सहस्री लक्षमीहते।
लक्षाधिपस्ततो राज्यं राज्याच्च स्वर्गमीहते ॥६९॥

अथ प्रत्यूषे तत् सरः समासाद्य वानरो राजानमुवाच। देवात्रार्धोदिते सूर्ये प्रविष्टानां सिद्धिर्भवतीति। तत् सर्वो ऽपि परिजनो वाच्यो येनैकहेलया प्रविशति। त्वया पुनर्मया सह प्रवेष्टव्यं येन पूर्वदृष्टस्थानमाश्रित्य प्रभूतास्ते रत्नमाला दर्शयामि। अथ प्रविष्टास्ते सर्वे लोका

भक्षिताश्च तेन राक्षसेन। अथ चिरायमाणेषु तेषु राजा वानरमुवाच। भो यूथाधिप किमिति चिरयति मे परिजनः। तच्छ्रुत्वा वानरः सत्वरं वृक्षमारुह्य राजानमुवाच। भो दुष्ट नरपते राक्षसेनान्तःसलिलस्थेन भक्षितस्ते परिजनः। साधितं मया कुलक्षयकारणोत्थं वैरं भवता सह। तद्गम्यतां। मया त्वं स्वामीति मत्वा नात्र प्रवेशितः। उक्तं च यतः।

कृते प्रतिकृतं कुर्याद्धिंसिते प्रतिहिंसितं।
तत्र दोषं न पश्यामि यो दुष्टे दुष्टमाचरेत् ॥७०॥

तत् त्वया मत्कुलक्षयो निर्मितो मया पुनस्तवेति। एतदाकर्ण्य राजा शोकाविष्टस्त्वरितपदं यथायातं प्रतिनिवृत्त इति। अथ तस्मिन् भूपतौ गते राक्षसः सुतृप्तो जालान्निष्क्रम्य सानन्दमिदमाह।

हतः शत्रुः कृतं मित्रं रत्नमाला न हारिता।
नालेन पिबता तोयं भवता साधु वानर ॥७१॥

अतो ऽहं ब्रवीमि।

यो लौल्यात् कुरुते कर्म नैवानर्थमपेक्षते।
विडम्बनामवाप्नोति स यथा चन्द्रभूपतिः ॥७२॥

सुवर्णसिद्धः पुनरप्याह। भो भो प्रेषय मां येन स्वगृहं गच्छामि। चक्रधरः प्राह। आपदर्थे धनमित्रसङ्ग्रहः क्रियते। तत् कथं मामेतदवस्थं त्यक्त्वा यास्यसि। उक्तं च।

यस्त्यक्त्वा सापदं मित्रं याति निष्ठुरतां वहन्।
कृतघ्नस्तेन पापेन नरके गच्छति ध्रुवं ॥७३॥

सुवर्णसिद्धः प्राह। भो सत्यमेतद्यदि गम्यस्थाने शक्तियुक्तस्त्यजति। एतत् पुनर्मनुष्याणामगम्यस्थानं। नास्ति कस्यापि त्वामुन्मोचयितुं शक्तिः। अपरं यथा यथा तव चक्रभ्रमणवेदनया मुखविकारं पश्यामि। तथा तथा जानामि। यदि द्रागितः स्थानाद्गच्छामि। मा कथञ्चिदस्माकमप्यनर्थो ऽयं भविष्यतीति। अथवा साध्विदमुच्यते।

यादृशी वदनच्छाया दृश्यते तव वानर।
गृहीतो ऽसि विकालेन यः परैति स जीवति॥७४॥

कथा ॥११॥ चक्रधर आह। कथमेतत्। सो ऽब्रवीत्। अस्ति कस्मिंश्चित् पुरे भद्रसेनो नाम राजा। तस्य सर्वलक्षणसम्पूर्णा रत्नवती नाम कन्यास्ति। तां च कश्चिद्राक्षसो हर्तुमिच्छति। रात्रावागत्य नित्यमेवोपभुङ्क्ते। परं कृताङ्गरक्षापरिवेशां तां हर्तुं न शक्नोति। सा च तत्सुरतसमये राक्षससान्निध्यजामवस्थां कम्पज्वरादिभिरनुभवति। एवमतिक्रामति काले कदाचित् स राक्षसो गृहकोणे स्थितो राजदुहितुरात्मानमदर्शयत्। ततः सा स्वसखीमुवाच। सखि पश्य विकालसमये राक्षसो ऽयं नित्यमेवागत्य मां कदर्थयति। तदस्ति किञ्चिदस्य दुरात्मनः प्रतिषेधविधानं। तच्छ्रुत्वा राक्षसो व्यचिन्तयत्। नूनं यथाहं तथान्यः कश्चिद्विकालनामास्या हरणाय नित्यमेवागच्छति। परं सो ऽप्येनां हर्तुं न शक्नोति। तत् तावदहमश्वमध्यस्थो निरीक्षे किंरूपः किम्प्रभावश्च स इति। तथानुष्ठिते निशीथसमये राज्ञो गृहे कश्चिदश्वापहारकः प्रविष्टः। स च सर्वानश्वानवलोक्य तं राक्षसाश्वं शुभतरं दृष्ट्वा खलीनं तन्मुखे निधाय समारूढः। एतस्मिन्नन्तरे राक्षसश्चिन्तयामास। नूनं स एष विकालनामा मां दुष्टं मत्वा कोपान्निहन्तुमभ्यागतः। तत् किं करोमि। एवं चिन्तयन् सो ऽश्वापहारकेण कशाघातेन ताडितः। अथासौ भयत्रस्तमनाः प्रधावितुमारब्धः। चौरो ऽपि दूरं गत्वा खलीनाकर्षणेन तं स्थिरीकर्तुमारेभे। तद्यदि वाजी भवति तदा खलीनं गणयति। स तु केवलं वेगाद्वेगं गच्छति। अथ तथावगणितखलीनाकर्षणमवलोक्य चौरश्चिन्तयामास। अहो नैवंविधा वाजिनो भवन्ति। तन्नूनमेतेनाश्वरूपेण राक्षसेन भाव्यं। तद्यदि कश्चित् पांशुलं भूतलमवलोकयामि। तत्रात्मानं पातयामि। नान्यथा मे जीवितव्यमस्ति। इत्येवं चिन्तयत इष्टदेवतामनुस्मरतो ऽश्वापहारकस्य सो ऽश्व

नृपराक्षसो वटवृक्षतले गतः। चौरो ऽपि वटप्ररोहमासाद्य तत्रैव विलग्नः। ततश्च द्वावपि तौ पृथग्भूतौ लब्धजीविताशौ परमानन्दनिर्भरौ बभूवतुः। अथ तत्र वटे राक्षससुहृत् कश्चिद्वानर आसीत्। तेन नश्यन्तं राक्षसमवलोक्य व्याहृतं। भो किमेवमलीकभयेन प्रणश्यसि। भक्ष्यो ऽयं ते मानुषः। तद्भक्ष्यतां। स तस्य वचनं श्रुत्वा स्वरूपमाधाय शङ्कितमनाः स्खलितगतिर्निवृत्तः। अथ चौरस्तं वानराहूतं ज्ञात्वा कोपादुपर्युपरि वानरस्य लम्बमानं लाङ्गूलं मुखे निधाय गाढतरं चर्वितुमारब्धवान्। वानरो ऽपि तं राक्षसादभ्यधिकं मन्यमानो भयान्न किञ्चिदुक्तवान्। केवलं व्यथार्त्तो निमीलितनयनो दन्तान्निपीडयन् तिष्ठति। राक्षसो ऽपि तं तथाभूतमवलोक्य श्लोकमेनमपठत्।

यादृशी वदनच्छाया दृश्यते तव वानर।
गृहीतो ऽसि विकालेन यः परैति स जीवति ॥ ७५ ॥

सुवर्णसिद्धः पुनरप्याह। प्रेषय मां। स्वगृहमनुगच्छामि। त्वं पुनरत्र स्थितो दुर्विनयवृक्षफलमनुभुंक्ष्व। चक्रधर आह। भो ऽकारणमेतत्। नयो ऽनयो वा ज्ञायते। यतो दैववशाच्छुभाशुभं नृणामुपतिष्ठते। उक्तं च।

दुर्गस्त्रिकूटः परिखा समुद्रो रक्षांसि योधा धनदाच्च वित्तं।
शास्त्रं च यस्योशनसा प्रणीतं स रावणो दैववशाद्विपन्नः ॥७६॥

तथा च। अन्धकः कुब्जकश्चैव राजकन्या च त्रिस्तनी।
त्रयो ऽप्यन्यायतः सिद्धाः सन्मुखे कर्मणि स्थिते ॥७७॥

सुवर्णसिद्ध आह। कथमेतत्। चक्रधर आह। अस्त्युत्तरापथे कथा
मधुपुरं नाम नगरं। तत्र मधुसेनो नाम राजा बभूव। तस्य कदाचित् ॥१२॥
त्रिस्तनी कन्या जज्ञे। अथ तां त्रिस्तनीं जातां श्रुत्वा स राजा कञ्चु
किनमाहूय प्रोवाच। भो त्यज्यतामियमरण्ये यथा न कश्चिदेव जाना

ति। तच्छ्रुत्वा कञ्चुकी प्राह। महाराज ज्ञायत एतद्यदनिष्टकारिणी त्रिस्तनी भवति कन्या। तथापि ब्राह्मणा आहूय ते प्रष्टव्याः। येन लोकद्वये ऽपि विरुद्धता न भवति। उक्तं च यतः।

यः सततं परिपृच्छति शृणोति सन्धारयत्यनिशं।
तस्य दिवाकरकिरणैर्नलिनीव विवर्धते बुद्धिः ॥७८॥

तथा च। पृच्छकेन सदा भाव्यं पुरुषेण विजानता।
राक्षसेन गृहीतो ऽपि प्रश्नान्मुक्तो द्विजः पुरा ॥७९॥

कथा ॥१२॥ राजाह। कथमेतत्। कञ्चुकी कथयति। अस्ति कुत्रचिदरण्ये चण्डकर्मा नाम राक्षसः। एकदा तेन भ्रमता कश्चिद्ब्राह्मणः समासादितः। ततस्तस्य स्कन्धमारुह्य प्रोवाच। भो ऽग्रे गम्यतां। ब्राह्मणो ऽपि भयत्रस्तमनास्तमादाय प्रस्थितः। अथ तस्य कमलोदरसुन्दरौ पादौ दृष्ट्वा तमपृच्छत्। भो कथमेवंविधौ भवतः कोमलौ पादौ। राक्षस आह। नाहमनुद्धतपद्भ्यां कदाचिदपि भूमिं स्पृशामीति+ मे व्रतमस्ति। तच्छ्रुत्वा ब्राह्मणो ऽप्यात्मनो मोक्षोपायं चिन्तयन् महत् सरः प्राप्तः। ततो राक्षसेनाभिहितं। भो यावदहं स्नानं कृत्वा देवतार्चनं विधाय सरसो निःसरामि। तावत् त्वया नातः स्थानात् क्वापि गन्तव्यं। तथानुष्ठिते ब्राह्मणश्चिन्तयामास। नूनं देवतार्चनविधेरूर्ध्वं मामेष भक्षयिष्यति। तद्द्रुततरं गच्छामि। यतो नायमनुद्धतपादो मे पृष्ठतः समेष्यतीति। तथानुष्ठिते राक्षसो व्रतभङ्गभयात् तत्पृष्ठतो न गतः। अतो ऽहं ब्रवीमि।

पृच्छकेन सदा भाव्यं पुरुषेण विजानता।
राक्षसेन गृहीतो ऽपि प्रश्नान्मुक्तो द्विजः पुरा ॥८०॥

अथ तस्य वचनं श्रुत्वा राजा ब्राह्मणानाहूय प्रोवाच। भो ब्राह्मणाः त्रिस्तनी मे कन्या जाता। तत् किमेतस्याः प्रतिविधानमस्ति। किं वा न। ते प्रोचुः। देव श्रूयतां।

हीनाङ्गी वाधिकाङ्गी वा या भवेत् कन्यकात्र सा ।
भर्तुश्च स्याद्विनाशाय स्वशीलनिधनाय च ॥८१॥
या पुनस्त्रिस्तनी कन्या याति लोचनगोचरं ।
पितरं नाशयत्येव सा द्रुतं नात्र संशयः ॥८२॥

तस्मादेतद्दर्शनं परिहरतु देवः । यदि कश्चिदेनामुद्वाहयति । तत् तस्मै दत्त्वा देशत्यागेन नियोजितव्य इति । एवं कृते लोकद्वयाविरुद्धता कृता भवतीति । तेषां तद्वचनमाकर्ण्य राजा सर्वत्र पटहशब्देन घोषणामाज्ञापयामास । अहो त्रिस्तनीं राजकन्यां यः परिणयति । तस्य राजा सुवर्णलक्षं दत्त्वा देशत्यागं कारयति । एवमाघोषणायां क्रियमाणायां प्रभूतः कालो व्यतीतः । न च कश्चित् तां परिणयति । सापि गुप्तस्थाने संस्थिता यौवनाभिमुखी सञ्जज्ञे । अथ तत्रैव नगरे कश्चिदन्धोऽस्ति । तस्य च मन्थरकनामा कुब्जोऽग्रेसरयष्टिग्राही । ततस्तौ पटहशब्दमाकर्ण्य मिथो मन्त्रयेते । स्पृश्यते ऽसौ पटहः । यदि कथमपि दैवात् कन्यका सुवर्णं च लभ्यते । सुवर्णप्राप्त्या सुखेन कालो व्रजति । अथ यदि कन्यकादोषेण मृत्युर्भवति । तदस्य दारिद्र्योत्थस्य क्लेशस्य पर्यन्तो भवति । उक्तं च यतः ।

लज्जा स्नेहः स्वरमधुरता बुद्धयो यौवनश्रीः ।
कान्तासङ्गः यजनसमता दुःखहानिर्विलासः ।
धर्मः शास्त्रं सुरगुरुमतिः शौचमाचारचिन्ता ।
पूर्णे सर्वे जठरपिठरे प्राणिनां सम्भवन्ति ॥८३॥

एवं मन्त्रयित्वान्धेन गत्वा पटहः स्पृष्टः । आह च । अहं तां कन्यां परिणेष्यामि यदि मे राजा प्रयच्छति । ततस्तै राजपुरुषैर्गत्वा राज्ञे निवेदितं । देव केनचिदन्धेन पटहः स्पृष्टः । तदत्र विषये देवः प्रमाणं । राजा प्राह । भो

अन्धो वा बधिरो वापि कुष्ठी वाप्यन्त्यजो ऽपि वा ।

परिगृह्णातु तां कन्यां सलक्षां स्याद्विदेशगः ॥८४॥

अथ राजादेशानन्तरमेव तै राजपुरुषैस्तां नदीतीरे नीत्वा सुवर्णलक्षं दत्वा त्रिस्तनी तेनान्धेन सह विवाहिता। ततो यानपात्रमारोप्य कैवर्ताः प्रोक्ताः। भो देशान्तरं नीत्वा क्वचिदधिष्ठाने सकुब्जपत्नीको ऽयमन्धो मोचनीयः। तथानुष्ठिते विदेशमासाद्य क्वचिदधिष्ठाने त्रयो ऽपि मूल्येन गृहं प्राप्ताः सुखेन कालं नयन्ति स्म। केवलमन्धः पर्यङ्के सदा सुप्तस्तिष्ठति। गृहव्यापारं कुब्जः करोति। एवं गच्छति काले त्रिस्तनी कुब्जेन सह प्रलुब्धा। आह च। भो सुभग यद्ययमन्धः कथमपि व्यापाद्यते तदावां सुखेन कालं नयावः। तदन्विष्यतां क्वापि विषं। येन तद्दत्वामुं व्यापाद्य सुखिनी भवामि। अथान्येद्युः कुब्जेन परिभ्रमता मृतः कृष्णसर्पः कुत्राप्यासादितः। तं गृहीत्वा प्रहृष्टमनाः स्वगृहमभ्येत्य तामाह। सुभगे लब्धो ऽयं कृष्णसर्पः। तदेनं खण्डशः कृत्वा प्रभूतशुण्ठ्यादिभिः संस्कृत्यामुष्मै विगतनयनाय मत्स्यामिषमिदमिति कथयित्वा सम्प्रयच्छ येन द्राग्विनश्यति। यतो ऽस्य मत्स्यामिषं सदा प्रियं। एवमुक्त्वा भूयो ऽपि मन्थरको हट्टमार्गं प्रतिप्रस्थितः। सापि प्रदीप्ते वह्नौ कृष्णसर्पं खण्डीकृत्य सतक्रस्थाल्यां निधाय चुल्लीमस्तकमारोप्य स्वयं गृहव्यापारव्याकुलतया तमन्धं सप्रश्रयमिदमाह। आर्यपुत्र अहमद्य तवाभीष्टतमान् मत्स्यान् समानीय पचन्ती तिष्ठामि। तद्यावदहं गृहव्यापारान्तरं करोमि। तावत् त्वं दर्वीं गृहीत्वा तान् प्रचालय। सो ऽपि तच्छ्रुत्वा प्रहृष्टमनाः सृक्किणीं परिलिहन् सत्वरमुत्थाय दर्वीमादाय तान् प्रचालयितुमारब्धः। अथ तान् प्रचालयतो विषगर्भेण बाष्पेण संस्पृष्टं नीलपटलं चक्षुर्भ्यां मन्दं मन्दमगलत्। सो ऽपि तमेव बहुगुणं मन्यमानो विशेषेण नेत्राभ्यां बाष्पग्रहणमकरोत्। ततः स्पष्टदृष्टिर्यावत् पश्यति। तावत् तक्रमध्ये कृष्णसर्पशकलानि केवलानि। ततो व्यचिन्तयत्। अहो किमेतत्। ममाग्रे मत्स्या

मिषं कथितमासीत् एतानि पुनः कृष्णसर्पशकलानि। तत् तावद्विजानामि सम्यक्। किं त्रिस्तन्याः चेष्टितमिदं। किं वा मद्वधायैष उपक्रमो मन्थरकस्य। उताहोस्विदन्यस्य कस्यचित्। एवं सञ्चिन्तयन्नाकारं निगूहयन्नन्धकवत् कर्म करोति यथा पुरा। अत्रान्तरे मन्थरकः समागत्य निःशङ्कमालिङ्गनचुम्बनादिभिस्त्रिस्तनीं सेवितुमुपचक्रमे। अन्धो ऽपि सर्वमालोकयन् यावन्न किञ्चिच्छस्त्रं पश्यति। तावत् क्रोधान्धः पूर्ववत् समीपं गत्वा मन्थरकं चरणाभ्यामादाय शरीरबलसामर्थ्यान्मस्तकोपरि भ्रामयित्वा तस्यास्त्रिस्तन्या हृदये व्यताडयत्। अथ कुब्जशरीरप्रहारेण तस्यास्तृतीयस्तन उरसि प्रविष्टः। पृष्ठप्रदेशस्तनस्पर्शात् कुब्जकः प्राञ्जलतां गतः। अतो ऽहं ब्रवीमि।

अन्धकः कुब्जकश्चैव राजकन्या च त्रिस्तनी।
त्रयो ऽप्यन्यायतः सिद्धाः सन्मुखे कर्मणि स्थिते॥८५॥

सुवर्णसिद्धः प्राह। भो सत्यमेतत् त्वयाभिहितं। दैवानुकूलतया सर्वत्र कल्याणं सम्पद्यते। परं तथापि पुरुषेण सतां वचनं कार्यं। पुनरेवमेव यो वर्तते स त्वमिव विनश्यति। तथा च।

एकोदराः पृथग्ग्रीवा अन्योन्यफलभक्षिणः।
असंहता विनश्यन्ति भारण्डा इव पक्षिणः॥८६॥

चक्रधर आह। कथमेतत्। सो ऽब्रवीत्। अस्ति कस्मिंश्चित् कथा
समुद्रोपकण्ठे भारण्डो नाम पक्ष्येकोदरः द्विमुखः प्रतिवसति स्म। ॥१४॥
तेन समुद्रतीरे परिभ्रमता किञ्चित् फलममृतकल्पं तरङ्गाक्षिप्तं सम्प्राप्तं। सो ऽपि भक्षयन्निदमाह। अहो बहूनि मयामृतप्रायाणि समुद्रकल्लोलाहृतफलानि भक्षितानि। परमपूर्वो ऽस्यास्वादः। तत् किं पारिजातहरिचन्दनतरुसम्भवं। किं वा किञ्चिदमृतमयं फलमन्यत् केनापि विधिना पतितं। जिह्वासौख्यमनुभवामि। तस्यैवं ब्रुवतो द्वितीयमुखेनाभिहितं। भो यद्येवं तन्ममापि स्तोकं प्रयच्छ येनाहमपि जिह्वा

सौख्यमनुभवामि। ततो विहस्य प्रथमेन वक्त्रेणाभिहितं। आवयोस्तावदेकमुदरं सामान्यतृप्तिश्च भविष्यति। तत् किं पृथग्भक्षणेन। वरमनेन शेषेण प्रियतमा सन्तोषिता। एवमभिधाय तेन भक्षितशेषं भारण्ड्याः प्रदत्तं। सापि तदास्वाद्य प्रहृष्टतमालिङ्गनचुम्बनसम्भावनानेकचाटुपरा बभूव। द्वितीयमुखं तद्दिनादेव प्रभृति सोद्वेगं सविषादं च तिष्ठति। अथान्येद्युर्द्वितीयमुखेन विषवृक्षफलं प्राप्तं। तद्दृष्ट्वा द्वितीयमुखमाह। भो निस्त्रिंशपुरुषाधम निरपेक्ष मया विषफलमासादितं। तत् तवापमानाद्भक्षयिष्यामि। प्रथमेनाभिहितं। मूर्ख मा मैवं कुरु। एवं कृते द्वयोरपि विनाशो भविष्यति। तत् क्षम्यतामपराधः। नाहं कदाचिदपि त्वामपकारयिष्यामीति। अथैवं वदतो ऽपि तस्य तेन विषफलं भक्षितं। किं बहुना द्वावपि विनष्टौ। अतो ऽहं ब्रवीमि।

एकोदराः पृथग्ग्रीवा अन्योन्यफलभक्षिणः।
असंहता विनश्यन्ति भारण्डा इव पक्षिणः ॥ ८७ ॥

चक्रधर आह। भो एवमेवैतत्। सत्यमभिहितं। तद्गच्छ स्वगृहं। परं नैकाकिना गन्तव्यं। उक्तं च यतः।

एकः स्वादु न भुञ्जीत नैकः सुप्तेषु जागृयात्।
एको न गच्छेदध्वानं नैकः स्वार्थान् प्रचिन्तयेत् ॥ ८८ ॥

अपि च। अपि कापुरुषो मार्गे द्वितीयः क्षेमकारकः।
कर्कटेन द्वितीयेन सर्पात् पान्थः प्ररक्षितः ॥ ८९ ॥

कथा ॥१५॥ सुवर्णसिद्ध आह। कथमेतत्। सो ऽब्रवीत्। अस्ति कस्मिंश्चिदधिष्ठाने ब्रह्मदत्तो नाम ब्राह्मणः प्रतिवसति स्म। स च प्रयोजनवशात् किञ्चिद्ग्रामान्तरं प्रस्थितः। स स्वमात्राभिहितः। वत्स कथं त्वमेकाकी प्रयासि तदन्विष्यतां कश्चिद्द्वितीयः। मार्गे सहायस्ते भवेत्। अथ तेनाभिहितं। अम्बे मा भैषीः। निरुपद्रवो ऽयं मार्गः। ततो

गुरुकार्यवशादेकाक्यप्यहमद्यैव गमिष्यामि। अथ तन्निश्चयं विज्ञाय समीपवर्तिकूपस्थितकोटरात् कर्कटकमादाय मात्रा पुत्रो ऽभिहितः। वत्स अवश्यं यदि गन्तव्यं तदेष कर्कटकस्ते सखा भविष्यति। तदेनं यत्नेन गृहीत्वा गच्छ। सो ऽपि मातृगौरवादुभाभ्यां हस्ताभ्यां तं सङ्गृह्य कर्पूरपुटिकामध्ये सन्निधाय मात्रामध्ये प्रक्षिप्य शीघ्रं प्रस्थितः। अथ गच्छमानो ग्रीष्मसन्तप्तः कश्चिन्मार्गे वृक्षमासाद्य तदधः सुखं सुष्वाप। अत्रान्तरे वृक्षकोटरात् कृष्णसर्पो विनिर्गत्य तमुपाद्रवत्। अथ कर्पूरपरिमलेनापि धृष्यमाणेन्द्रियः कृष्णसर्पस्तं परित्यज्य मात्राभस्त्रां विदार्याभ्यन्तरगतं कर्पूरपुटिकमतिलौल्यादभक्षयत्। सो ऽपि कुलीरस्तेन भक्षितो ऽप्यन्तर्गलगत एव तस्य फणिनः प्राणानपाहरत्। ब्राह्मणो ऽपि सञ्जातनिद्राप्रलयो यावत् पश्यति। तावत् समीपे कृष्णसर्पो विदारितमात्राभस्त्रो भक्षितकर्पूरपुटिको मृतो ऽस्ति सर्पसमीपस्थितः कर्कटश्च। तं दृष्ट्वा व्यचिन्तयत्। भो सत्यमभिहितं मम मात्रा यद्द्वितीयः को ऽपि सहायः कार्यः। परं तु पथि नैकाकिना गन्तव्यं। यतो मया श्रद्धापूरितचेतसा तद्वचनमनुष्ठितं। तेनाहं कर्कटेनापि सर्पव्यापादनाद्रक्षितः। अथवा साधिदमुच्यते।

क्षीणः स्रवति शशी रविवृद्धौ वर्धयति पयसां नाथं।
अन्ये विपदि सहाया धनिनां श्रियमनुभवन्त्यन्ये ॥ १० ॥
मन्त्रे तीर्थे द्विजे देवे दैवज्ञे भेषजे गुरौ।
यादृशी भावना यस्य सिद्धिर्भवति तादृशी ॥ ११ ॥

एवमुक्त्वासावभिप्रेतं गतः। अतो ऽहं ब्रवीमि।

अपि कापुरुषो मार्गे द्वितीयः क्षेमकारकः।
कर्कटेन द्वितीयेन सर्पात् पान्थः प्ररक्षितः ॥ १२ ॥

एवं श्रुत्वा सुवर्णसिद्धस्तमनुज्ञाप्य स्वगृहं प्रति निवृत्तः।

इति श्रीविष्णुशर्मविरचिते पञ्चतन्त्रके
अपरीक्षितकारितं नाम पञ्चमं तन्त्रं
समाप्तं
एतत् पञ्चतन्त्रापरनामकं पञ्चाख्यानकं नाम नीतिशास्त्रं समाप्तं ।

कथान्वितं सत्कविसूक्तयुक्तं श्रीविष्णुशर्मा नृपनीतिशास्त्रं ।
चकार येनेह परोपकारः स्वर्गायतो येन बुधा वदन्ति ॥
॥ शुभमस्तु ॥

# INDEX FABULARUM.

Prooemium . . . . . . . . . . . . pag. 3

## LIBER PRIMUS

quo de amicitia subversa exponitur, narratis iis, quibus Damanakus, thos, amicitiam, quam leo cum bove fecerat, sustulit . . . . . . . . . . 6

Fab. 1. Simiae testiculi, in rimam trabis immissi, conteruntur . . . . 10
— 2. Thos famelicus tympanum vorat . . . . . . . 20
— 3. Mercatorem probum falso criminatur servus . . . . . 26
— 4. Devasarmano, monacho, pecuniam subripit fur . . . . . 32
— 5. Textor volitans puella regia potitur . . . . . . . 43
— 6. Cornices, torque aurea adlata, serpentem delent . . . . . 49
— 7. Gruem fraudulentam interimit cancer . . . . . . 50
— 8. Lepus leonem in puteum inducit . . . . . . . 53
— 9. Pediculus et cimex in lecto principis versantes . . . . . 60
— 10. Thos colore coeruleo infectus . . . . . . . 62
— 11. Camelo insidias parant panthera, cornix et thos . . . . . 68
— 12. Parra furorem maris restringit . . . . . . . 74
— 13. Testudo ab anseribus transportata perit . . . . . . 76
— 14. Tres pisces, quorum unus socordia perit . . . . . . 77
— 15. Passeres, amicis adiuti, elephantum superant . . . . . 80
— 16. Thoes duo astuti metum iniiciunt leoni . . . . . . 87
— 17. Simiae baccas rubicundas putant esse scintillas . . . . . 93
— 18. Simiae frigore horrentes nidum passeris evertunt . . . . . 94
— 19. Homo probus machinationes nebulonis reddit irritas . . . . 95
— 20. Viverra vorat serpentem et grues . . . . . . . 98
— 21. Mures ferrum voravisse dicuntur . . . . . . . 99

## LIBER SECUNDUS

quo de amicitia contrahenda exponitur, narratis iis, quae cornix, columba, mus, testudo et dama, amicitia iunctae peregerunt . . . . . . . . 104

Fab. 1. Mus narrat, quaenam apud monachum perpessus sit . . . . . 116
— 2. Femina grana sesami emit crustata, datis non crustatis . . . . 118
— 3. Thos, arcum vorans, perit . . . . . . . . 120
— 4. Sâgaradattus bona nanciscitur, ipsi destinata fato . . . . . 127
— 5. Sômilakus, textor, bona non adcumulanda esse, docetur . . . . 132
— 6. Thos, vana spe delusus, taurum prosequitur . . . . . . 135

## LIBER TERTIUS

quo de inimicitia exponitur, enarrato bello, quod cornices intulerunt ululis . . . . . . . pag. 148

Fab. 1. Lepus elephanto persuadet, lunam esse leporum patronum . . . . 159
— 2. Felis fallax vorat passerem et leporem, de domo litigantes . . . 163
— 3. Nebulones brâhmano persuadent, ipsius capram non esse capram . . . 169
— 4. Serpentem saucium opprimunt anates . . . . . . . 170
— 5. Iuvenem ingratum interimit serpens . . . . . . . 174
— 6. Anseres in avem peregrinam immites puniuntur . . . . . 175
— 7. Columbae hospitio excipiunt aucupem . . . . . . . 176
— 8. Femina, furem metuens, maritum amplexatur . . . . . 181
— 9. Brâhmanus insidias, sibi a fure daemoneque structas, effugit . . . 182
— 10. Serpens ex iuvenis regii visceribus expellitur . . . . . 183
— 11. Maritus stultus uxorem castam se habere putat . . . . . 185
— 12. Mus in puellam mutata maritum petit murem . . . . . . 188
— 13. Avis aurum excernens stulte dimittitur . . . . . . 191
— 14. Thos leonem in spelunca latere sentit . . . . . . 193
— 15. Serpens se ranarum iumentum esse simulat . . . . . . 197
— 16. Brâhmanus uxorem adulteram poena adficit . . . . . . 199

## LIBER QUARTUS

quo de bono amisso exponitur, narratis iis, quibus factum est, ut crocodilus amicum et domum amitteret . . . 205

Fab. 1. Serpens a ranarum rege advocatus vorat ranas omnes . . . . 209
— 2. Thos leoni persuadet, asinum aures non habuisse, neque cor . . . 214
— 3. Figulus saucius miles fortis esse putatur . . . . . . 217
— 4. Catulus thois cum catulis leonis educatur . . . . . . 218
— 5. Brâhmanus dimidiam vitam cedit uxori . . . . . . 220
— 6. Nandum, regem, pro iumento habet uxor . . . . . . 223
— 7. Asinus, quamvis pelle tigridis indutus, vapulat . . . . . 224
— 8. Feminam adulteram, ab amasio desertam, deridet thos . . . . 225
— 9. Camelum, tintinnabulo decoratum, rapit leo . . . . . . 228
— 10. Thos callidus elephantum mortuum sibi vindicat . . . . . 230
— 11. Canis peregrinationem non gratam esse sentit . . . . . 232

## LIBER QUINTUS

quo de iis, quae inconsiderate aguntur, exponitur, narratis iis, quae hominibus temere agentibus acciderunt . 234

Fab. 1. Tonsor temere obtruncat sacerdotes . . . . . . . 234
— 2. Brâhmana viverram, bene agentem, ferociter necat . . . . . 238
— 3. Brâhmanus, pecuniae nimis cupidus, caput praebet rotae . . . . 239
— 4. Brâhmani leoni vitam restituunt, eoque pereunt . . . . . 243
— 5. Quattuor brâhmani docti, sed stupidi, deridentur . . . . . 244
— 6. Pisces, suae sapientiae confisi, capiuntur . . . . . . 246
— 7. Asinus luna splendente cantans vapulat . . . . . . 247
— 8. Textor, ut capita duo sibi dentur, precatur, eoque perit . . . . 249
— 9. Brâhmanus, spei vanae indulgens, ollam contundit . . . . . 252
— 10. Simia sapiens fratres caesos ulciscitur . . . . . . 253
— 11. Simia, cuius cauda mordetur, vultum mutat . . . . . . 258
— 12. Puella, quae mamillas tres habebat, casu sanatur . . . . . 259
— 13. Brâhmanus daemonem, qui ipsius dorso insidebat, effugit . . . . 260
— 14. Avis gemino collo praedita perit . . . . . . . 263
— 15. Viatorem cancer, itineris comes, a serpente defendit . . . . 264

PK3741 .P2 1848
Pantschatantrum, sive, Quinquepartitum
Princeton Theological Seminary-Speer Library
1 1012 00081 8825

1212CD
07-24-07 32180
292
MC
HH-Group